प्रवेश सं० १८ ३५५ 	विषयः पुराणेतिहासम् 	क्रम सं०

ग्रन्थकार

नाम महाभारतम् (द्रोणपर्व)

पत्र सं० १६४ अपूर्ण. ~~[illegible]~~ १-४१, ५१-१५५, १८६-१९८, १९८-२२२।

अक्षर सं० (पंक्तौ) ६० 	पंक्ति सं० (पृष्ठे) १८

श्लोक सं०

आकार १३.८१/२" x ७.१"

लिपि: दे. ना. 	आधार: का.

14738 सं.

लि० विवरण अपू० कृ.

पी० एस० यू० पी० — ११ एम० सी० ई० — १८५१ — ५० ०००

ग० ३९७१

अध्यायाः: १-१२९, १४५-१५०,

श्लोकाः: १-४१, ३३-५३।

Indira Gandhi National Centre for the Arts

महीधरसंग्रहे- २५४

Indira Gandhi National
Centre for the Arts

द्रोण० ॐ श्रीगणेशाय नमः नारायणं नमस्कृत्य नरं चैव नरोत्तमं देवीं सरस्वतीं चैव ततो जयमुदीरयेत् १ जनमेजय उवाच तमप्रतिमसत्वौजोबलवीर्य प
१ समन्वितं हतं देवव्रतं श्रुत्वा पांचाल्येन शिखंडिना १ धृतराष्ट्रस्ततो राजा शोकव्याकुललोचनः किमचेष्टत विप्रर्षे हते पितरि वीर्यवान् २
तस्य पुत्रो हि भगवान् भीष्मद्रोणमुखै रथैः पराजित्य महेष्वासान् पांडवान् राज्यमिच्छति ३ तस्मिन् हते तु भगवन् केतौ सर्वधनुष्मतां यदचेष्टत
कौरव्यस्तन्मे ब्रूहि तपोधन ४ वैशंपायन उवाच निहतं पितरं श्रुत्वा धृतराष्ट्रो जनाधिपः लेभे न शांतिं कौरव्यश्चिंताशोकपरायणः ५ तस्य चिंतयतो दुः
खमनिशं पार्थिवस्य तत् आजगाम विशुद्धात्मा पुनर्गावल्गणिस्तदा ६ शिबिरात् संजयं प्राप्तं निशि नागाह्वयं पुरं आंबिकेयो महाराज धृतराष्ट्र
स्तदा न्वपृच्छत ७ श्रुत्वा भीष्मस्य निधनमप्रहृष्टमना भृशं पुत्राणां जयमाकांक्षन्विललापातुरो यथा ८ धृतराष्ट्र उवाच॥ ॥संशोच्य तु महात्मानं भी
ष्मं भीमपराक्रमं किमकार्षुः परं तात कुरवः कालचोदिताः ९ तस्मिन् विनिहते शूरे दुराधर्षे महात्मनि किं नु स्वित्कुरवोकार्षुर्निमग्नाः शोक
सागरे १० तदुदीर्णं महत्सैन्यं त्रैलोक्यस्यापि संजय भयमुत्पादयेत्तीव्रं पांडवानां महात्मनां ११ देवव्रते तु निहते कुरूणामृषभे तदा किमकार्षु
र्नृपतयस्तन्ममाचक्ष्व संजय १२ संजय उवाच॥ ॥शृणु राजन्नेकमना वचनं ब्रुवतो मम यत्ते पुत्रा महाकार्षुर्हते देवव्रते मृधे १३ निहते तु
तदा भीष्मे राजन्सत्यपराक्रमे तावकाः पांडवेयाश्च प्राध्यायंत पृथक्पृथक् १४ विस्मिताश्च प्रहृष्टाश्च क्षत्रधर्मं निशाम्य ते स्वधर्मं निंदमाना
स्ते प्रणिपत्य महात्मने १५ शयनं कल्पयामासुर्भीष्मायामितकर्मणे सोपधानं नरव्याघ्र शरैः संनतपर्वभिः १६ विधाय रक्षां भीष्माय स
माभाष्य परस्परं अनुमान्य च गांगेयं कृत्वा चापि प्रदक्षिणं १७ क्रोधसंरक्तनयनाः समवेत्य परस्परं पुनर्युद्धाय निर्जग्मुः क्षत्रियाः कालचो
दिताः १८ ततस्तूर्यनिनादैश्च भेरीणां निनदेन च तावकानामनीकानि परेषां चापि निर्ययुः १९ व्यावृत्तेऽहनि राजेंद्र पतिते जाह्नवीसुते
अमर्षवशमापन्नाः कालोपहतचेतसः २० अनादृत्य वचः पथ्यं गांगेयस्य महात्मनः निर्ययुर्भरतश्रेष्ठाः शस्त्राण्यादाय सत्वराः २१ मो
हात्त्वच्च पुत्रस्य वधाच्छांतनवस्य च कौरव्यास्त्वपुनाहूताः सहिताः सर्वराजभिः २२ अजावय इवा[illegible]गोपाः वने श्वापदसंकुले भृश राम
मुद्विग्नमनसो हीना देवव्रतेन ते २३ पतिते भरतश्रेष्ठे बभूव कुरुवाहिनी द्यौरिवापेतनक्षत्रा हीनं खमिव वायुना २४ विपन्नसस्येव १
मही वाक् चैवासंस्कृता यथा आसुरीव यथा सेना निगृहीते पुरा बलौ २ विधवेव वरारोहा शुष्कतोयेव निम्नगा वृकैरिव वने रुद्धा पृषती
हतयूथपा २६ शरभाहतसिंहेव महती गिरिकंदरा भारती भरतश्रेष्ठ पतिते जाह्नवीसुते २७ विष्वग्वातहतारुग्णा नौरिवासीन्म

हार्णवे बलिभिः पांडवैर्वीरैर्लब्धलक्षैर्भृशार्दिता २८ सा तदासीद्भृशं सेना व्याकुलाश्वरथद्विपा विषण्णभूयिष्ठनरा कृपणा ध्वस्तमान
सा २९ तस्यां त्रस्ता नृपतयः सैनिकाश्च पृथग्विधाः पाताल इव मज्जंतो हीना देवव्रतेन ते ३० कर्णं हि कुरवोस्मार्षुः स हि देवव
व्रतोपमः सर्वशस्त्रभृतां श्रेष्ठो रोचमानमिवातिथिं ३१ बंधुमापद्गतस्येव तमेवोपागमन्मनः चुक्रुशुः कर्ण कर्णेति तत्र भारत पार्थि
वाः ३२ राधेय हितमस्माकं सूतपुत्र तनुत्यज सहितः युध्यत तदा दृष्टा हा नि महायशाः ३३ सामात्यबंधुः कर्णो वै तमामानयत माचिरं
भीष्मेणा हि महाबाहुः सर्वक्षत्रस्य पश्यतः ३४ रथेषु गण्यमानेषु बलविक्रमशालिषु संख्यातोर्धरथः कर्णो द्विगुणः स
न्नरर्षभः ३५ रथातिरथसंख्यायां योग्रणीः शूरसंमतः सासुरानपि देवेशान् रणे यो योद्धुमुत्सहेत् ३६ स तु तेनैव कोपेन राजन्
गांगेयमुक्तवान् त्वयि जीवति कौरव्य नाहं योत्स्ये कदाचन ३७ त्वया तु पांडवेयेषु निहतेषु महामृधे दुर्योधनमनुज्ञाप्य वनं यास्यामि
कौरव ३८ पांडवैर्वा हते भीष्मे त्वयि स्वर्गमुपेयुषि हंतास्म्येकरथेनैव कृत्स्नान् यान्मन्यसे रथान् ३९ एवमुक्त्वा महाबाहुर्दश
हानि महायशाः नायुध्यत ततः कर्णः पुत्रस्य तव संमते ४० भीष्मः समरविक्रांतः पांडवेयस्य भारत जघान समरे योधानसं
ख्येयपराक्रमः ४१ तस्मिंस्तु निहते शूरे सत्यसंधे महौजसि त्वत्सुताः कर्णमस्मार्षुस्तर्तुकामा इव प्लवं तावकास्तव पुत्राश्च स
हिताः सर्वराजभिः हा कर्ण इति चाक्रंदन् कालोयमिति चाब्रुवन् ४३ जामदग्न्याभ्यनुज्ञातमस्त्रे दुर्वारपौरुषं अगमन्नो म
नः कर्णं बंधुमात्ययिके ष्विव ४४ स हि शक्तो रणे राजंस्त्रातुमस्मान् महाभयात् त्रिदशानिव गोविंदः सततं सुमहाभयात्
४ वैशंपायन उवाच तथा तु संजयं कर्णं कीर्तयंतं पुनः पुनः आशीविषवदुच्छ्वस्य धृतराष्ट्रोब्रवीदिदं ४६ धृतराष्ट्र उवा
च॥ ॥यत्तद्वैकर्तनं कर्णमगमद्वो मनस्तदा अप्यपश्यंत राधेयं सूतपुत्रं तनुत्यजं ४७ अपि तन्न मृषाकार्षीत् कच्चित्सत्यप
राक्रमः संभ्रांतानां तदार्तानां त्रस्तानां त्राणमिच्छतां ४८ अपि तल्लरयाचक्रे धनुर्धरवरो युधि यत्तद्विनिहते भीष्मे कौरवाणामुपाश्र

Indira Gandhi National
Centre for the Arts

द्रोण
१

ये पूर्व तनं वंशमप्रयनकर्णाः परषामाहवज्ञयं स हिवै पुरुषव्याघ्रो लोके संजय कथ्यते ५० आर्त्तानां बांधवानां च कर्त्ता च वि
शेषतः परित्यज्य परो प्राणान्त त्राणार्थेच परस्य च ५१ कृतवान्मम पुत्राणां जयाशां सफलामपि ॥ ॥ इति श्रीमहाभारते द्रो
णपर्वणि प्रथमोऽध्यायः १ संजय उवाच हतं भीष्ममथाधिरथिर्विदित्वा भिन्नां नावमिवात्यगाधे कुरूणां सोदर्यवद्व्यसनात्स
त्पुत्रः संतारयिष्यंस्तव पुत्र सेनां १ श्रुत्वा तु कर्णः पुरुषेन्द्रमच्युतं निपातितं शांतनवं महारथं अथोपायात्तूर्णमहा
रिकर्षणो धनुर्द्धराणां प्रवरस्तदा नृप २ हते तु भीष्मे रथसत्तमे परैर्निमज्जतीं नावमिवार्णवे कुरून् पितेव पुत्रांस्त्वरितोऽभ्य
यात्ततः संतारयिष्यंस्तव पुत्रस्य सेनां ३ कर्ण उवाच यस्मिन्धृतिर्बुद्धिपराक्रमौजः सत्यं स्मृतिर्वीरगुणाश्च सर्वे अस्त्राणि
ह्रियान्यपश्य सनतिर्हि प्रिया च वाग न सूया च भीष्मे ४ सदा कृतज्ञे हि द्विजशत्रुघातके सनातने चंद्रमसीव लक्ष्मीः सवेत्प्रशां
तः परवीरहंतामन्ये हतान्नेव च सर्ववीरान् ५ नेह ध्रुवं किंचन जातु विद्यते लोके ह्यस्मिन्कर्मणो नित्ययोगात् सूर्योदये को
हि विमुक्तसंशयो भावं कुर्वीताद्य महाव्रते हते ६ वसुप्रभावे वसुवीर्यसंभवे गते वसून्नेव वसुंधराधिप वसूनि पुत्रांश्च व
सुंधरां तथा कुरूंश्च शोचध्वमिमां च वाहिनीं ७ संजय उवाच महाप्रभावे वरदे निपातिते लोकेश्वरे शास्तरि चामितेज राम
सि पराजितेषु भरतेषु दुर्मनाः कर्णो भृशं न्यश्वसदश्रु वर्त्तयन् ८ इदं तु राधेयवचो निशम्य सूतास्तराजंस्तव सैनिका
श्च ह परस्परं चक्रुशुरार्त्तिजं सुहुस्तदास्रुनेत्रैर्मुमुचुश्च शब्दवत् ९ प्रवर्त्तमाने तु पुनर्महाहवे विगाह्यमानासु चमू १
षु पार्थिवैः अथाब्रवीद्धर्षकरं तदा वचो रथर्षभान्सर्वमहारथर्षभ १० जगत्यनित्ये सततं प्रभावति प्रचिंतयन्नास्थिरम

द्यलक्षये भवत्सु तिष्ठस्विह पातितो मृधे गिरिप्रकाशः कुरुपुंगवः कथं ११ निपातिते शांतनवे महारथे दिवाकरे भूतलमास्थि
ते यथा न पार्थिवाः सोढमलं धनंजयं गिरिप्रवोढारमिवानिलं द्रुमाः १२ हतप्रधानं त्विदमार्त्तरूपं परैर्हतोत्साहमनाथमद्य वै
मया कुरूणां परिपाल्यमाहवे बलं यथा तेन महात्मना तथा १३ समाहितं चात्मनि भारमीदृशं जगत्तथानित्यमिदं च लक्षये
निपातितं चाहवशौंडमाहवे कथं नु कुर्यामहमीदृशे भयं १४ अहं तु तान्कुरुवृषभानजिह्मगैः प्रवेशयन्यमसदनं चरन्रणे यशः
परं जगति विभाव्य वर्त्तिता परैर्हतो भुवि शयिताथवा पुनः १५ युधिष्ठिरो धृतिमतिसत्यसंस्थितो वृकोदरो गजशततुल्यविक्रमः तथा
र्जुनस्त्रिदशवरात्मजो युवा न तद्बलं सुजयमिदं सुरैरपि १६ यमौ रणे यत्र यमोपमौ बले ससात्यकिर्यत्र च देवकीसुतः न तद्बलं कापुरु
षो मृत्युमुपेयिवान्निवर्त्तते मृत्युमुखाच्च वा पुनः १७ तपोऽत्युदीर्णं तपसेव बाध्यते बलं बलेनैव तथा मनस्विभिः मनश्च मे शत्रुनिवा
रणे ध्रुवं स्वरक्षणे चाचलवद्व्यवस्थितं १८ एवं चैषां बाधमानः प्रभावं गत्वैवाहं तान्जयाम्यद्य सूत मित्रद्रोहो मर्षणीयो न मेऽयं भ
ग्नैः सैन्यैः समेयादसमित्रे १९ कर्त्तास्म्येतत्सत्पुरुषार्यकर्म त्यक्त्वा प्राणाननुयास्यामि भीष्मं सर्वान्संख्ये शत्रुसंघान्हनिष्ये हतस्तैर्वा
वीरलोकं प्रपत्स्ये २० संप्राक्रुष्टे रुदितस्त्रीकुमारे पराहते पौरुषे धार्त्तराष्ट्रे मया कृत्यमिति जानामि सूत तस्माद्राज्ञस्त्वद्य श
त्रून्विजेष्ये २१ कुरून्रक्षन्पांडुपुत्रान्जिघांसंस्त्यक्त्वा प्राणान्घोररूपे रणेऽस्मिन् सर्वान्संख्ये शत्रुसंघान्निहत्य दास्याम्य
हं धार्त्तराष्ट्राय राज्यं २२ निबध्यतां मे कवचं विचित्रं हैमं शुभ्रं मणिरत्नावभासि शिरस्त्राणं चार्कसमानभासं धनुः शरांश्चा
ग्निविषाहिकल्पान् २३ उपासंगान्षोडश योजयंतु धनूंषि दिव्यानि तथाहरंतु असींश्च शक्तीश्च गदाश्च गुर्वीः शंखं च जांबूनद

Indira Gandhi National
Centre for the Arts

द्रोण० हचित्रनाले २४ इमां रौक्मीं नागकक्ष्यां विचित्रां ध्वजे चित्रं हिव्यमिंदीवराभं स्त्रं ह्यार्णवं सैत्रैर्विप्रमज्यार्नयं तु चित्रां माला तां वारुवह्नास
३ लाजां २५ आश्वानग्र्यान्पांडुरांश्च प्रकाशान्पुष्टांस्नातान्मंत्रपूताभिरद्भिः तैश्चर्मभिः कौंचैनैरभ्युपेतान्पीघ्रान्शीघ्रस्
नपुत्रान्यैरव २६ रथं चाग्र्यं हेममालावनद्धं रत्नैश्चित्रं सूर्यचंद्रप्रकाशैः द्रव्यैर्युक्तं संप्रहारोपपन्नैर्वाहैर्युक्तं तूर्णमावर्त्तयस्व २७
चित्राणि चापानि च वेगवंति ज्याश्चोत्तमाः संनहनोपपन्नाः तूणांश्च पूर्णान्महतः शराणामासाद्य गात्रावरणानि चैव २८
आयम्विकं चानयताशु सर्वं दध्याभापूर्णं वीरकांस्यं च हैमं आनीय मालामवबध्य चाग्रे प्रवाहयंत्वाशु जयाय भेरी २९ प्रयाहि सू
ताशु यतः किरीटी वृकोदरो धर्मसुतो यमौ च तान्वा हनिष्यामि समेत्य संख्ये भीष्माय याष्यामि हतो द्विषद्भिः ३० यस्मिन्राजा
सत्यधृतिर्युधिष्ठिरः समास्थितो भीमसेनार्जुनौ च वासुदेवः सात्यकिः संजयाश्च मन्ये बलं तदजय्यं महीपैः ३१ तं चेन्मृत्युः सर्व
हरोभिरक्षेत्सहाप्रमत्तः समरे किरीटिनं तथापि हंतास्मि समेत्य संख्ये यास्यामि वा भीष्मपथा यमाय ३२ न त्वेवाहं गमिष्या
मि तेषां मध्ये शूराणां तत्र चाहं ब्रवीमि मित्रद्रुहो दुर्बलभक्तयो ये पापात्मानो न ममैते सहायाः ३३ संजय उवाच समृद्धिमंतं र
थमुत्तमं दृढं सकूबरं हेमपरिष्कृतं शुभं पताकिनं वातजवैर्हयोत्तमैर्युक्तं समास्थाय ययौ जयाय ३४ संपूज्यमानः कुरुभिर्महा राम
त्मा रथर्षभो देवगणैर्यथेंद्र ययौ तदायोधनमुग्रधन्वा यत्रावसानं भरतर्षभस्य ३५ वरूथिना महता रथर्षभो देवगणैर्यथेंद्र
सध्वजेन सुवर्णमुक्तामणिरत्नमालिना सहस्रयुक्तेन रथेन कर्णो मेघस्वनेनार्क इवामितौजाः ३६ हुताशनाभः सुहुताशन ३
प्रभेश्शुभः शुभे वै स्वरथे धनुर्द्धरः स्थितो राजाधिरथिर्महारथः स्वयं विमाने सुरराडिवास्थितः ३७ इति श्रीमहाभारते द्रो

गापृष्ठिभा १ संजय उवाच शरतल्पे महात्मानं शयानममितौजसं महावातसमूहेन समुद्रमिव शोषितं १ दिव्यैरस्त्रैर्महेष्वासं पा
तितं सव्यसाचिना जयाशां तव पुत्राणां संभग्नां शर्म चर्म च २ अपाराणामिव द्वीपमगाधे गाधमिच्छतां स्रोतसा यामुनेनेव शरौघेन
परिप्लुते ३ महेंद्रेणेव मैनाकमसह्यं भुवि पातितं नभश्च्युतमिवादित्यं पतितं धरणीतले ४ शतक्रतुमिवाचिंत्यं पुरा वृत्रेण नि
र्जितं मोहनं सर्वसैन्यस्य युधि भीष्मस्य पातनं ५ ककुदं सर्वसैन्यानां लक्ष्म सर्वधनुष्मतां धनंजयशरैर्व्याप्तं पितरं ते महाव्रतं ६
तं वीरशयने वीरं शयानं पुरुषर्षभं भीष्ममाधिरथिर्दृष्ट्वा भरतानां महाद्युतिः ७ अवतीर्य रथादार्त्तो बाष्पव्याकुलिताक्ष
र अभिवाद्यांजलिं बध्वा वंदमानोऽभ्यभाषत ८ कर्णोऽहमस्मि भद्रं ते वद मामभि भारत पुण्यया क्षेमया वाचा चक्षुषा चावलोकय
९ न नूनं सुकृतस्येह फलं कश्चित्समश्नुते यत्र धर्मपरो वृद्धः शेते भुवि भवानिह १० कोशसंचयने मंत्रे व्यूहप्रहरणेषु च नाथ
मद्य न पश्यामि कुरूणां कुरुपुंगव ११ बुद्ध्या विशुद्धया युक्तो यः कुरूंस्तारयेद्भयात् योधांस्त्वं बहुधा हत्वा पितृलोकं गमिष्यसि
१२ अद्यप्रभृति संक्रुद्धा व्याघ्रा इव मृगक्षयं पांडवा भरतश्रेष्ठ करिष्यंति कुलक्षयं १३ अद्य गांडीवघोषस्य वीर्यज्ञाः सव्यसा
चिनः कुरवः संत्रसिष्यंति वज्रपाणेरिवासुराः १४ अद्य गांडीवमुक्तानामशनीनामिव स्वनः त्रासयिष्यति बाणानां कुरू
न्त्यांश्चान्यान्पार्थिवान् १५ समिद्धोऽग्निर्यथा वीरमहाज्वालो द्रुमान्दहेत् धार्त्तराष्ट्रान्प्रधक्ष्यंति तथा बाणाः किरीटिनः १६ ये
न येन प्रसरतो वाय्वग्नी सहितौ वने तेन तेन प्रदहतो भूरिगुल्मतृणद्रुमान् १७ यादृशोऽग्निः समुद्भूतस्तादृक्पार्थो न संशयः
यथा वायुर्नरव्याघ्रस्तथा कृष्णो न संशयः १८ नदतः पांचजन्यस्य रसतो गांडीवस्य च श्रुत्वा सर्वाणि सैन्यानि त्रासं य

Indira Gandhi National Centre for the Arts

द्रोण० ४ संतिभारत १९ कपिध्वजस्य चोत्पाते रथस्यामित्रकर्षण: शब्देनैनं शब्दयंतित्वाम्नैवीरपार्थिवा २० कोघुर्ज्जुनंयोधयि
तुंत्वदन्य: पार्थिवोर्हति यस्यदिव्यानिकर्म्माणिप्रवदंतिमनीषिण: २१ अमानुषश्च संग्रामस्त्र्यंबकेनमहात्मना तस्मा
च्चैववरप्राप्तोदुष्प्रापमकृतात्मभि: २२ कोन्य: शक्तोरणेजेतुंपूर्वंयोनजितस्त्वया जितोयेनरणेरामोभवतावीर्यशालि
ना २३ क्षत्रियांतकरोघोरोदेवदानवदर्पहा तमद्याहंपाण्डवंयुद्धेशौर्येणमायतोभवताचानुशिष्ट: आशीविषहदृष्टिहं
सुघोषंरश्मींह्यास्त्रबलान्निहंतु २४ इतिद्रोणपर्वणि ३ संजयउवाच तस्यलालप्यमानस्यकुरुवृद्ध: पितामह: दे
शकालोचितंवाक्यमब्रवीत्प्रीतमानस: १ समुद्रइवसिंधूनांज्योतिषामिवभास्कर: सत्यस्यचयथासंतोबीजानामिवचो
र्वरा २ पर्ज्जन्यइवभूतानांप्रतिष्ठासुहृदांभव बांधवास्त्वानुजीवंतुसहस्राक्षमिवामरा: ३ मानहाभवशत्रूणांमित्राणां
नंदिवर्द्धन: कौरवाणांभवगतिर्यथाविष्णुर्दिवौकसा ४ स्वबाहुबलवीर्येणधार्तराष्ट्रजयैषिणा कर्णराजपुरंगत्वाकां
बोजानिर्ज्जितास्त्वया ५ गिरिव्रजगताश्चापिनग्नजित्प्रमुखान्नृपा: अंबष्ठाश्चविदेहाश्चगांधाराश्चजितास्त्वया ६ राम
हिमवद्दुर्गनिलयाकिराताररणकर्कशा: दुर्योधनस्यवशगास्त्वयाकर्णपुराकृता: ७ उत्कलामेकलाश्चौण्ड्रा: कालिं ४
गांध्राश्चसंयुगे निषादाश्चत्रिगर्ताश्चबाह्लीकाश्चजितास्त्वया ८ तत्रतत्रचसंग्रामेदुर्योधनहितैषिणा बहवश्च
जिता: कर्णत्वयावीरामहौजस: ९ यथादुर्योधन: स्वानांमतातिकुलबांधव: तथात्वमपिसर्वेषांकौरवाणांगतिर्भव
१० शिवेनाभिवदामित्वांगच्छयुध्यस्वशत्रुभि: अनुशाधिकुरून्संख्येधत्स्वदुर्योधनेजयं ११ भवान्पौत्रसमोस्मा

कंयथादुर्योधनस्तथा तवापिधर्मत: सर्वेयथातस्यवयंतथा १२ यौनात्संबंधकाद्दत्वाकेविशिष्टंसंगतंसतां सद्भि: सह न
रश्रेष्ठप्रवदंतिमनीषिण: १३ ससत्यसंगरोभूत्वाममेदमितिनिश्चितं कुरूणांपालयबलंयथादुर्योधनस्तथा १४ नि
शम्यवचनंतस्यचरणावभिवाद्यच ययौवैकर्त्तन: कर्ण: समीपंसर्वधन्विनां १५ सोभिवीक्ष्यनरौघाणांस्थानमप्रतिम
मुत्तमं हर्षिता: कुरव: सर्वेदुर्योधनपुरोगमा: १६ उपागतंमहाबाहुंसर्वानीकपुरस्सरं कर्णंदृष्ट्वामहात्मानंयुद्धायसमुप
स्थितं १७ क्ष्वेडितास्फोटितरवै: सिंहनादरवैरपि धनु: शब्दैश्चविविधै: कुरव: समपूजयन् १८ इतिश्रीमहाभार
तेद्रोणपर्वणि ४ संजयउवाच रथस्थंपुरुषव्याघ्रंदृष्ट्वाकर्णमवस्थितं हृष्टोदुर्योधनोराजन्निदंवचनमब्रवीत् १
सनाथमिवमन्येहंभवतापालितंबलं अत्रकिंतुसमर्थंयद्धितंतत्संप्रधार्यतां २ कर्णउवाच ब्रूहितन्नु: पुरुषव्याघ्रत्वंहि
प्राज्ञतमोनृप यथाचार्थपति: कृत्यंपश्यतेनतथेतर: ३ तेस्मसर्वेतववच: श्रोतुकामानरेश्वर नान्याय्यंहिभवान्वाक्यं
ब्रूयादितिमतिर्मम ४ दुर्योधनउवाच भीष्म: सेनाप्रणेतासीद्वयसाविक्रमेणच श्रुतेनचोपसंपन्न: सर्वैर्योधगुणै
स्तथा ५ तेनातियशसाकर्णघ्नताशत्रुगणान्मम सुयुद्धेनदशाहानिपालितास्तेमहात्मना ६ तस्मिन्नसुकरंकर्म
कृतवत्यास्थितेदिवं कंनुसेनाप्रणेतारंमन्यसेतदनंतरं ७ नविनानायकंसेनामुहूर्त्तमपितिष्ठति आहवेषा
हवश्रेष्ठकर्णाहीनेवनौर्जले ८ यथाह्यकर्णधारानौरथश्चासारथिर्यथा द्रवेद्यथेष्टंतद्वत्स्यादृतेसेनापतिंब
लं ९ अदेशिकोयथासार्थ: कृच्छ्रमृच्छति अनायकातथासेनासर्वान्दोषान्समर्च्छति १० सभवान्वीक्ष्य
सर्वेषुमामकेषुमहात्मसु पश्यसेनापतिंयुक्तमनुशांतनवादिह ११ यंहिसेनाप्रणेतारंभवान्वक्ष्यतिसंयुगे

Indira Gandhi National
Centre for the Arts

द्रोण० तैरयं सहितास्सर्वैर्विकरिष्यामो न संशयः १२ कर्ण उवाच सर्व एव महात्मान इमे पुरुषसत्तमाः सेनापतित्वमर्हन्ति नात्र
५ कार्या विचारणा १३ कुलसंहननज्ञानैर्बलविक्रमबुद्धिभिः युक्ताः कृतज्ञा धीमन्त आहवेष्वनिवर्त्तिनः १४ युग
पन्न तु ते शक्याः कर्तुं सर्वे पुरस्सराः एक एव तु कर्त्तव्यो यस्मिन्वैशेषिका गुणाः १५ अन्योन्यस्पर्द्धिनां ह्येषां यद्येकं सत्क
रिष्यसि शेषा विमनसो व्यक्तं न योत्स्यन्ति हितास्तव १६ अयं च सर्वयोधानामाचार्यः स्थविरो गुरुः युक्तः सेनापति
कर्तुं द्रोणः शस्त्रभृतां वरः १७ को हि तिष्ठति दुर्धर्षे द्रोणे शस्त्रभृतां वरे सेनापतिः स्यादन्योऽस्माच्छुक्रांगिरसदर्शनात्
१८ न च सोऽप्यस्ति ते योधः सर्वराजसु भारत द्रोणं यः समरे यान्तमनुयास्यति संयुगे १९ एष सेनाप्रणेतॄणामेष
शस्त्रभृतामपि एष बुद्धिमतां चैव श्रेष्ठो राजन्गुरुस्तव २० एवं दुर्योधनाचार्यमाशु सेनापतिं कुरु जिगीषंतोऽसु
रान्संख्ये कार्त्तिकेयमिवामराः २१ संजय उवाच कर्णस्यैव वचनं श्रुत्वा राजा दुर्योधनस्तदा सेनामध्यगतं द्रोणमिदं वच
नमब्रवीत् २२ दुर्योधन उवाच वर्णश्रैष्ठ्यात्कुलोत्पत्त्या श्रुतेन वयसा धिया वीर्याद्दाक्ष्यादधृष्यत्वादर्थज्ञानान्नयाज्जया
त् २३ तपसा च कृतज्ञत्वाद्वृद्धः सर्वगुणैरपि युक्तो भवत्समो गोप्ता राज्ञामन्यो न विद्यते २४ स भवान्पातु नः सर्वा राम
न्देवानिव शतक्रतुः भवन्नेत्राः परान्जेतुमिच्छामो द्विजसत्तम २५ रुद्राणामिव कापाली वसूनामिव पावकः ५
कुबेर इव यक्षाणां मरुतामिव वासवः २६ वसिष्ठ इव विप्राणां तेजसामिव भास्करः पितॄणामिव धर्मोऽथादि
त्यानामिव चांबुराट् २७ नक्षत्राणामिव शशी दितिजानामिवोशनाः श्रेष्ठः सेनाप्रणेतॄणां स नः सेनापतिर्भव
२८ अक्षौहिण्यो दशैका च वशगाः संतु तेऽनघ ताभिः शत्रून्प्रतिव्यूह्य जहीन्द्रो दानवानिव २९ प्रयातु नो भवा

न्नग्रे देवानामिव पावकिः अनुयास्यामहे त्वाद्य सौरभेया इवर्षभं ३० उग्रधन्वा महेष्वासो दिव्यं विस्फारयन्धनुः अग्रे
भवंतं तु दृष्ट्वा नार्जुनः प्रहरिष्यति ३१ ध्रुवं युधिष्ठिरं संख्ये सानुबंधं सबांधवं जेष्यामि पुरुषव्याघ्र भवान्सेनापतिर्यदि
३२ संजय उवाच एवमुक्ते ततो द्रोणे जयेत्यूचुर्नराधिपाः सिंहनादेन महता हर्षयन्तस्तवात्मजं ३३ सैनिकाश्च मुदा
युक्ता वर्द्धयंति द्विजोत्तमं दुर्योधनं पुरस्कृत्य प्रार्थयंतो महद्यशः ३४ इति द्रोणपर्वणि द्रोणाभिषेके ५ द्रोण उवाच
वेदं षडंगं वेदाहमर्थविद्यां च मानवीं त्रैयंबकमथेष्वस्त्रं शस्त्राणि विविधानि च १ ये चाप्युक्ता मयि गुणा भवद्भिर्जया
कांक्षिभिः चिकीर्षुस्तानहं सर्वान्योधयिष्यामि पांडवान् २ पार्षतं तु रणे राजन्न हनिष्ये कथंचन स हि सृष्टो वधार्थाय मम
मेव पुरुषर्षभः ३ योधयिष्यामि सैन्यानि नाशयन्सर्वसोमकान् न च मां पांडवा युद्धे योधयिष्यन्ति हर्षिताः ४ संजय उवा
च स एवमभ्यनुज्ञातश्चक्रे सेनापतिं ततः द्रोणं तव सुतो राजन्विधिदृष्टेन कर्मणा ५ अथाभिषिषिचुर्द्रोणं दुर्यो
धनमुखान्नृपाः सेनापत्ये यथा स्कंदं पुरा शक्रमुखाः सुराः ६ ततो वादित्रघोषेण शंखानां च महास्वनैः प्रादुरासीत्कृ
ते द्रोणे हर्षः सेनापतौ तदा ७ ततः पुण्याहघोषेण स्वस्तिवादस्वनेन च संस्तवैर्गीतशब्दैश्च सूतमागधबन्दिनां ८
जयशब्दैर्द्विजाग्र्याणां सुभगानव[redacted]न्नितैस्तथा सत्कृत्य विधिवद्द्रोणं मेनिरे पांडवाञ्जितान् ९ इति श्रीम
हाभारते द्रोणपर्वणि द्रोणाभिषेकः ६ संजय उवाच सेनापत्यं तु संप्राप्य भारद्वाजो महारथः युयुत्सुर्व्यूह्य सैन्या
नि प्रायात्तव सुतैः सह सैन्धवश्च कलिंगश्च विकर्णश्च तवात्मजः १ दक्षिणं पार्श्वमास्थाय समतिष्ठन्त दंशिताः

Indira Gandhi National Centre for the Arts

द्रोण० ६

प्रपन्नाः शकुनिस्तेषां प्रवरैर्हयसादिभिः २ ययौ गांधारकैः सार्द्धं विमलप्रासयोधिभिः कृपश्च कृतवर्मा च चित्रसेनो
विविंशतिः ३ दुःशासनमुखा यत्ताः सर्वे पक्षमपालयन् तेषां प्रपक्षाः कांबोजाः सुदक्षिणपुरस्सराः ४ ययुरश्वैर्महा
वेगैः शकाश्च यवनैः सह मद्रास्त्रिगर्त्ताः सांबष्ठाः प्रतीच्योदीच्यमालवाः ५ शिबयः शूरसेनाश्च शूद्राश्च मलदैः सह
सौवीराः कितवाः प्राच्या दाक्षिणात्याश्च सर्वशः ६ तवात्मजं पुरस्कृत्य सूतपुत्रस्य पृष्ठतः हर्षयन्तः स्वसैन्यानि प्रायात्तव
सुतैस्सह ७ प्रवरं सर्वयोधानां बलेषु बलमादधत् ययौ वैकर्त्तनः कर्णः प्रमुखे सर्वधन्विनां ८ तस्य दीप्तो महाका
यः स्वान्यनीकानि हर्षयन् हस्तिकक्ष्यो महाकेतुर्बभौ सूर्यसमद्युतिः ९ न भीष्मव्यसनं कश्चिद्दृष्ट्वा कर्णममन्य
त विशोकाश्चाभवन्सर्वे राजानः कुरुभिः सह १० हृष्टाश्च बहवो योधास्तत्राजल्पन्त संगताः नहि कर्णं रणे दृ
ष्ट्वा युधि स्थास्यन्ति पाण्डवाः ११ कर्णो हि समरे शक्तो जेतुं देवान्सवासवान् किमु पाण्डुसुतान्युद्धेति संयुगे हतवी
र्यपराक्रमान् १२ भीष्मेण तु रणे पार्थाः पालिता बाहुशालिना तांस्तु कर्णः शरैस्तीक्ष्णैर्नाशयिष्यति संयुगे
१३ एवं ब्रुवन्तस्तेन्योन्यं हृष्टरूपालितावाहुविशांपते राधेयं पूजयन्तश्च प्रशंसन्तश्च निर्ययुः १४ अस्माकं
मकरव्यूहो द्रोणेन विहितोऽभवत् परेषां क्रौंचव्यासीत्तु व्यूहो राजन्महात्मना १५ प्रीयमाणेन विहितो धर्म राम ६
राजेन भारत मुखं प्रमुखतस्तेषां तस्य तु पुरुषर्षभौ १६ वानरध्वजमुच्छ्रित्य विष्वक्सेनधनंजयौ ककुहं सर्वस
वैसैन्यानां धाम सर्वधनुष्मतां १७ आदित्यपथगः केतुः पार्थस्यामिततेजसः दीपयामास तत्सैन्यं पाण्डवस्य म

हात्मनः १८ यथा प्रज्वलितः सूर्यो युगान्ते वै वसुंधरां दीपयन्दृश्यते तिहितथा केतुः सर्वत्र धीमतः १९ योधानामर्जु
नः श्रेष्ठो गांडीवं धनुषां वरं वासुदेवश्च भूतानां चक्राणां च सुदर्शनं २० चत्वार्येतानि तेजांसि वहन्श्वेतहयो रथः
परेषामग्रतस्तस्थौ कालचक्रमिवोद्यतं २१ एवं तौ सुमहात्मानौ बलसेनाग्रगावुभौ तावकानां मुखे कर्णः प
रेषां च धनंजयः २२ ततो जाताभिसंरंभौ परस्परवधैषिणौ अवेक्षेतां तदान्योन्यं समरे कर्णपाण्डवौ २३ ततः प्र
याते सहसा भारद्वाजे महारथे आर्त्तनादेन घोरेण वसुधा समकंपत २४ ततस्तुमुलमाकाशमावृणोत्सहिवा
करं वातोद्धूतं रजस्तीव्रं कौशेयनिकरोपमं २५ ववर्ष द्यौरनभ्रापि मांसास्थिरुधिराण्युत गृध्राः श्येना बलाः कंका
वायसाश्च सहस्रशः २६ उपर्युपरि सेनां ते तदा पर्यपतन्नृप गोमायवश्च प्राक्रोशन्भयदान्दारुणान्रवा
न् २७ अकार्षुरपसव्यं च बहुशः पृतनां तव चिखादिषंतो मांसानि पिपासंतश्च शोणितं २८ अपतद्दीप्यमाना
च सनिर्घाता सकंपना उल्का ज्वलंती संग्रामे पुच्छेनावृत्य सर्वशः २९ परिवेषो महांश्चापि सविद्युत्स्तनयित्नु
मान् भास्करस्याभवद्राजन्प्रयाते वाहिनीपतौ ३० एते चान्ये च बहवः प्रादुरासन्सुदारुणाः उत्पाता युधि
वीराणां जीवितक्षयकारिणः ३१ ततः प्रववृते युद्धं परस्परवधैषिणां कुरुपाण्डवसैन्यानां शब्देनापूरयन्
जगत् ३२ ते त्वन्योन्यं सुसंरब्धाः पाण्डवाः कौरवैः सह अभ्यघ्नन्निशितैः शस्त्रैः जयगृध्राः प्रहारिणः
३३ स पाण्डवानां महतीं महेष्वासो महाद्युतिः वेगेनाभ्यद्रवत्संख्ये किरन्शरशतैः शितैः ३४ द्रोणमभ्युद्य

Indira Gandhi National Centre for the Arts

द्रोण० ७

तेद्दष्ट्वा पांडवाः सह सृंजयैः प्रत्यगृह्णंस्तदा राजन् शरवर्षैः पृथक्पृथक् ३५ विद्राव्यमाणा द्रोणेन भिद्यमाना
महाचमूः व्यशीर्यत सपांचाला वातेनेव बलाहकाः ३६ बहूनीह विकुर्वाणो दिव्यान्यस्त्राणि संयुगे अपी सवर
डयत्क्षणेनैव द्रोणः पांडवसृंजयान् ३७ ते वध्यमाना द्रोणेन वासवेनेव दानवाः पांचाल्याः समकंपंत धृष्टद्यु
म्नपुरोगमाः ३८ ततो दिव्यास्त्रविच्छूरो याज्ञसेनिर्महारथः अभिनच्छरवर्षेण द्रोणानीकमनेकधा ३९
द्रोणस्य शरवर्षाणि शरवर्षेण पार्षतः संनिवार्य ततः सर्वान् कुरूनप्यवधीद्बली ४० संयम्य तु ततो द्रोणः स
मवस्थाप्य चाहवे स्वमनीकं महेष्वासः पार्षतं समुपाद्रवत् ४१ स बाणवर्षं सुमहत्ससर्ज पार्षतं प्रति मघ
वान्समभिक्रुद्धः सहसा दानवेष्विव ४२ ते कंप्यमाना द्रोणेन बाणैः पांडवसृंजयाः पुनः पुनरभज्यंत सिंहे
नेवेतरे मृगाः ४३ तथा पर्यचरद्द्रोणः पांडवानां बलं बली अलातचक्रवद्राजंस्तदद्भुतमिवाभवत् ४४ खच
रनगरकल्पं कल्पितं शास्त्रदृष्ट्या चलदनिलपताकं ह्लादिनं वल्गिताश्वं स्फटिकविमलकेतुं त्रासनं शा
त्रवाणां रथवरमधिरूढः संजहारारिसेनां ४५ इति श्रीमहाभारते द्रोणपर्वणि युद्धे ७ संजय उवाच तथा राम
द्रोणमभिघ्नंतं साश्वसूतरथद्विपान् व्यथिताः पांडवा दृष्ट्वा न चैनं पर्यवारयन् १ ततो युधिष्ठिरो राजा धृष्ट ७
द्युम्नधनंजयौ अब्रवीत्सर्वतो यत्तैः कुंभयोनिर्निवार्यतां २ तत्रैनमर्जुनश्चैव पार्षतश्च सहानुगः पर्यगृ
ह्णंस्ततः सर्वे समापेतुर्महारथाः ३ केकया भीमसेनश्च सौभद्रोऽथ घटोत्कचः युधिष्ठिरो यमौ मत्स्या द्रु

पदस्यात्मजास्तथा ४ द्रौपदेयाश्च संहृष्टा धृष्टकेतुः ससात्यकिः चेकितानश्च संक्रुद्धो युयुत्सुश्च महारथः ५
यचान्ये पार्थिवा राजन् पांडवस्यानुयायिनः कुलवीर्यानुरूपाणि चक्रुः कर्माण्यनेकशः ६ संगृह्यमाणां तां दृ
ष्ट्वा पांडवैर्वाहिनीं रणे व्यावृत्य चक्षुषी कोपाद्भारद्वाजोऽन्ववैक्षत ७ स तीव्रं कोपमास्थाय रथे समरदुर्जयः
व्यधमत्पांडवानीकमभ्राणीव सदागतिः ८ रथानश्वान्नरान्नागानभिधावंस्ततस्ततः चचारोन्मत्तवद्द्रो
णो वृद्धोऽपि तरुणो यथा ९ तस्य शोणितदिग्धांगाः शोणास्ते वातरंहसः आजानेया हया राजन्विभ्रांताः श्रव
वपुः १० तमंतकमिव क्रुद्धमापतंतं यतव्रतं दृष्ट्वा संप्राद्रवन्योधाः पांडवस्य ततस्ततः ११ तेषां प्राद्रवतां
भीमः पुनरावर्त्ततामपि पश्यतां तिष्ठतां चासीच्छब्दः परमदारुणः १२ शूराणां हर्षजननो भीरूणां भयवर्द्ध
नः द्यावापृथिव्योर्विवरं पूरयामास सर्वतः १३ ततः पुनरपि द्रोणो नाम विश्रावयन्युधि अकरोद्रौद्रमात्मानं कि
रञ्छरशतैः शतैः शरान् १४ स तथा तिष्ठन्ननीकेषु पांडुपुत्रेषु मारिष कालवद्व्यचरद्द्रोणो युवेव स्थविरो बली १५
उत्कृत्य च शिरांस्युग्रान्बाहूनपि सुभूषणान् कृत्वा शून्यान्रथोपस्थानुदक्रोशन्महारवान् १६ तस्य
हर्षप्रणादेन बाणवेगेन चाभिभो प्राकंपत रणे योधा गावः शीतार्दिता इव १७ द्रोणस्य रथघोषेण मौर्वीनि
ष्पेषणेन च धनुःशब्देन चाकाशे शब्दः समभवन्महान् १८ यथास्य धनुषो बाणा निश्चरंतः सहस्रशः
व्याप्य सर्वा दिशः पेतुर्गजाश्वरथपत्तिषु १९ तं कार्मुकमहावेगमस्त्रज्वलितपावकं द्रोणमासादयांच

Indira Gandhi National
Centre for the Arts

द्रोण० क्रूः पांचालाः पांडवैः सह १० तान्समं कुंजरथस्याश्वान्प्राहिणोद्यमसादनं चक्रे चिराय द्रोणो महीं शोणित
८ कर्दमां ११ तन्वता परमास्त्राणि शरान्संततमस्यता द्रोणेन विहितं दिक्षु शरजालमदृश्यत १२ पदातिस्यं
नाश्वेषु रथेष्वपि च सर्वशः तस्य विद्युदिवाभ्रेषु चरन्केतुरदृश्यत १३ स केकयानां प्रवरांश्च पंच पंचालराजं च
शरैः प्रमथ्य युधिष्ठिरानीकमदीनसत्वो द्रोणोभ्ययात्कार्मुकबाणपाणिः १४ तं भीमसेनश्च धनंजयश्च
शिनेश्च नप्ता द्रुपदात्मजाश्च शैब्यात्मजः काशिपतिः शिबिश्च हृष्टा नदंतो व्यकिरंछरौघैः १५ तेषामथ द्रोण
धनुर्विमुक्ताः पतत्रिणः कांचनचित्रपुंखाः भित्वा शरीराणि गजाश्वयूनां जग्मुर्महीं शोणितदिग्धवाजाः
१६ सा योधसंघैश्च रथैश्च भूमिः शरैर्विभिन्नैर्गजवाजिभिश्च प्रच्छाद्यमाना पतितैर्बभूव समंततो द्यौरिव
कालमेघैः १७ शैनेयभीमार्जुनवाहिनीशान्सौभद्रपांचालसकाशिराजं अन्यांश्च वीरान्समरे प्रमृद्नन्द्रो
णः सुतानां तव भूतिकामः १८ एतानि चान्यानि च कौरवेंद्र कर्माणि कृत्वा समरे महात्मा प्रताप्य लोकानि
व कालसूर्यो द्रोणो गतः स्वर्गमितो हि राजन् १९ एवं रुक्मरथः शूरो हत्वा शतसहस्रशः पांडवानां र राम
णे योधान्पार्षतेन निपातितः २० अक्षौहिणीमभ्यधिकां शूराणामनिवर्तिनां निहत्य पश्चाद्धृतिमान् ८
अगच्छत्परमां गतिं २१ पांडवैः सह पांचालैरशिवैः क्रूरकर्मभिः हतो रुक्मरथो राजन्कृत्वा कर्म सुदुष्करं २२ त
तो निनादो भूतानामाकाशे समजायत सैन्यानां च ततो राजन्नाचार्ये निहते युधि २३ द्यां धरां खं दि

शो वापि प्रविशन्निवानुनादयन् अहो धिगिति भूतानां शब्दः समभवद्भृशं २४ देवताः पितरश्चैव पूर्वे ये चास्य बांध
वाः ददृशुर्निहतं तत्र भारद्वाजं महारथं २५ पांडवास्तु जयं लब्ध्वा सिंहनादान्प्रचक्रिरे सिंहनादेन महता सम
कंपत मेदिनी २६ इति श्रीमहाभारते द्रोणपर्वणि ८ धृतराष्ट्र उवाच किं कुर्वाणं रणे द्रोणं जघ्नुः पांडव
सृंजयाः तथा निपुणमस्त्रेषु सर्वशस्त्रभृतामपि १ रथभंगो बभूवास्य धनुर्वाशीर्यतास्यतः प्रमत्तो वा भवद्द्रो
णः ततो मृत्युमुपेयिवान् २ कथं नु पार्षतस्तात शत्रुभिर्दुष्प्रधर्षणं किरंतमिषुसंघातान्रुक्मपुंखाननेकशः
३ क्षिप्रहस्तं द्विजश्रेष्ठं कृतिनं चित्रयोधिनं दूरेषुपातिनं दांतमस्त्रयुद्धेषु पारगं ४ पांचालपुत्रो न्यवधीद्दि
ष्ट्यात्त्रिवरमच्युतं कुर्वाणं दारुणं कर्म रणे यत्तं महारथं व्यक्तं हि दैवं बलवत्पौरुषादिति मे मतिः यद्द्रोणो नि
हतः शूरः पार्षतेन महात्मना ६ अस्त्रं चतुर्विधं वीरे यस्मिन्नासीत्प्रतिष्ठितं तमिष्वस्त्रधराचार्यं द्रोणं शंससि
मे हतं ७ श्रुत्वा हतं रुक्मरथं वैयाघ्रपरिवारितं जातरूपपरिष्कारं नाद्य शोकमुपाददे ८ न नूनं परदुःखे
न म्रियते कोपि संजय यत्र द्रोणं महेष्वासं श्रुत्वा हतं जीवामि मंदधीः ९ दैवमेव परं मन्ये नन्वर्थं न हि पौरुषं य
त्र द्रोणं हतं श्रुत्वा हतो जीवामि मंदभाक् १० अश्मसारमयं नूनं हृदयं सुदृढं मम यच्छ्रुत्वा निहतं द्रोणं श
तधा न विदीर्यते ११ ब्राह्म्ये दैवे तथेष्वस्त्रे यमुपासन्गुणार्थिनः ब्राह्मणा राजपुत्राश्च स कथं मृत्युना हतः १२

द्रोणप० ९

शोषणं सागरस्येव मेरोरिव विसर्पणं पतनं भास्करस्येव न मृष्ये द्रोणपातनं १३ दुष्टानां प्रतिषेद्धासीद्धार्मिकानां च रक्षि-
ता योहासीत्कृपणस्यार्थे प्राणानपि परंतपः १४ मंदानां मम पुत्राणां जयाशा यस्य विक्रमे बृहस्पत्युशनस्तुल्यो
बुद्ध्या स निहतः कथं १५ ते च शोणा बृहंतोश्वाश्छन्ना जालैर्हिरण्मयैः रथे वातजवा युक्ताः सर्वशस्त्रातिगा र-
णे १६ बलिनो घोषिणो दांताः सैंधवाः साधुवाहिनः दृढाः संग्राममध्येषु कच्चिदासन्न विह्वलाः १७ करिणां
बृंहतां युद्धे शंखदुंदुभिनिःस्वने ज्याक्षेपशरवर्षाणां शस्त्राणां च सहिष्णवः १८ आशंसंतः परान् जेतुं जितश्वा-
सा जितव्यथाः हयाः पराजिताः शीघ्रा भारद्वाजरथोद्वहाः १९ ते स्म रुक्मरथे युक्ता नरवीरसमाहिताः कथं
नाभ्यतरंस्तात पांडवानामनीकिनीं २० जातरूपपरिष्कारमास्थाय रथमुत्तमं भारद्वाजः किमकरोच्छूरः सं-
क्रंदनो युधि २१ विद्यां यस्योपजीवंति सर्वलोकधनुर्धराः स सत्यसंधो बलवान् द्रोणः किमकरोद्युधि २२
दिवि शक्रमिव श्रेष्ठं महामात्रं धनुर्भृतां केनु तं रौद्रकर्माणं युद्धे प्रत्युद्ययू रथाः २३ ननु रुक्मरथं दृष्ट्वा प्र-
द्रवंति स्म पांडवाः दिव्यमस्त्रं विकुर्वाणं रणे तस्मिन्महाबलं २४ उताहो सर्वसैन्येन धर्मराजः सहानुजः
पांचाल्यप्रग्रहो द्रोणं सर्वतः समवारयत् २५ नूनमावारयत्पार्थो रथिनोन्यानजिह्मगैः ततो द्रोणं समारो-
हत्पार्षतः पापकर्मकृत् २६ न ह्यहं परिपश्यामि वधे कंचन शुष्मिणः धृष्टद्युम्नादृते रौद्रात्पाल्यमानात्कि-
रीटिना २७ तैर्वृतः सर्वतः शूरैः पांचाल्यापसदस्ततः केकयैश्चेदिकारूषैर्मत्स्यैरन्यैश्च भूमिपैः २८ व्या-

राम ९

कुलीकृतमाचार्यं पिपीलैरुरगं यथा कर्मण्यसुकरे सक्तं जघानेति मतिर्मम २९ योधीत्य चतुरो वेदान्सांगानाख्या-
नपंचमान् ब्राह्मणानां प्रतिष्ठासीत्स्रोतसामिव सागरः ३० क्षत्रं च ब्रह्म चैवेह योभ्यतिष्ठत्परंतपः स
कथं ब्राह्मणो वृद्धः शस्त्रेणावधमाप्तवान् ३१ अमर्षणो मर्षितवान्क्लिश्यमानः सदा मया अनर्हमाणः
कौंतेयान्कर्मणस्तस्य तत्फलं ३२ यस्य कर्मानुजीवंति लोके सर्वधनुर्भृतः स सत्यसंधः सुकृती श्रीकामै-
र्निहतः कथं ३३ दिवि शक्र इव श्रेष्ठो महासत्वो महाबलः स कथं निहतः पार्थैः क्षुद्रमत्स्यैर्यथा तिमिः ३४
क्षिप्रहस्तश्च बलवान्दृढधन्वारिमर्दनः न यस्य विजयाकांक्षी विषयं प्राप्य जीवति ३५ यं द्वौ न जह-
तः शब्दौ जीवमानं कदाचन ब्राह्मश्च वेदकामानां ज्याघोषश्च धनुष्मतां ३६ नाहीनं पुरुषव्याघ्रं ह्री-
मंतमपराजितं नाहं मृष्ये हतं द्रोणं सिंहद्विरदविक्रमं ३७ कथं संजय दुर्धर्षमनाधृष्ययशोबलं पश्य-
तां पुरुषेंद्राणां समरे पार्षतोवधीत् ३८ के पुरस्तादयुध्यंत रक्षंतो द्रोणमंतिकात् के नु पश्चादवर्तंत ग-
च्छतो दुर्गमां गतिं ३९ केरक्षन्दक्षिणं चक्रं सव्यं के च महात्मनः पुरस्तात्के च वीरस्य युध्यमानस्य संयु-
गे ४० के च तस्मिंस्तनुं त्यक्त्वा प्रतीपं मृत्युमाव्रजन् द्रोणस्य समरे वीराः के कुर्वंत परां गतिं ४१ कच्चि-
न्नैनं भयान्मंदाः क्षत्रिया व्यजहन्रणे रक्षितारस्ततः शून्ये कच्चिन्नैव हतः परैः ४२ न स पृष्ठमरेस्त्रा-
साद्रणे शौर्यात्प्रदर्शयेत् परामप्यापदं प्राप्य स कथं निहतः परैः एतदार्येण कर्तव्यं कृच्छ्रास्वापत्सु

Indira Gandhi National
Centre for the Arts

संजय पराक्रमे द्यथा शक्यानच्चतस्मिन्प्रतिषिते ४४ सुहृतेमेमनस्तानकथानावन्निवार्यते भयस्त्वलम्भसं
हृत्वापरिपृच्छामिसंजय ४५ इतिश्रीमहाभारतेद्रोणपर्वणि ९ वैशंपायनउवाच एतत्पृष्ट्वासूतपुत्रंहृच्छो
केनार्दितोभृशं जयेनिराशः पुत्राणां धृतराष्ट्रोपतत्क्षितौ १ तंविसंज्ञंनिपतितंसिषिचुः परिचारिकाः जलेनात्य
र्थशीतेनवीजंतः पुण्यगंधिना २ पतितंचैनमालोक्य समंताद्भरतस्त्रियः परिवव्रुर्महाराजमस्पृशंश्चैव
पाणिभिः ३ उत्थाप्यचैनंशनकैराजानंपृथिवीतलात् आसनंप्रापयामासुर्बाष्पकंठोवरानना ४ आस
नंप्राप्यराजातुमूर्छयाभिपरिप्लुतः निश्चेष्टोतिष्ठतत्तदावीज्यमानःसमंततः ५ सलब्ध्वाशनकैःसंज्ञांवेप
मानोमहीपतिः पुनर्गावल्गणिंसूतंपर्यपृच्छद्यथातथं ६ धृतराष्ट्रउवाच यःसउद्यन्निवादित्योज्योतिषा
प्रणुदंस्तमः अजातशत्रुमायांतंकस्तंद्रोणादवारयत् ७ प्रभिन्नमिवमातंगंयथाक्रुद्धंतरस्विनं प्रसन्न
वदनंदृष्ट्वाप्रतिद्विरदगामिनं ८ वासितासंगमेयद्वत्तनजय्यंप्रतियूथपैः निजघाननरवीरान्वी राम
रःपुरुषसत्तमः ९ योह्येकोहिमहावीर्यो निर्दहेद्घोरचक्षुषा कृत्स्नंदुर्योधनबलंधृतिमान्सत्यसंगरः १० १०
चक्षुर्हणंजयेप्सन्तमिष्वासधरमच्युतं दांतंबहुमतंलोके केशूराःपर्यवारयन् ११ केदुःप्रधर्षंराजान
मिष्वासधरमच्युतं समासेदुर्नरव्याघ्रंकौंतेयंतत्रमामकाः १२ तरसैवाभिपद्याथयोद्रोणमुपाद्रवत् यःवै१
करोतिमहत्कर्मशत्रूणांवैमहाबलः महाकायोमहोत्साहोनागायुतसमोबले तंभीमसेनमायांतंके

शूराःपर्यवारयन् १४ यदायाज्ज्वलदभ्राभोरथःपरमवीर्यवान् पर्जन्यइववीभत्सुस्तुमुलामशनीमि
व १५ विसृजञ्छरजालानिवर्षाणिमघवानिव अवस्फूर्जन्दिशःसर्वास्तलनेमिस्वनेनच १६ चाप
विद्युत्प्रभोघोरोरथगुल्मबलाहकः रथनेमिघोषस्तनितःशरशब्दातिबंधुरः १७ रोषनिर्जितजीमूतोमनो
भिप्रायशीघ्रगः मर्माभिगोबाणधारस्तुमुलःशोणितोदकः १८ संप्लावयन्दिशःसर्वामानवैरास्तर
न्महीं भीमनिस्वनितोरौद्रोदुर्योधनपुरोगमान् १९ युद्धेभ्यषिंचद्विजयोगार्ध्रपत्रैःशिलाशितैः गांडीवं
धारयन्धीमान्कीदृशंवोमनस्तदा २० इषुसंबाधमाकाशंकुर्वन्कपिवरध्वजः यदायात्कथमासी
त्तदापार्थंसमीक्ष्यता २१ कच्चिद्गांडीवशब्देनप्रणश्यत्तैवबलं यद्वःसभैरवंकुर्वन्नर्जुनोभृशमन्वया
त् २२ कच्चिन्नापानुदत्प्राणानिषुभिर्वोधनंजयः वातोवमेघान्हिवाविध्यन्मेघाष्ट्रशरगैर्नृपान् २३ कोहि
गांडीवधन्वानंरणेसोढुंनरोर्हति यमुपश्रुत्यसेनाग्रंसर्वोविदीर्यते २४ यत्सेनाःसमकंपंतयद्वीरानस्पृ ग्र
शद्भयं केतत्रनाजहुर्द्रोणंकेक्षुद्राःप्राद्रवन्भयात् २५ केवातत्रतनुंत्यक्त्वाप्रतीपंमृत्युमाव्रजन् अ
मानुषाणांजेतारंयुद्धेष्वपिधनंजयं २६ नचवेगासिताश्वस्यविसृष्टांश्चनिमामकाः गांडीवस्यचनिर्घोषं
प्रावृड्जलदनिस्वनं २७ विष्वक्सेनोयस्ययंतायस्ययोद्धाधनंजयः अशक्यःसरथोजेतुमन्येदेवासुरैरपि
२८ सुकुमारोयुवाशूरोदर्शनीयश्चपांडवः मेधावीनिपुणोधीमान्युधिसत्यपराक्रमः २९ आरावंवि

Indira Gandhi National
Centre for the Arts

द्रोण० ११

पुत्वंकुर्वन्बाधयन्सर्वसैनिकान् आपतंतंकुलेद्रोणंकेशूराःपर्यवारयन् ३० आशीविषइवक्रुद्धःस
र्पइवाभ्यद्यान् कदनंकरिष्यन्शत्रूणांजेतायुद्धेंजयोयुधि ३१ आर्यव्रतममोघेषुह्रीमंतमपराजि
तं सहदेवंतमायांतंकेशूराःपर्यवारयन् ३२ एकःसवीरराजस्यप्रमथ्यमहतींचमूं आहरन्महिषींभो
जकन्यांसर्वांपराजितां ३३ सत्यंधृतिश्चशौर्यंचब्रह्मचर्यंचकेवलं सर्वाणियुयुधानेस्मिन्निपुरुषर्षभे ३४
बलिनंसत्यकर्माणमदीनमपराजितं वासुदेवसमंयुद्धेवासुदेवादनंतरं धनंजयोपदेशेनश्रेष्ठमि
ष्वस्त्रकर्मणि पार्थेनसममस्त्रेषुकस्तंद्रोणादवारयत् ३६ वृष्णीनांप्रवरंवीरंसर्वधनुष्मतां रामेणस
ममस्त्रेषुयशसाविक्रमेणच ३७ सत्यंधृतिःशौर्यंब्राह्म्यंचास्त्रमनुत्तमं सात्वतेतानिसर्वाणित्रैलो
क्यमिवकेशवे ३८ तमेवंगुणसंपन्नंदुर्वारमपिदैवतैः समासाद्यमहेष्वासंकेशूराःपर्यवारयन् ३९
पांचालेषूत्तमंवीरमुत्तमाभिजनप्रियं ।नित्यमुत्तमकर्माणमुत्तमौजसमाहवे ४० युक्तंधनंजय
हितेममानर्थायमुत्थितं यमवैश्रवणादित्यमहेंद्रवरुणोपमं ४१ महारथंसमाख्यातंद्रोणायोद्य
तमाहवे त्यजंतंतुमुलेप्राणान्केशूराःसमवारयन् ४२ एकःपांडवेभ्यःपांडवान्यःसमाश्रि
तः धृष्टकेतुंतमायांतंद्रोणात्कस्तंन्यवारयत् ४३ यावधीत्केतुमान्वीरोराजपुत्रंदुरासदं अपरा
न्तगिरिद्वारेद्रोणात्कस्तंन्यवारयत् ४४ यस्मिन्नभ्यधिकावीरगुणाःसर्वधनंजयात् यस्मिन्नस्त्रा

राम ११

णिसत्यंचब्रह्मचर्यंचसर्वदा वासुदेवसमंवीर्येधनंजयसमंबले ४६ तेजसादित्यसदृशंबृहस्पतिसमंमतौ अभिमन्यु
महात्मानंव्यात्ताननमिवांतकं ४७ द्रोणायाभिमुखंयांतंकेशूराःसमवारयन् तरुणस्तरुणप्रज्ञःसौभद्रःपरवीरहा ४८ य
दाभ्यधावद्द्रोणंतदासीद्वोमनःकथं द्रौपदेयान्नरव्याघ्राःसमुद्रमिवसिंधवः ४९ यद्द्रोणमाद्रवन्संख्येकेशूरास्तानवारय
न् येतेद्वादशवर्षाणिक्रीडामुत्सृज्यबालकाः ५० अस्त्रार्थमवसन्भीष्मेबिभ्रतोव्रतमुत्तमं क्षत्रंजयःक्षत्रदेवःक्षत्रवर्मा
चमानदः धृष्टद्युम्नात्मजावीराःकेतान्द्रोणादवारयन् वार्ष्णेभिःकलिंगानांयःकन्यामाहरद्युधि ५१ अनाधृष्टिरदीना
त्माकस्तंद्रोणादवारयत् भ्रातरःपंचकैकेयाधार्मिकाःसत्यविक्रमाः ५३ इंद्रगोपकसंकाशारक्तवर्मायुधध्वजाः मातृष्वसुः
सुतावीराःपांडवानांजयार्थिनः ५४ तेद्रोणंहंतुमायातान्केवीराःपर्यवारयन् यंयोधयंतोराजानोनाजयन्वारणाव
ते ५५ षण्मासानपिसंरब्धाजिघांसंतोयुधांपतिं धनुष्मतांवरंशूरंसत्यसंधंमहाबलं ५६ द्रोणात्कस्तंनरव्याघ्रंयुयुत्सुंपर्य
वारयत् यःपुत्रंकाशिराजस्यवाराणस्यांमहारथं ५७ समरेस्त्रीषुगृध्यंतंभल्लेनापाहरद्रथात् धृष्टद्युम्नंमहेष्वासंपार्थानां
मंत्रधारिणं ५८ युक्तंदुर्योधनानर्थेसृष्टंद्रोणवधायच निर्दहंतंरणेयोधान्दारयंतंचसर्वतः ५९ द्रोणाभिमुख
मायांतंकेशूराःपर्यवारयन् उत्संगइवसंवृद्धंद्रुपदस्यास्त्रवित्तमं ६० शिखंडिनंशस्त्रगुप्तंकेचद्रोणादवारयन् य
इमांपृथिवींकृत्स्नांचर्मवत्समवेष्टयत् ६१ महतारथघोषेणमुख्यारिघ्नोमहारथः दशाश्वमेधानाजह्रेसमं
तोनामहद्भिर्याणान् ६२ निर्मलान्सप्रमेधांश्चपुत्रवत्पालयन्प्रजाः गंगास्रोतसियावत्यःसिकतास्त्वप्यशेषतः
दृढ तावतीर्गाददौवीरःउशीनरसुतोध्वरे नपूर्वेनापरेचक्रुःइदंकेचनमानवाः ६४ इतीदंचुक्रुशुर्देवाःकृतेकर्म

Indira Gandhi National
Centre for the Arts

द्रोणप्र०

गोदुष्करे प्रथमित्रिषुलोकेषुनतेमस्याक्षचारिषु ६५ जातेचापिजनिष्यंते द्वितीयंचापिसांप्रतं अन्यमौशीनराच्छैब्या
द्रुरीवोढारमितुत ६६ गांधीयस्त्रनयास्संतिमानुषाल्लोकवासिनः तस्यनप्राप्तमायांतेशोल्यकः समवारयत् द्रोणाया
भिमुखंयांतेस्याज्ञानलमिवांतकं विराटस्यरथानीकं मत्स्यस्यामित्रघातिनः ६८ प्रेक्षितं समरे द्रोणाके वीराः पर्य
वारयन् सद्योहकोहराज्जातोमहावलपराक्रमः ६९ मायावीराक्षसोवीरोयस्मान्ममहद्भयम् पार्थानंजय
कामंतेपुत्राणाममर्कटकं ७० घटोत्कचमहात्मानं कर्णस्तं द्रोणाह्वारयत् एतेचान्येचबहवोयेषामर्थायसंज
य ७१ त्यक्ताःसंयुगेप्राणानकिंतेषामजितंयुधि येषांचपुरुषव्याघ्रः शार्ङ्गधन्वाव्यपाश्रयः ७२ हितार्थीचापिपार्थानांक
थंतेषांपराजयः लोकानांगुरुरत्यर्थंलोकनाथः सनातनः ७३ नारायणोरणेनाथोदिव्योदिव्यात्मवान्प्रभुः यस्यदि
व्यानिकर्माणिप्रवदंतिमनीषिणः ७४ तान्यहंकीर्तयिष्यामिभक्त्यास्थैर्यार्थमात्मनः इतिद्रोणपर्वणिधृतराष्ट्रप्रश्नः धृतरा
ष्ट्रउवाच शृणुदिव्यानिकर्माणिवासुदेवस्यसंजय कृतवान्यानिगोविंदोयथानान्यः पुमान्क्वचित् ७६ संवर्द्धता
गोपकुलेवालेनैवमहात्मना विख्यापितंवलंवाह्वोस्त्रिषुलोकेषुसंजय ७७ उच्चैःश्रवस्तुल्यवलंवायुवेगस राम
मंजवे जघानहयराजंतंयमुनावनवासिनं ७८ दानवंघोरकर्माणंगवांमृत्युमिवोत्थितं वृषरूपधरंवाल्येभुजा १२
भ्यांनिजघानह ७९ प्रलंवंनरकंजंभंपीठंचापिमहासुरं मुरंचामरसंकाशमवधीत्पुष्करेक्षणः ८० तथाकंसो
महातेजाजरासंधेनपालितः विक्रमेणैवविक्रांतः समरेणः पातितोरणे ८१ सुनामाचाप्यमित्रघ्नः समग्राक्षौ
हिणीपतिः भोजराजस्यमध्यस्थोभ्राताकंसस्यवीर्यवान् ८२ वलदेवद्वितीयेनकृष्णेनामित्रघातिना सवलीस

मरेहयधःसरःसूरसोनमरह ८३ दुर्वासानामविप्रर्षिस्तथापरमकोपनः आराधितःसदारेणसचास्मैप्रददौवरान् ८४
तथागांधारराजस्यसुतांवीरःस्वयंवरे निर्जित्यपृथिवीपालानवहत्पुष्करेक्षणः ८५ अमृष्यमाणाराजानोयस्यजा
त्याहयाइव रथैर्वैवाहिकेयुक्ताःप्रतोदेनकृतव्रणाः ८६ जरासंधंमहावाहुमुपायेनजनार्दनः परेणघातयामाससम
स्ताक्षौहिणीपतिः ८७ चेदिराजंविक्रांतंराजसेनापतिंवली अर्थेविवदमानंचजघानपशुवत्तदा ८८ सौभंदैत्यपु
रंस्वस्थंशाल्वगुप्तंदुरासदं समुद्रकुक्षौविक्रम्यपातयामाससमाधवः ८९ अंगान्वंगान्कलिंगांश्चमागधान्काशिकोशलान्
९० वत्सगार्ग्यकरूषांश्चपुंड्रांश्चाप्यजयद्रणे आवंत्यान्दाक्षिणात्यांश्चपार्वतीयान्दशेरकान् काश्मीरकानौरसिकान्पि
शाचांश्चसमुद्गलान् ९१ कांबोजान्वाटधानांश्चचोलान्पांड्यांश्चसंजयान् त्रिगर्तान्मालवांश्चैवदरदांश्चसुदुर्जया
न् ९२ नानादिग्भ्यश्चसंप्राप्तान्राज्ञानश्चशकांस्तथा जितवान्पुंडरीकाक्षोयवनंचसहानुगं ९३ प्रविश्यसंयादोग
णनिषेवितं जिगायवरुणंसंख्येसलिलांतर्गतंपुरा ९४ युधिपंचजनंहत्वापातालतलवासिनं पांचजन्यंहृषीके
शोदिव्यंशंखमवाप्तवान् ९५ खांडवेपार्थसहितस्तोषयित्वाहुताशनं आग्नेयमस्त्रंदुर्धर्षंचक्रंलेभेमहावलः ९६
वैनतेयंसमारुह्यत्रासयित्वामरावतीं महेंद्रभवनाद्वीरःपारिजातमुपानयत् ९७ तच्चमर्षितवान्शक्रोजानंस्तस्य
पराक्रमं राज्ञोवापाजितंकिंचित्तत्कृष्णेनहनत्सुक्रमः ९८ यच्चतन्महदाश्चर्यंसभायांममसंजय कृतवान्पुंडरीका
क्षःकस्तदन्यःकर्तुमर्हति ९९ यच्चभक्त्याप्रसन्नोहमद्राक्षंकृष्णमीश्वरं तन्मेसुविहितंसर्वंप्रत्यक्षमिवचागमत् १००
नांतोविक्रमयुक्तस्यवुध्यायुक्तस्यवापुनः कर्मणांशक्यतेगंतुंहृषीकेशस्यसंजय १०१ तथागदश्चसांवश्चप्रद्युम्नो

Indira Gandhi National
Centre for the Arts

द्रो॰ण॰ पितृहा यः आगावहो निहतश्चारुदेष्णः समारणाः उल्मुको निशठश्चैव झिल्ली बभ्रुश्च वीर्यवान् पृथुश्च विपृथुश्चैव
शमीकोऽथारिमेजयः एतेन्ये बलवन्तश्च वृष्णिवीराः प्रहारिणः कथंचित्पाण्डवानीकं श्रयेयुः समरे स्थिताः १०४ आहूता
१२ वृष्णिवीरेण केशवेन महात्मना ततः संशयितं सर्वं भवेदिति मतिर्मम १०५ नागायुतबलो वीरः कैलासशिखरो
पमः वनमाली हली रामस्तत्र यत्र जनार्दनः यमाहुः सर्वपितरं वासुदेवं द्विजातयः अपि वा ह्येष पाण्डूनां योत्स्यतेऽर्था
य संजय १०७ ततो हा श्रातिसंयोधा भविता तत्र केशव न यदि सन्नकुरवः सर्वे जयेयुः सर्वपाण्डवान् तस्मै हितं १०८
यस्य यन्ता हृषीकेशो योद्धा यस्य धनंजयः रथस्य तस्य कः संख्ये प्रत्यनीको भवेद्रथः १०९ न केनचिद्धुपायेन कुरूणां
दृश्यते जयः तस्मान्मे सर्वमाचक्ष्व यथा युद्धमवर्तत ११० अर्जुनः केशवस्यात्मा कृष्णोप्यात्मा किरीटिनः अर्जुने
विजयो नित्यं कृष्णे कीर्तिश्च शाश्वती १११ सर्वेष्वपि च लोकेषु बीभत्सुरपराजितः प्राधान्येन हि भूयिष्ठममेयाः
केशवे गुणाः मोहाद्दुर्योधनः कृष्णं यो न वेत्तीह केशवं मोहितो दैवयोगेन मृत्युपाशपुरस्कृतः ११३ न वेद कृष्णं दा
शार्हमर्जुनं चैव पाण्डवं पूर्वदेवौ महात्मानौ नरनारायणावुभौ ११४ एकात्मानौ द्विधाभूतौ दृश्येते मानवैर्भु
वि मनसापि हि दुर्धर्षौ सेनामेतां यशस्विनौ ११५ नाशयेतामिहेच्छन्तौ मानुषत्वाच्च नेच्छतः युगस्येव विपर्यासो राम
लोकानामिव मोहनं ११६ भीष्मस्य च वधं श्रुत्वा द्रोणस्य च महात्मनः न हेयब्रह्मचर्य्यस्य न वेदाध्ययनेन १२
नच ११७ न क्रियाभिर्न चास्त्रेण मृत्युः कश्चिन्निवार्य्यते लोकसंभाविते वीरौ कृतास्त्रौ युद्धदुर्मदौ ११८ भी
ष्मद्रोणौ हतौ श्रुत्वा किं नु जीवामि संजय यां तां श्रियमसूयाम पुरा दृष्ट्वा युधिष्ठिरे ११९ अद्य तामनुमन्यामो

भीष्मद्रोणावधेनेह मन्त्रे चाप्यनुप्रामः कुरूणामेव संजयः १२० पक्वानां हि वधे सूत वज्रायन्ते तृणान्युत अनं
तमिदमैश्वर्य्यं लोके प्राप्नोति युधिष्ठिरः १२१ यस्य कोपान्महात्मानौ भीष्मद्रोणौ निपातितौ प्राप्तः प्रकृतितो धर्मो
न धर्म्मो मामकान्प्रति १२२ क्रूरः सर्वविनाशाय कालो नातिवर्त्तते अन्यथा चिंतिता ह्यर्था नरैस्तातमन
स्विभिः अन्यथैव प्रपद्यन्ते दैवादिति मतिर्मम तस्मादपरिहार्येस्मिन्संप्राप्ते कृच्छ्र उत्तमे १२४ अपारणीये दुश्चि
न्त्ये यथाभूतं प्रचक्ष्व मे १२५ इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां द्रोणपर्वणि धृतराष्ट्रप्र
श्नः संजय उवाच हन्त ते कथयिष्यामि सर्वं प्रत्यक्षदर्शिवान् यथा सैन्यपतिर्द्रोणः हितः पाण्डुसृंजयैः
१ सेनापतित्वं संप्राप्य भारद्वाजो महारथः मध्ये सर्वस्य सैन्यस्य पुत्रं ते वाक्यमब्रवीत् २ यत्कौरवाणा
मृषभादापगेयादनन्तरं सैनापत्येन यद्राजन्मामद्य कृतवानसि ३ सदृशं कर्मणस्तस्य फलं प्राप्नुहि भा
रत करोमि कामं कं तेऽद्य प्रवृणीष्व यदिच्छसि ४ ततो दुर्योधनो राजा कर्णदुःशासनादिभिः तमुवाच
दुराधर्षमाचार्यं जयतां वरं ५ ददासि चेद्वरं मह्यं जीवग्राहं युधिष्ठिरं गृहीत्वा रथिनां श्रेष्ठं मत्समीपमिहा
नय ६ ततः कुरूणामाचार्यः श्रुत्वा पुत्रस्य ते वचः सेनां प्रहर्षयन्सर्वामिदं वचनमब्रवीत् ७ धन्यः
कुन्तीसुतो राजा यस्य ग्रहणमिच्छसि न वधार्थं सुदुर्धर्ष वरमद्य प्रयाचसे ८ किमर्थं च नरव्याघ्र न वधं तस्य
कांक्षसे नाशंससि क्रियामेतां मत्तो दुर्योधन ध्रुवं ९ आहोस्वित् धर्मराजस्य द्वेष्टा तस्य न विद्यते यदिच्छ
सि त्वं जीवन्तं कुलं रक्षसि चात्मनः १० अथवा भरतश्रेष्ठ निर्जित्य युधि पाण्डवान् राज्यं संप्रतिदत्वा च सौ

Indira Gandhi National
Centre for the Arts

द्रो णे

त्वा त्वं कर्तुमिच्छसि ॥ धन्यः कुन्तीसुतो राजा सुजातं चास्य धीमतः । अजातशत्रुता सत्या तस्य यत्स्निह्य-
ते भवान् ॥ द्रोणेनैवमुक्तस्तु तव पुत्रस्य भारत । सहसा निःसृतो भावो योऽस्य नित्यं हृदि स्थितः ॥ १३ नाका-
रो गूहितुं शक्यो बृहस्पतिसमैरपि । तस्मात्तव सुतो राजन् प्रहृष्टो वाक्यमब्रवीत् ॥ १४ वधे कुन्तीसुतस्याजौ ना-
चार्य विजयो मम । हते युधिष्ठिरे पार्थो हन्यात्सर्वान्नहि नो ध्रुवं ॥ १५ न च शक्यास्ततो सर्वे निहन्तुममरैरपि ।
यद्येक एव शेषः स्यात्स एवास्मानशेषयेत् ॥ १६ सत्यप्रतिज्ञे त्वानीते पुनर्द्यूते विनिर्जिते । पुनर्यास्य-
न्त्यरण्याय पाण्डवास्तमनुव्रताः ॥ १७ सोऽयं मम जयो व्यक्तं दीर्घकालं भविष्यति । अतो न वधमिच्छामि धर्मरा-
जस्य कर्हिचित् ॥ १८ तस्य जिह्ममभिप्रायं ज्ञात्वा द्रोणोऽर्थतत्त्ववित् । तं वरं सान्तरं तस्मै ददौ संचिन्त्य बुद्धिमा-
न् ॥ १९ द्रोण उवाच । न चेद्युधिष्ठिरं वीरः पालयत्यर्जुनो युधि । मन्यस्व पाण्डवश्रेष्ठमानीतं वशमात्मनः ॥ २० नहि
शक्यो रणे पार्थः सेन्द्रैर्देवासुरैरपि । प्रत्युद्यातुमतस्तात नैतदामर्षयाम्यहं ॥ २१ स चापक्राम्यतां युद्धाद्येनोपायेन श-
क्यते । अपनीते ततः पार्थे धर्मराजो जितस्त्वया ॥ २२ ग्रहणे विजयस्तस्य न वधे पुरुषर्षभ । एतेन वाप्युपा-
येन मुहूर्तमपि मेऽग्रतः ॥ २३ अपनीते नरव्याघ्रे कुन्तीपुत्रे धनंजये । फाल्गुनस्य समीपे तु नहि शक्यो युधिष्ठि- राम
रः ॥ २४ ग्रहीतुं समरे राजन् सेन्द्रैरपि सुरासुरैः । संजय उवाच । सान्तरं तु प्रतिज्ञाते राज्ञो द्रोणेन निग्रहे ॥ २५
गृहीतं तममन्यन्त तव पुत्राः सुबालिशाः । पाण्डवेयेषु सापेक्षं द्रोणं जानाति ते सुतः ॥ २६ ततः प्रतिज्ञास्थै-
र्यार्थं स मन्त्रो बहुलीकृतः । ततो दुर्योधनेनापि ग्रहणं पाण्डवस्य तु ॥ २७ सैन्यस्थानेषु सर्वेषु सुघोषितमरिंद-

म ॥ २८ इति श्रीमहाभारते द्रोणपर्वणि युधिष्ठिरग्रहणमन्त्रः ॥ संजय उवाच । ततस्ते सैनिकाः श्रुत्वा तं युधि-
ष्ठिरविग्रहं । सिंहनादरवांश्चक्रुर्बाणशङ्खरवैः सह ॥ १ तत्तु सर्वं यथान्यायं धर्मराजेन भारत । आप्तेनाशु परि-
ज्ञातं भारद्वाजचिकीर्षितं ॥ २ ततः सर्वान् समानाय्य भ्रातॄनन्यांश्च सर्वशः । अब्रवीद्धर्मराजस्तु धनंजयमिदं
वचः ॥ ३ श्रुतं ते पुरुषव्याघ्र द्रोणस्याद्य चिकीर्षितं । यथा तन्न भवेत्सत्यं तथा नीतिर्विधीयतां ॥ सान्तरं हि प्रतिज्ञातं द्रो-
णेनामित्रकर्शन ॥ ४ तच्चान्तरं महेष्वास त्वयि तेन समाहितं । स त्वमद्य महाबाहो युध्यस्व मदनन्तरं ॥ ५ य-
था दुर्योधनः कामं नेमं द्रोणादवाप्नुयात् । अर्जुन उवाच । यथा मे न वधः कार्य आचार्यस्य कदाचन ॥ ६
तथा तव परित्यागो न मे राजंश्चिकीर्षितः । अप्येवं पाण्डव प्राणानुत्सृजेयमहं युधि ॥ ७ प्रतीयां नाहमाचार्यं
त्वां च जह्यां कथंचन । त्वां निगृह्याहवे राजन् धार्तराष्ट्रोऽयमिच्छति ॥ ८ न स तं जीवलोकेऽस्मिन् कामं प्राप्तः कथंच-
त न प्रपतेद्द्यौः सनक्षत्रा पृथिवी शकलीभवेत् । न त्वां प्राप्स्यति ॥ ९ न त्वां द्रोणो निगृह्णीयाज्जीवमाने मयि ध्रु-
वं । यदि तस्य रणे साह्यं कुरुते वज्रभृत्स्वयं ॥ १० विष्णुर्वा सहितो देवैर्न त्वां प्राप्स्यत्यसौ मृधे । मयि जीवति
राजेन्द्र न भयं कर्तुमर्हसि ॥ ११ द्रोणादस्त्रभृतां श्रेष्ठात्सर्वशस्त्रभृतामपि । अन्यच्च ब्रूयां राजेन्द्र प्रतिज्ञा
मम नित्यदा ॥ १२ न स्मराम्यनृतां वाचं न स्मरामि पराजयं । न स्मरामि प्रतिश्रुत्य किंचिदप्यनृतं कृतं ॥ संजय
उवाच । ततः शङ्खाश्च भेर्यश्च मृदङ्गाश्चानकैः सह । प्रावाद्यन्त महाराज पाण्डवानां निवेशने ॥ १४ सिंहनादश्च
संजज्ञे पाण्डवानां महात्मनां । धनुर्ज्यातलशब्दश्च गगनस्पृक् सुभैरवः ॥ १५ तं श्रुत्वा शङ्खनिर्घोषं पाण्डवस्य

Indira Gandhi National Centre for the Arts

द्रो॰ ण॰
१५

तहौजसः त्वदीयेष्वनीकेषु वाहित्राणमिज्झिरे ततो व्यूढान्यनीकानि तत्र तेषां च भारत पांडुरूपेपुरन्योन्य
योत्स्यमान्यानि संयुगे १७ ततः प्रववृते युद्धं तुमुलं लोमहर्षणं पांडवानां कुरूणां च द्रोणस्य पांचाल्ययोरपि
१८ यतमानाः प्रयत्नेन द्रोणानीकविशातने नशेकुः सृंजया युद्धे तद्धि द्रोणेन पालितं १९ थैव तव पुत्रान रा
स्य योधाः प्रहारिणः नशेकुः पांडवीं सेनां पाल्यमानां किरीटिना २० आस्तां ते स्तिमिते सेने मानाप
रस्परं संप्रसुप्ते यथा नक्तं वनराज्यौ सुपुष्पिते २१ ततो रुक्मरथो राजन्नर्केणेव विराजता वरूथिना विनिष्प
त्य व्यचरत्पृतनामुखे २२ तमुद्यतं रथेनैकमाशुकारिणमाहवे अनेकमिव संत्रासान्मेनिरे पांडुसृंजयाः
२३ तेन मुक्ताः शरा घोरा विचेरुः सर्वतो दिशं त्रासयंतो महाराज पांडवस्य वाहिनीं २४ मध्यंदिनम
नुप्राप्तो गभस्तिशतसंवृतः यथा दृश्येत घर्मांशुस्तथा द्रोणोप्यदृश्यत २५ न चैनं पांडवेयानां कश्चिच्छ
क्तो विभारत वीक्षितुं समरे क्रुद्धं महेंद्रमिव दानवाः २६ मोहयित्वा ततः सैन्यं भारद्वाजः प्रतापवान् धृ
ष्टद्युम्नबलं तूर्णं व्यधमन्निशितैः शरैः २७ स दिशः सर्वतो रुध्वा संवृत्य खमजिह्मगैः पार्षतो यत्र तत्रैव ममृदे
पांडुवाहिनीं २८ इति श्रीमहाभारते द्रोणपर्वणि प्रथमेहनि सेनाविमर्दः संजय उवाच ततः स पांडवानाम
नीके व्यचरत्सुमहद्भयं व्यचरत्पृतनां द्रोणो दहन्कक्षमिवानलः १ निर्दहंतमनीकानि साक्षादग्निमि
मिवोत्थितं दृष्ट्वा रुक्मरथं क्रुद्धं समकंपंत सृंजया २ सततं कृष्यतः संख्ये धनुषोस्याशुकारिणः ज्याघोषः १५
शुश्रुवेत्यर्थं विस्फूर्जितमिवाशनेः ३ रथिनः सादिनश्चैव नागानश्वान्पदातिनः रौद्रा हस्तवता मुक्ताः

संमर्दंति स्म सायकाः ४ नानद्यमानः पर्जन्यः प्रवृद्धः शुचिसंक्षये अश्मवर्षमिवावर्षत्परेषामावहद्भयं ५ वि
चरन्स तदा राजन्सेनां संक्षोभयन्प्रभुः वर्धयामास संत्रासं शत्रूणाममानुषं ६ तस्य विद्युदिवाभ्रेषु चापं हेम
परिष्कृतं भ्रमद्दृश्यताम्बुदे तस्मिन्दृश्यते स्म पुनः पुनः ७ स वीरः सत्यवान्प्राज्ञो धर्मनित्यः सदा पुनः युगांतका
लेम क्रुद्धो रौद्रां प्रावर्तयन्नदीं ८ अमर्षवेगप्रभवां क्रव्यादगणसंकुलां बलौघैः सर्वतः पूर्णां वीरवृक्षापहारि
णीं ९ शोणितोदां रथावर्तां हस्त्यश्वकृतरोधसं कवचोत्पलसंयुक्तां मांसपंकसमाकुलां मेदोमज्जास्थिसिक
तामुष्णीषचयकेशालां १० संग्रामजलदापूर्णां प्रासमत्स्यसमाकुलां नरनागाश्वसंभग्नां शरवेगौघवाहि
नीं शरीरदारुसंघट्टां रथकच्छपसंकुलां उत्तमांगोपलतलां निस्त्रिंशझषसंकुलां ११ रथनागह्रदोपेतां नाना
भरणभूषितां महारथशतावर्तां भूमिरेणूर्मिमालिनीं १२ महावीर्यवतां सेव्यां सुमहाभीरुदुस्तरां
शरीरशतसंबाधां गृध्रकंकनिषेवितां १४ निहतान्प्राणिनः सर्वान्द्रोणेन बलिना रणे वहंतीं पितृ
लोकाय शतशो राजसत्तम १५ शरीरशतसंबाधां केशशैवलशाद्वलां नदीं प्रावर्तयद्राजन्भीरूणां भयवर्धि
नीं १६ तं जयंतमनीकानि तानि तान्येव भारत सर्वतोभ्यद्रवन्द्रोणं युधिष्ठिरपुरोगमाः १७ तानभिद्र
वतः शूरांस्तावकाः दृढधन्विनः सर्वतः प्रत्यगृह्णंत तदभूल्लोमहर्षणं १८ शतमायस्तु शकुनिः सहदेवं समा
द्रवत् सनियंतृध्वजरथं विव्याध निशितैः शरैः १९ तस्य माद्रीसुतः केतुं धनुः सूतं हयानपि नातिक्रुद्धः शरैः
छित्वा षष्ट्या विव्याध सौबलं २० बलस्तु गदां गृह्य अवप्लुत्य रथोत्तमात् सूतस्याग्र्यं हयात्राजन्रथात्सुतमपा

Indira Gandhi National Centre for the Arts

द्रोण० १६

तपनतनस्तौ विरथौ माजन्मा हाहस्तौ महाबलौ चित्रौ चित्ररथौ शूरौ संग्रामविजयवतौ ३१ द्रुपदः पांचालराजा च विव्या
दशभिराशुगैः वृद्धक्षेमेन चाभ्यस्तं विव्याध ततो ऽधिकैः विविंशतिं भीमसेनो विंशत्या निशितैः शरैः अविद्धा काकं
पयद्वीत्तदद्भुतमिवाभवत् ३३ विविंशतिस्तु सहसा साश्वकेतुशरासनं भीमं चक्रे महाराज ततः सैन्यान्यपूज
यन् मन्त्रमम्बषवीरः शत्रौर्विक्रामसमाहेव ततो ऽस्य गा हयाहीतान् हयान् सर्वानपातयत् ३५ हताश्वात्ते
रथादाप्लुत्य गृह्य चर्म महाबलः आस्थाय द्वीमसेनस्तु मत्तो मत्तमिव द्विपं ३६ शल्यस्तु नकुलं वीरः स्वस्रीयं प्रि ने
यमात्मनः विव्याध प्रहसन् चापे लालयन् कोपयन्निव ३७ तस्याश्वानातपत्रं च ध्वजं सूतमथो धनुः निपात्य प
नकुलः संख्ये शंखं दध्मौ प्रतापवान् धृष्टकेतुः कृपेणास्तान् छित्वा बहुविधान् शरान् कृपं विव्याध सप्तत्या लक्ष्म
वाक्याहरत्त्रिभिः ३९ तं कृपः शरवर्षेण महता समवारयत् विव्याध च रणे विप्रो धृष्टकेतुममर्षयत् ४० सा
त्यकिः कृतवर्माणं नाराचेन स्तनान्तरे विद्ध्वा विव्याध सप्तत्या पुनरन्यैः स्मयन्निव ४१ तं भोजः सप्तसप्तत्या
विद्ध्वाशु निशितैः शरैः नाकंपयत शैनेयं शीघ्रो वायुरिवाचलं ४२ सेनापतिः सुशर्माणं भृशं मर्मस्वता
डयत् स चापि तं तोमरेणाजत्रुदेशे ऽभ्यताडयत् ४३ वैकर्तनं तु समरे विराटः समवारयत् सहमत्स्यैर्महा राम १८
वीर्यैस्तदद्भुतमिवाभवत् ४४ भगदत्तस्तु राजानं द्रुपदं नतपर्वभिः सन्नियंतृध्वजरथं विव्याध पुरुषर्षभः ४५
द्रुपदस्तु ततः क्रुद्धो भगदत्तं महारथं आजघानोरसि क्षिप्रं शरेणानतपर्वणा ४६ युद्धं बलवतो लोके सोम
दत्तिशिखण्डिनो भूतानां त्रासजननं चक्रातेस्त्रविशारदौ ४७ भूरिश्रवा रणे राजन् याज्ञसेनिं महारथं

महता सायकौघेन छादयामास वीर्यवान् ४८ शिखंडी तु ततः क्रुद्धः सौमदत्तिं विशांपते नवत्या सायकानां
नुकंपयामास भारत ४९ राक्षसौ भीमकर्माणौ हैडिंबालंबुषावुभौ चक्राते ऽत्यद्भुतं युद्धं परस्परजयैषिणौ ५० चे
कितानो ऽनुविंदेन युयुधे चातिभैरवं यथा देवासुरे युद्धे वलिशक्रौ महाबलौ लक्ष्मणः क्षत्रदेवेन विमर्दमकरोद्भृ ५१
शं यथा विष्णुः पुरा राजन् हिरण्याक्षेण संयुगे ५२ ततः प्रचलिताश्वेन विधिवत्कल्पितेन च रथेनाभ्यपतद्राज
न् सौभद्रं पौरवो नदन् ५३ ततो ऽभियाय त्वरितो युद्धाकांक्षी महाबलः तेन चक्रे महद्युद्धमभिमन्युररिंदम ५४
पौरवस्त्वथ सौभद्रं शरव्रातैरवाकिरत् तस्यार्जुनिर्ध्वजं छत्रं धनुश्चोर्व्यामपातयत् ५५ सौभद्रः पौरवं त्वन्यैर्विद्ध्वा स
प्तभिराशुगैः पंचभिस्तस्य विव्याध हयान् सूतं च सायकैः ५६ ततः प्रहर्षयन् सेनां सिंहवद्विनदन्मुहुः समाद
त्तार्जुनिस्तूर्णं पौरवांतकरं शरं तं तु संधितमाज्ञाय सायकं घोरदर्शनं ५७ द्वाभ्यां शराभ्यां हार्दिक्यश्चिच्छेद सशरं
धनुः तदुत्सृज्य धनुश्छिन्नं सौभद्रः परवीरहा उद्ववर्ह सितं खड्गमाददे ... स तेनानेकतारेण चर्मणा शारस
कृतहस्तवान् भ्रांतासिश्चरन्मार्गान् दर्शयन्वीर्यमात्मनः भ्रामितं पुनरुद्भ्रान्तमाधुतं पुनरुत्थितं ६० चर्म
निस्त्रिंशयोर्भर्तुर्न विशेषमदृश्यत स पौरवरथस्येषामाप्लुत्य सहसा नदन् ६१ पौरवं रथमास्थाय केशपक्षे
परामृशत् जघानास्य पदा सूतमसिनापातयद्ध्वजं ६२ विक्षोभ्यांभोनिधिं तार्क्ष्यस्तं नागमिव चाक्षिपत् तम
माकलितकेशांतं ददृशुः सर्वपार्थिवाः ६३ उक्षाणमिव सिंहेन पात्यमानमचेतनं तमार्जुनिवशं प्राप्तं कृष्यमा
णमनाथवत् ६४ पौरवं पतितं दृष्ट्वा नामृष्यत जयद्रथः सर्वहिंसाम् महाराज किंकिणीशतजालवत् ६५

Indira Gandhi National Centre for the Arts

द्रोणा०
८

चर्म चाहारवद्धं च नहन्नुपर्यपतद्रथात् ततः सैंधवमालोक्य कार्ष्णिरुत्सृज्य पौरुषं ६६ उत्पपात तथा तूर्णं श्येन
वन्निपपात च प्रासानिस्त्रिंशान्शत्रुभिः संप्रचोदितान् ६७ छिंदन्चासिना कांश्चिच्चर्मणा संरुरोध च
स दर्शयित्वा सैन्यानां स्ववाहुबलमात्मनः ६८ तमुद्यम्य महाखड्गं चर्म चाथ पुनर्बली वृद्धक्षत्रस्य द
याद्दं पितुरत्यंतवैरिणं ६९ ससाराभिमुखः शूरः शार्दूल इव कुंजरं तौ परस्परमासाद्य खड्गदंतनखायुधौ
७० हृष्टवत्संप्रजहाते व्याघ्रकेसरिणाविव संपातेष्वभिघातेषु निपातेष्वसिचर्मणोः ७१ न तयोरंतरं क
श्चिद्ददर्श नरसिंहयोः अवक्षेपोसिनिर्ह्रादः शस्त्रांतरनिदर्शने ७२ वाह्यांतरनिपाते च निर्विशेष
मदृश्यत वाह्यमाभ्यंतरं चैव चरंतौ मार्गमुत्तमं ७३ ददृशाते महात्मानौ सपक्षाविव पर्वतौ ततो विक्षि
पतः खड्गं सौभद्रस्य यशस्विनः ७३ शरावरणपक्षांते प्रजहार जयद्रथः रुक्मपक्षांतरे सक्तः तस्मिंश्चर्मणि
भास्वरे ७४ सिंधुराजबलोद्धूतः सोभज्यत महानसिः भग्नमाज्ञाय निस्त्रिंशमवप्लुत्य पदानि षट् राम
७५ अदृश्यत निमेषेण स्वरथं पुनरास्थितः सहितास्सर्वराजानः परिवव्रुः समंततः ७६ ततश्च ८
र्म च खड्गं च समुत्क्षिप्य महाबलः ननादार्जुनदायादः प्रेक्षमाणो जयद्रथं ७७ सिंधुराजं परित्यज्य सौभ
द्रः परवीरहा तापयामास तत्सैन्यं भुवनं भास्करो यथा ७८ तस्य सर्वायसीं शक्तिं शल्यः कनकभूष
णां चिक्षेप समरे घोरां दीप्तामग्निशिखामिव ७९ तामवप्लुत्य जग्राह सविकोशं चाकरोदसिं
वैनतेयो यथा कार्ष्णिः पतंतमुरगोत्तमं ८० तस्य लाघवमाज्ञाय सत्वं चामिततेजसः सहिताः

सर्वराजानः सिंहनादमथानदन् ८१ ततस्तामेव शल्यस्य सौभद्रः परवीरहा मुमोच भुजवीर्येण वैदूर्यविकृ
ताजिनीं सा तस्य रथमासाद्य निर्मुक्तभुजगोपमा ८२ जघान सूतं शल्यस्य रथाच्चैनमपातयत् ततो विरा
टद्रुपदौ धृष्टकेतुर्युधिष्ठिरः ८३ सात्यकिः केकया भीमो धृष्टद्युम्नशिखंडिनौ यमौ च द्रौपदेयाश्च साधु
साध्विति चुक्रुशुः ८४ वाणशब्दाश्च विविधाः सिंहनादाश्च पुष्कलाः प्रादुरासन्हर्षयंतः सौभद्रमपलायि
ने ८५ तन्नामृष्यंत पुत्रास्ते शत्रोर्विजयलक्षणं अथैनं सहसा सर्वे समंतान्निशितैः शरैः ८६ अभ्यकि
रन्महाराज जलदा इव पर्वतं तेषां च प्रियमन्विच्छन्सूतस्य च पराभवं ८७ आर्तायनिरमित्रघ्नः क्रुद्धः सौभद्रम
भ्ययात् ८८ इति श्रीमहाभारते द्रोणपर्वणि प्रथमेहनि धृतराष्ट्र उवाच बहूनि सुविचित्राणि द्वंद्वयु
द्धानि संजय त्वयोक्तानि निशम्याहं स्पृहयामि सचक्षुषां १ आश्चर्यभूतं लोकेषु कथयिष्यंति मानवाः कु
रूणां पांडवानां च युद्धं देवासुरोपमं २ न हि मे तृप्तिरस्तीह शृण्वतो युद्धमुत्तमं तस्मादार्तायनेर्युद्धं सौभद्रस्य
च शंस मे ३ संजय उवाच सादितं प्रेक्ष्य यंतारं शल्यः सर्वायसीं गदां समुत्क्षिप्य नदन्क्रुद्धः प्रचस्कंद रथोत्त
मात् ४ तं दीप्तमिव कालाग्निं दंडहस्तमिवांतकं जवेनाभ्यपतद्भीमः प्रगृह्य महतीं गदां ५ सौभद्रोप्यश
निप्रख्यां प्रगृह्य महतीं गदां एह्येहीत्यब्रवीच्छल्यं यत्नाद्भीमेन वारितः ६ वारयित्वा तु सौभद्रं भीमसेनः प्रता
पवान् शल्यमासाद्य समरे तस्थौ गिरिरिवाचलः ७ तथैव मद्रराजोपि भीमं दृष्ट्वा महाबलं ससाराभिमुखस्तूर्णं

Indira Gandhi National
Centre for the Arts

द्रोण० १८

शार्दूलइव कुंजरं ८ ततस्तूर्यनिनादाश्च शंखानां च सहस्रशः सिंहनादश्च संजज्ञे भेरीणां च महास्वनः
९ पश्यतां शतशो ह्यासीदन्योन्यमभिधावतोः पांडवानां कुरूणां च साधु साध्विति निस्वनः १० नहि मद्राधिपादन्यः
सर्वराजसु भारत सोढुमुत्सहते वेगं भीमसेनस्य संयुगे ११ तथा मद्राधिपस्यापि गदावेगं महात्मनः सोढुमुत्सह
ते लोके यो धिको न्यो वृकोदरात् १२ पट्टैर्जांबूनदैर्बद्धा बभूव जनहर्षिणी प्रजज्वाल तदाविद्धा भीमेन महती
गदा १३ तथैव चरतो मार्गान्मंडलानि च सर्वशः महाविद्युत्प्रतीकाशा शल्यस्य शुशुभे गदा १४ तौ वृषा
विव नर्दंतौ मंडलानि विचेरतुः आवर्जितगदाशृंगावुभौ शल्यवृकोदरौ १५ मंडलावर्तमार्गेषु गदाविहरणेषु
च निर्विशेषमभूद्युद्धं तयोः पुरुषसिंहयोः १६ ताडिता भीमसेनेन शल्यस्य महती गदा साग्निज्वाला महोग्रा से
ताद्दाच्चूर्णमशीर्यत १७ तथैव भीमसेनेन द्विषताभिहता गदा वर्षप्रदोषे खद्योतैर्वृतो वृक्ष इवाबभौ १८ ग
दा क्षिप्ता तु समरे मद्रराजेन भारत व्योम संदीपयमाना सा ससृजे पावकं मुहुः तथैव भीमसेनेन द्विषते प्रेषिता गदा
तापयामास तत्सैन्यं महोल्कापतनी यथा २० ते गदे गदिनां श्रेष्ठौ समासाद्य परस्परं ततो गदाभ्यामिहतौ क्रोधेन राम
रुधि श्वसंत्यौ नागकन्येव ससृजाते विभावसुं २१ नखैरिव महाव्याघ्रौ दंतैरिव महागजौ तौ विचेरतुरासाद्य गदाग्र्या १८
भ्यां परस्परं २२ ततो गदाग्राभिहतौ क्षणेन रुधिरोक्षितौ ददृशाते महात्मानौ पुष्पिताविव किंशुकौ २३ शुश्रु
वे दिक्षु सर्वासु गदाभिघातसमाहतः नाके पातनहाभासो भिद्यमाना न चाचलः २४ तस्य भीमगदावेगैस्ताड्य

मानो महाबलः धैर्यान्मद्राधिपस्तस्थौ वज्रैर्गिरिरिवाहतः २५ आपतत्सु महावेगौ समुच्छ्रितमहागदौ पुनरंत
रमार्गस्थौ मंडलानि विचेरतुः २६ अथाभ्येत्य पदान्यष्टौ संनिपत्य गजाविव सहसा लोहदंडाभ्यामन्योन्यमभिज
घ्नतुः २७ तौ परस्परवेगाच्च गदाभ्यां च भृशाहतौ युगपत्पेततुर्वीरावुभाविंद्रध्वजाविव २८ ततो विह्वलमानं तं निः
श्वसंतं पुनः पुनः शल्यमभ्यपतत्तूर्णं कृतवर्मा महारथः २९ दृष्ट्वा चैनं महाराज गदयाभिनिपीडितं विचेष्टंतं य
था नागं मूर्छयाभिपरिप्लुतं ३० ततः सगदमारोप्य मद्राणामधिपं रथे अपोवाह रणात्तूर्णं कृतवर्मा महारथः
३१ क्षीबवद्विह्वलो वीरो निमेषात्पुनरुत्थितः भीमोपि सुमहाबाहुर्गदापाणिरदृश्यत ३२ ततो मद्राधिपं दृष्ट्वा
तव पुत्राः पराङ्मुखं सनागपत्त्यश्वरथाः समकंपंत मारिष ३३ ते पांडवैरर्द्यमानास्तावका जितकाशिभिः
भीता दिशो व्यपद्यंत वातनुन्ना घना इव ३४ निर्जित्य धार्तराष्ट्रांस्तु पांडवेया महारथाः व्यरोचंत रणे राजन् दीप्यमा
ना इवाग्नयः ३५ सिंहनादान्भृशं चक्रुः शंखान्दध्मुश्च हर्षिताः भेरीश्च वादयामासुर्मृदंगांश्चानकैः सह ३६
इति श्रीमहाभारते द्रोणपर्वणि प्रथमेऽहनि शल्यपराजयः संजय उवाच तद्बलं सुमहद्दीर्णं त्वदीयं प्रेक्ष्य वीर्य
वान् दधारैको रणे राजन्वृषसेनोऽस्त्रमायया १ शरा दश दिशो मुक्ता वृषसेनेन संयुगे विचेरुस्ते विनिर्भिद्य नरवाजि
रथद्विपाः २ तस्य दीप्ता महाबाणा विनिश्चेरुः सहस्रशः भानोरिव महाराज घर्मकाले मरीचयः ३ तेनार्दि
ता महाराज रथिनः सादिनस्तथा निपेतुरुर्व्यां सहसा वातभग्ना इव द्रुमाः ४ हयौघांश्च रथौघांश्च गजौघां
श्च महारथः अपातयद्रणे राजन् शतशोथ सहस्रशः ५ दृष्ट्वा तमेकं समरे विचरंतमभीतवत् संहिताः सर्व

Indira Gandhi National
Centre for the Arts

द्रोण० १७

राजानः पर्यवृत्तः समंततः ६ तान् कुलिंगकपातालीको हृषसेनं सम्प्रयात् विव्याध चैनं दशभिर्निशातैर्मैर्हिहि
७ तस्य कर्णोत्तमजश्चापं छित्वा केतुमपातयत् तेऽत्रातेरपरिप्सन्तो द्रोपदेयाः समभ्ययुः ८ कर्णात्मजं पारत्रातैः
स्वक्रस्वा दश्यमजस्रातातान्हेतो भ्यधावं द्रौणपुत्रमुखारथाः ९ छादयंतो महाराज द्रोपदेयान्महाहवान् श
स्त्रैर्नानाविधैस्तूर्णं पर्वतान् जलदा इव १० तान्पौत्रवाः प्रत्यगृह्णन् त्वरिताः पुत्रगृध्निनः पंचालाः केकया
मत्स्याः सृंजयाश्चोद्यतायुधाः ११ तद्युद्धमभवद्घोरं सुमहल्लोमहर्षणं त्वदीयैः पांडुपुत्राणां देवानामिव दा
नवैः १२ एवमुत्तमयुधिरे वीराः संरब्धाः कुरुपांडवाः परस्परमुदीक्षंतः परस्परकृतागसः १३ तेषां ददृशिरे को
पाद्वपूंषि मित ते ज्जसो युयुत्सुना मिथ्या का प्रापतत्रवरस्मेभिनो १४ भीमकर्णाकृष्टाद्वौ शिशिपार्षतस्यात के
पा द्वपूंषि ... मह्या बलानां क्माभ्रमे रणे दृश्याः कालासूर्यैरिवो हिते १६ तदासीत्तुमुलं युद्धं निघ्नतामितरेतरं महाबलानां
बलिभिः दानवानां यथा सुरैः १७ ततो युधिष्ठिरानीकमुद्धृतार्णवनिस्वनं त्वदीयमवधीत्सैन्यं संप्र
द्रुतमहारथं १८ तद्यत्नं बलेह द्वाशत्रुभिर्भृशमर्दितं अलं द्रुतेन वः शूरा इति द्रोणोऽभ्यभाष
त १९ ततः शोणहयः क्रुद्धश्चतुर्दंत इव द्विपः प्रविश्य पांडवानीकं युधिष्ठिरमुपाद्रवत् २० तमवि
ध्यच्छितैर्बाणैः कंकपत्रैर्युधिष्ठिरः तस्य द्रोणो धनुश्छित्वा तद्द्रुतं समुपाद्रवत् २१ चक्ररक्षः कुमारस्तु
पांचाल्यानां यशस्करः दधार द्रोणमायांतं वेलेव सरितांपतिं २२ द्रोणं निवारितं दृष्ट्वा कुमारेण द्विजर्षभं
सिंहनादरवो ह्यासीत् साधु साध्विति भाषतां कुमारस्तु ततो द्रोणं सायकेन महाहवे २३ विव्याधोरसि ... द्रोण १९

मे क्रुद्धः सिंहवच्चानदन्मुहुः संवार्य तु रणे द्रोणं कुमारस्तु महाबलः २४ शरैरनेकसाहस्रैः कृतहस्तो जितक्लमः
तं शूरमार्यव्रतिनं मंत्रास्त्रेषु कृतश्रमं २५ चक्ररक्षं परामृद्नात्कुमारं द्विजपुंगवः स मध्यं प्राप्य सेनायाः सर्वाः प्रविचरन् दिशः २६ तव सैन्यस्य गोप्तासीद्भार
द्वाजो द्विजर्षभः शिखंडिनं द्वादशभिर्विंशत्या चोत्तमौजसं नकुलं पंचभिर्विद्ध्वा सहदेवं च सप्तभि
:
युधिष्ठिरं द्वादशभिः द्रौपदेयांस्त्रिभिस्त्रिभिः २८ सात्यकिं पंचभिर्विद्ध्वा मत्स्यं च दशभिः शरैः
व्यक्षोभयद्रणे योधान् यथामुख्यमभिद्रवत् २९ अभ्यवर्तत संप्रेप्सुः कुंतीपुत्रं युधिष्ठिरं युगंधरस्ततो राजन् भारद्वाजं महारथं ३० वारयामास संक्रुद्धं वातोद्धूतमिवार्णवं युधिष्ठिरं स विद्ध्वा तु शरैः स
न्नतपर्वभिः युगंधरं तु भल्लेन रथनीडादपातयत् ततो विराटद्रुपदौ केकयाः सात्यकिः शिबिः व्याघ्रदत्तश्च पांचाल्यः
सिंहसेनश्च वीर्यवान् एते चान्ये च बहवः परीप्संतो युधिष्ठिरं आवव्रुस्तस्य पंथानं किरंतः सायकान्बहून् व्याघ्रद
त्तश्च पांचाल्यो द्रोणं विव्याध मार्गणैः पंचाशता शितै राजन्नुच्चुक्रुशुर्जनाः त्वरितं सिंहसेनस्तु द्रोणं विद्ध्वा म
हारथं प्राहसत्सहसा हृष्टः त्रासयन्वै महारथान् ततो विस्फार्य नयने धनुर्ज्यामवमृज्य च तलशब्दं महत्कृत्वा
द्रोणस्तं समुपाद्रवत् ततस्तु सिंहसेनस्य शिरः कायात्सकुंडलं व्याघ्रदत्तस्य चाक्रम्य भल्लाभ्यामाहरद्बली राजन्
युधिष्ठिरबले हतो राजेति पार्थानां समीपस्थोऽपतद्व्रते अब्रुवंस्ते तदा कालं दृष्ट्वा द्रोणस्य विक्रमं अद्य राजा धार्तराष्ट्रस्य सेयुगोऽ
द्यः हताद्यो वै भविष्यति अस्मिन्मुहूर्ते द्रोणात्तु पांडवं संप्रहर्षितः आगमिष्यति नो नूनं धार्तराष्ट्रस्य संयुगे

द्रोण० २०

वृसंजल्पतांतेषांतावकानांमहारथः आपाञ्चैवेतकौंतेयोरथघोषेणनादयन् माभैरितिचसंभाष्यभीमसेनमवारयत्
शोणितोदांरजोवर्तांकृत्वाविसमतेजसा शूरास्थिचयसंकीर्णांश्रोतःकलापहारिणीं तीर्णःशोघमहाफेनांप्रासम
त्स्यसमाकुलां नदीमुत्तीर्य्यवेगेनकुरून् विद्राव्यपाण्डवः ततःकिरीटीसहसाद्रोणानीकमुपाससौ त्स्यसमाकुलां
नदीमुत्तीर्य्यवेगेनकुरून् विद्राव्यपाण्डवः ततःकिरीटीसहसाद्रोणानीकमुपाद्रवत् छादयन्निषुजालेनम
हतामोघमस्त्रिव शास्त्रमभ्यसतोबाणान् संदधानस्यकार्मुकं नान्तरंददृशेकश्चित्कौन्तेयस्ययशस्विनः नदि
शोनान्तरिक्षंचनद्यौर्नैवचमेदिनी अदृश्यतमहाराजबाणभूतमिवाभवत् नादृश्यततदाराजन्तत्रकिंचन
संयुगेबाणांधकारेमहतिकृतेगाण्डीवधन्वना सूर्येचास्तमनुप्राप्तेतमसाचाभिसंवृते नाज्ञायतततदाशत्रुर्न
सुहृन्नचकश्चन ततोवहारंचक्रुस्तेद्रोणदुर्योधनादयः तान्विदित्वाभृशंत्रस्तानयुद्धमनसःपरान् स्वान्यनीका
निबीभत्सुःशनकैरवहारयत् ततोभितुष्टुवुःपार्थंप्रहृष्टाःपाण्डुसृंजयाः पांचालाश्चमनोज्ञाभिर्वाग्भिःसूर्यमि
वर्षयः एवंस्वशिबिरंप्रायाज्जित्वाशत्रून्धनंजयः पृष्ठतःसर्वसैन्यानांमुदितोवैसकेशवः मसारगल्वर्कसु
वर्णरूप्यैर्वज्रप्रवालस्फटिकैश्चमुख्यैः चित्रेरथेपांडुसुतोवभासेनक्षत्रमध्येवियतीवचंद्रः॥ ॥इति
श्रीमहाभारतेद्रोणपर्वणिप्रथमदिनयुद्धं संजयउवाच तेसेनेशिबिरंगत्वान्यविशन्विशांपते यथाभागं राम
यथाभागंयथान्यायंयथागुल्मंचसर्वशः कृत्वावहारंसैन्यानांद्रोणःपरमदुर्मनाः दुर्योधनमभिप्रेक्ष्यसव्रीड स२ २०
मिदमब्रवीत् उक्तमेतन्मयापूर्वंनतिष्ठतिधनंजये शक्योनहीतुंसंग्रामेदेवैरपियुधिष्ठिरः इतितद्वःप्रयततां

ऋतेपार्थेनसंयुगे माविशंकौरवश्चोमस्थमजेयोहस्यपाण्डवौ कश्चिद्दहृत्पतंसंख्येद्रोणमन्तंप्रकर्षतु तमजित्वातकौन्तेया नवर्त्तेत
कथंचन एकस्मिन्नन्तरेऽन्यस्मिन्धर्मराजमहंनृप ग्रहीष्यामिचमूंभित्वाधृष्टद्युम्नस्यपश्यतः अर्जुनेनविहीनस्तुयदिनोत्सृजतेर
णं मामुपायान्तमालोक्यगृहीतंविद्धिपाण्डव एवंतेहंमहाराजधर्मपुत्रंयुधिष्ठिरं समानेष्यामिसगणंवशमद्यनसंशयः यदितिष्ठति
संग्रामेमुहूर्त्तमपिपाण्डवः अथापयातिसंग्रामाद्विसं संजयउवाच द्रोणस्यतद्वचःश्रुत्वात्रिगर्त्ताधिपतिस्तदा भ्रातृभिःसहितोराज
न्निदंवचनमब्रवीत् वयंविनिकृताराजन् क्रोधाग्निनात्यमानानशेमहिसदानिशि सनोदिष्ट्यास्त्रसंपन्नश्चक्षुर्विषयमा
गतः कर्त्तारःस्मवयंकर्मयच्चिकीर्षामहृद्गतं भवतश्चप्रियंयत्स्यादस्माकंचयशस्करं वयमेनंहनिष्यामोनिःकृष्यायोधनाद्बहिः
अद्यास्त्वनर्जुनाभूमिरत्रिगर्त्ताथवापुनः सत्यंतेप्रतिजानीमोनैतन्मिथ्याभविष्यति एवंसत्यरथश्चोक्तासत्यधर्माचभारत
सत्यव्रतश्चसत्येषुःसत्यकर्मातथैवच सहिताःभ्रातरःपञ्चरथानामयुतेनच न्यवर्त्तन्तमहाराजकृत्वाशपथमाहवे
मालवास्तुण्डिकेराश्चरथानामयुतैस्त्रिभिः सुशर्माचनरव्याघ्रस्त्रिगर्त्तःप्रस्थलाधिपः मावेल्लकैर्ललित्थैश्चसहितोमद्र
कैरपिरथानामयुतेनैवसोऽशपद्भ्रातृभिःसह नानाजनपदेभ्यश्चरथानामयुतेनच समुत्थितंविशिष्टानांशपथार्थमुपाग
मत् ततोज्वलनमाहृत्यहुत्वासर्वेपृथक्पृथक् जगृहुःकुशचीराणिचित्राणिकवचानिच तेचबद्धतनुत्राणाः घृताक्ताः
कुशचीरिणः मौर्वीमेखलिनोवीराःसहस्रशतदक्षिणाः यज्वानःपुत्रिणोलोक्याःकृतकृत्यास्तनुत्यजः योक्ष्यमाणास्तदात्मा
नंयशसाविजयेनच ब्रह्मचर्यश्रुतिमुखैःक्रतुभिश्चाप्तदक्षिणैः प्राप्यलोकान्सुयुद्धेनक्षिप्रमेवयियासवः ब्राह्मणांस्तर्प
यित्वाचनिष्कान्दत्वापृथक्पृथक् गाश्चवासांसिचपुनःसमाभाष्यपरस्परं प्रज्वाल्यकृष्णवर्त्मानमुपागम्यरणेव्रतं तस्मि
न्नग्नौतदाचक्रुःप्रतिज्ञांदृढनिश्चयाः शृण्वतांसर्वभूतानामुच्चैर्वाचोबभाषिरे सर्वेधनंजयवधप्रतिज्ञांचापिचक्रिरे येवैलो

Indira Gandhi National
Centre for the Arts

द्रोणा०
२१

कायघ्नतिनां ये चैव ब्रह्मघातिनां मद्यपस्य च ये लोका गुरुदाररतस्य च ब्रह्मस्वहारिणश्चैव राजपिण्डापहारिणः शरणागतं
वहिच त्यजतो याचमानं तथा घ्नतः आगारदाहिनां ये च ये च गां निघ्नतामपि अपकारिणां च ये लोका ये च ब्रह्मद्विषामपि
स्वभार्यामृतुकालेषु ये मोहादभिगच्छतां श्राद्धे मैथुनिकानां च ये चाप्यात्मापहारिणां न्यासापहारिणां ये च श्रुतं नाशयतां
शपतां च ये क्लीबं युध्यमानानां ये च नीचानुसारिणां नास्तिकानां च ये लोका येऽग्निमातृपितृत्यजां दुष्कृतां चैव ये लोका
ये च पापकृतामपि यद्यहत्वा वयं युद्धे निवर्त्तेम धनंजयं तेनाभ्यर्दितास्त्रासाद्भवेम हि पराङ्मुखाः यदि त्वसुकरं लोके कर्म
कुर्याम संयुगे इष्टान्लोकान्प्राप्नुयामो वयमद्य न संशयः एवमुक्त्वा महाराज न्यवर्त्तन्त संयुगे आह्वयन्तोऽर्जुनं वीराः पितृजु
ष्टां दिशं प्रति आहूतस्तेन रव्याघ्रैः पार्थः परपुरंजयः धर्मराजमिदं वाक्यमपदान्तरमब्रवीत् आहूतो न निवर्त्तेयमिति
मे व्रतमाहितं संशप्तकाश्च मां राजन्नाह्वयन्ते महामृधे एष च भ्रातृभिः सार्द्धं सुशर्माह्वयते रणे वधाय सगणस्यास्य मामनु
ज्ञातुमर्हसि नैतच्छक्नोमि संसोढुमाह्वानं पुरुषर्षभ सत्यं ते प्रतिजानामि हतान्विद्धि परान्युधि युधिष्ठिर उवाच श्रु
तं तेन तत्त्वतस्तात यद्द्रोणोऽस्य चिकीर्षितं यथा तदनृतं तस्य भवेत्तत्त्वं समाचर द्रोणो हि बलवाञ्छूरः कृतास्त्रश्च जित
श्रमः प्रतिज्ञातं च तेनैतद्ग्रहणं मे महारथ अर्जुन उवाच अयं वै सत्यजिद्राजन्नद्य त्वां रक्षिता युधि जीवमाने च पाञ्चाल्ये
नाचार्यः काममाप्स्यति हते तु पुरुषव्याघ्रे रणे सत्यजिति प्रभो सर्वैरपि समेतैर्वा न स्थातव्यं कथंचन संजय उवाच राम
अनुज्ञातस्ततो राज्ञा परिष्वक्तश्च फाल्गुनः प्रेम्णा दृष्टश्च बहुधा ह्याशिषश्चास्य योजिताः विहायैनं ततः पार्थस्त्रि २१
गर्त्तान्प्रत्यपाद्बली क्षुधितः क्षुद्विघातार्थी सिंहो मृगगणानिव ततो दौर्योधनं सैन्यं मुदा परमया युतं ऋतेऽर्जुनं भृशं क्रु
द्धो धर्मराजस्य निग्रहे ततोऽन्योन्ये ते सैन्ये समाजग्मतुरोजसा गंगासरय्वोर्वेगेन प्रावृषीवोल्बणोदके इति श्रीमहाभारते द्रो

णपर्वणि द्वितेयिहति संजय उवाच ततः संशप्तका राजन्समे देशे व्यवस्थिताः व्यूह्यानीकं रथैरेव चन्द्राकारं मुदा युताः
ताः ते किरीटिनमायान्तं दृष्ट्वा हर्षेण मारिष उदक्रोशन्नरव्याघ्राः शब्देन महता तदा स शब्दः प्रदिशः सर्वा दिशः खं च समा
वृणोत् आवृतत्वाच्च लोकस्य नासीत्तत्र प्रतिस्वनः सोऽतीव संप्रहृष्टांस्तानुपलभ्य धनंजयः किंचिदभ्युत्स्मयन्कृष्णमि
दं वचनमब्रवीत् पश्यैतान्देवकीमातर्मुमूर्षूनद्य संयुगे भ्रातॄंस्त्रैगर्त्तकानेव रोदितव्ये प्रहर्षितान् अथवा हर्षकालोऽयं त्रै
गर्त्तानामसंशयं कुनरैर्दुरवापान्हि लोकान्प्राप्स्यन्त्यनुत्तमान् एवमुक्त्वा महाबाहुर्हृषीकेशं ततोऽर्जुनः आससाद र
णे व्यूढां त्रिगर्त्तानामनीकिनीं स देवदत्तमादाय शंखं हेमपरिष्कृतं दध्मौ वेगेन महता घोषेणापूरयन्दिशः तेन शब्दे
न वित्रस्ता संशप्तकवरूथिनी निश्चेष्टावस्थिता संख्ये अश्मसारमयी यथा वाहास्तेषां विवृत्ताक्षाः स्तब्धकर्णशिरोधराः
विष्टब्धचरणाश्चैव रुधिरं प्रसुस्रुवुः उपलभ्य ततः संज्ञामवस्थाप्य च वाहिनीं युगपत्पाण्डुपुत्राय चिक्षिपुः
कंकपत्रिणः तान्यर्जुनः सहस्राणि दशपंचैव चाशुगैः अनागतान्यशोभञ्छिच्छेदाशुपराक्रमः ततोऽर्जुनं शितैर्बा
णैर्दशभिर्दशभिः पुनः प्रत्यविध्यंस्ततः पार्थस्तान्विव्याध त्रिभिस्त्रिभिः एकैकस्तु ततः पार्थं राजन्विव्याध
पंचभिः स च तान्प्रतिविव्याध द्वाभ्यां द्वाभ्यां पराक्रमी भूय एव तु संक्रुद्धास्तेऽर्जुनं सहकेशवं आपूरयन्शरैस्तीक्ष्णै
स्तडागमिव वृष्टिभिः ततः शरसहस्राणि प्रापतन्नर्जुनं प्रति भ्रमराणामिव व्राताः फुल्लं द्रुमगणं वने ततः सुबा
हुस्त्रिंशद्भिरद्रिसारमयैः शरैः अविध्यदिषुभिर्गाढं किरीटे सव्यसाचिनं तैः किरीटी किरीटस्थैर्हेमपुंखैरजिह्मगैः शा
तकुम्भमयापीडो बभौ यूप इवोच्छ्रितः हस्तावापं सुबाहोस्तु भल्लेन युधि पाण्डवः चिच्छेद तं चैव पुनः शरवर्षैरवाकिरत्

Indira Gandhi National
Centre for the Arts

द्रोण० ११ ततः सुशर्मा दशभिः सुरथस्त्व किरीटिनं सुधर्मा सुधनुश्चैव सुबाहुश्च समार्दयत् तांस्तु सर्वान् रथव्याघ्रो वीतरथ प्रवरध्वजः प्रत्यविध्यद्
जांश्चैव भल्लैश्चिच्छेद सायकान् सुधन्वनो धनुश्छित्वा हयान्वास्यावधीच्छरैः अथास्य सशिरस्त्राणं शिरः कायादपातयत् तस्मि
न्निपातिते वीरे त्रस्तास्तस्य पदानुगाः अद्रवंत भयाद्भीता यत्र दौर्योधनं बलं ततो जघान संक्रुद्धो वासविस्तां महाचमूं शरजालैरवि
च्छिन्नैस्तमः सूर्य इवांशुभिः ततो भग्ने बले तस्मिन् विप्रलीने समंततः सव्यसाचिनि संक्रुद्धे त्रैगर्तान्भयमाविशत् ते वध्यमानाः
पार्थेन शरैः सन्नतपर्वभिः अमुह्यंस्तत्र तत्रैव त्रस्ता मृगगणा इव ततस्त्रिगर्तराट् क्रुद्धस्तानुवाच महारथान् अलं द्रुतेन
वः शूरा न भयं कर्तुमर्हथ कृत्वा च शपथान्घोरान् सर्वसैन्यस्य पश्यतः गत्वा दौर्योधनं सैन्यं किं वै वक्ष्यथ मुख्यशः नावहा
स्याः कथं लोके कर्मणानेन संयुगे भवेम सहिताः सर्वे निवर्तध्वं यथाबलं एवमुक्तास्तु ते राजन्नन्योन्यं शूरसंहताः
शंखान्दध्मुरभिक्रुद्धा हर्षयंतः परस्परं ततस्ते संन्यवर्तंत संशप्तकगणाः पुनः नारायणाश्च गोपालाः कृत्वा मृत्युं निवर्तनम्
इति श्रीमहाभारते द्रोणपर्वणि द्वितीयेऽहनि संशप्तकवधे संजय उवाच ताल्लिवृत्तान्समालोक्य संशप्तकगणान्पुनः वासुदे
वं महात्मानमर्जुनः समभाषत चोदयाश्वान् हृषीकेश संशप्तकगणान्प्रति नैते हास्यंति संग्रामे जीवंत इति मे मतिः
पश्य मेऽस्त्रबलं घोरं बाह्वोरिष्वसनस्य च अद्यैतान्पातयिष्यामि क्रुद्धो रुद्रः पशूनिव ततः कृष्णः स्मितं कृत्वा परिनंद्य रा
शिवेन तं प्रावेशयत दुर्धर्षो यत्र यत्रैच्छदर्जुनः बभ्राजे स रथोऽत्यर्थमुह्यमानो रणे तदा उह्यमानमिवाकाशे विमानं पांडुरैर्ह ११
यैः मंडलानि ततश्चक्रे गतप्रत्यागतानि च यथा शक्ररथो राजन् युद्धे देवासुरे पुरा अथ नारायणाः क्रुद्धा विविधायुधपा
णयः छादयंतः शरव्रातैः परिवव्रुर्धनंजयं अदृश्यं च मुहूर्तेन चक्रुस्ते पुरुषर्षभ कृष्णेन सहितं युद्धे कुंतीपुत्रं धनंज

यं क्रुद्धस्तु फाल्गुनः संख्ये द्विगुणीकृतविक्रमः गांडीवमुपसंमृज्य तूर्णं जग्राह संयुगे बध्वा च भृकुटिं वक्त्रे क्रोधस्य प्रतिल
क्षणं देवदत्तं महाशंखं पूरयामास पांडवः अथास्त्रमरिसंघघ्नं त्वाष्ट्रमभ्यस्यदर्जुनः ततो रूपसहस्राणि प्रादुरासन्पृथक् पृ
थक् आत्मनः प्रतिरूपैस्ते नानारूपैर्विमोहिताः अन्योन्यमर्जुनं मत्वा स्वमात्मानं च जघ्निरे अयमर्जुनोऽयं गोविंद इमौ माध
वपांडवौ इति ब्रुवाणाः संमूढा जघ्नुरन्योन्यमाहवे मोहिताः परमास्त्रेण क्षयं जग्मुः परस्परं अशोभंत रणे योधाः पुष्पिता
इव किंशुकाः ततः शरसहस्राणि तैर्विमुक्तानि भस्मसात् कृत्वा तदस्त्रं तान्वीरान्निन्ये यमसादनं अथ प्रहस्य बीभत्सु
र्ललित्थान्मालवानपि मावेल्लकांस्त्रिगर्तांश्च यौधेयांश्चार्दयच्छरैः ते हन्यमाना वीरेण क्षत्रियाः कालचोदिताः व्यसृ
जञ्छरजालानि पार्थे नानाविधानि च ततो नैवार्जुनस्तत्र न रथो न च केशवः प्रत्यदृश्यंत घोरेण शरवर्षेण संवृताः
ततस्ते लब्धलक्ष्यत्वादन्योन्यमभिचुक्रुशुः हतौ कृष्णाविति प्रीता वासांस्यादुधुवुस्तदा भेरीमृदंगशंखांश्च दध्मुर्वीराः सह
स्रशः सिंहनादरवांश्चोग्रांश्चक्रिरे तत्र मारिष ततः प्रसिस्विदे कृष्णः खिन्नश्चार्जुनमब्रवीत् क्वासि पार्थ न पश्ये त्वां क
च्चिज्जीवसि शत्रुहन् तस्य तद्भाषितं श्रुत्वा त्वरमाणो धनंजयः वायव्यास्त्रेण तैरस्तां शर
वृष्टिमपाहरत् ततः संशप्तकव्रातान् साश्वद्विपरथायुधान् उवाह भगवान्वायुः शुष्कपर्णचयानिव उह्यमानास्ते
ते राजन् बह्वशोभंत वायुना उड्डीनाः पक्षिणः काले वृक्षेभ्य इव मारिष तांस्तथा व्याकुलीकृत्य त्वरमाणो धनंज
यः जघान निशितैर्बाणैः सहस्राणि शतानि च शिरांसि भल्लैरहरद्बाहूनपि च सायुधान् हस्तिहस्तोपमांश्चो
रून् क्षुरैरुर्व्यामपातयत् पृष्ठच्छिन्नान्विचरणान्बाहुपार्श्वविहीनकान् नानागात्रावयवैर्हीनांश्चकाराथ धनंजयः

द्रोण० गंधर्वनगराकारं विधिवत्कल्पितान्रथान् शरैर्विशकलीकुर्वन् घ्नन्केव्यश्वरथद्विपान् सुगंधतालवनानीव
१३ तवकान्व्यचकाशिरे छिन्नारथान्व्रजन्नाता केचित्तत्र क्वचित्क्वचित् सांतरा युधि ते नागाः सपताकांकुशध्वजाः पेतुः
शक्राशनिहताः द्रुमवंतइवाचलाः चामरापीडकवचाः स्तत्तत्र तपतांस्तथा मारोहास्तुरगाः पेतुः पार्थबाणहताः
क्षितौ विप्रविद्धासितरवराः छिन्नवर्मर्ष्टिकाः शवरश्चसुमहज्जाते शांतरुधिरवृष्टिभिः मही चाप्यभवद्राजक
बंधशतसंकुला तद्भैरोध्वीभत्समभवत्तोज्जतिमाहवे आक्रीडमिव रुद्रस्य घ्नतः कालात्ययेपशून् तेवध्यमा
नाः पार्थेन व्याकुलाश्वरथद्विपाः तमेवाभिमुखाः क्षीणाः शक्रस्यातिथितां गताः सा भूमिर्भरतश्रेष्ठ निहतैस्तै
र्महारथैः आस्तीर्णा संबभौ सर्वा प्रेतीभूतैः समंततः एतस्मिन्नंतरे चैव प्रमुक्ते सव्यसाचिनि व्यूढानीकस्ततो
द्रोणो युधिष्ठिरमुपाद्रवत् तं प्रत्यगृह्णंस्त्वरिता व्यूढानीकाः प्रहारिणः युधिष्ठिरपरीप्संतस्तदासीत्तुमुलं महत् इ
ति श्री महाभारते द्रोणपर्वणि पर्वणि द्वितीयेऽहनि संसप्तकवधे संजय उवाच परिणाम्य निशां तां तु भारद्वाजो म
हारथः बहूक्त्वा सततो राजन् वचनं तेवेमुपोषतं निशापोणोगपार्थेन संसप्तकयोः सह निष्क्रांते बलहापा
र्थे संसप्तकवधं प्रति व्यूढानीकस्ततो द्रोणः पांडवानां महाचमूं अभ्ययाद्भरतश्रेष्ठ धर्मराजजिघृक्षया व्यू राम
हं दृष्ट्वा सुपर्णं तु भारद्वाजकृतं तदा व्यूहेन मंडलार्धेन प्रत्यव्यूहद्युधिष्ठिरः मुखमासीत्सुपर्णस्य भारद्वाजो महार १३
थः शिरो दुर्योधनो राजा सोदर्यैः सानुगैर्वृतः चक्षुषी कृतवर्मा च गौतमश्चास्यतां वरः भूतशर्मा क्षेमशर्मा करकाक्ष
श्च वीर्यवान् कलिंगाः सिंहलाः प्राच्याः शूराभीरा दशेरकाः शकायवनकांबोजाः तथा हंसपथाश्च ये ग्रीवायां

श्रूरसेनाश्च दरदा मद्रकेकयाः गजाश्वरथपत्त्योघास्तस्थुः परमदंशिताः भूरिश्रवास्तथा शल्यः सोमदत्तश्च बाह्लिकः अक्षौहिण्या वृ
ता वीरा दक्षिणं पार्श्वमास्थिताः विंदानुविंदावावंत्यौ कांबोजश्च सुदक्षिणः वामपार्श्वं समाश्रित्य द्रोणपुत्राग्रतः स्थिताः पृष्ठे
कालिंगाः साम्बष्ठाः मागधाः पौंड्रमद्रकाः गांधाराः शकुनिप्रष्ठाः पार्वतीयाः वसातयः पुच्छे वैकर्तनः कर्णः सपुत्रज्ञाति
बांधवः महत्या सेनया तस्थौ नानाजनपदोत्थया जयद्रथो भीमरथः संपातिर्ऋषभो जयः भूमिंजयो वृषक्राथो नैषधश्च
महाबलाः वृता बलेन महता ब्रह्मलोकपुरस्कृताः व्यूहस्योरसि ते राजन् स्थिता युद्धविशारदाः द्रोणेन विहितो व्यूहः पदात्य
श्वरथद्विपैः वातोद्धतार्णवाकारः प्रवृत्त इव लक्ष्यते तस्य पक्षप्रपक्षेभ्यो निष्पेतुर्युत्सवः सविद्युत्स्तनिता मेघाः सर्वदि
ग्भ्य इवोष्णगे तस्य प्राग्ज्योतिषो मध्ये विधिवत्कल्पितं गजं आस्थितः शुशुभे राजन्नंशुमानुदये यथा माल्यदामवता राज
न् श्वेतच्छत्रेण धार्यता कृत्तिकायोगयुक्तेन पौर्णमास्यामिवेंदुना नीलांजनचयप्रख्यो मदांधो द्विरदो बभौ अतिवृष्टो
महामेघैर्यथा स्यात्पर्वतो महान् नानानृपतिभिर्वीरैर्विविधायुधभूषणैः समन्वितः पार्वतीपः शक्रो देवगणैरिव ततो
युधिष्ठिरः प्रेक्ष्य व्यूहं तमतिमानुषं अप्रधृष्यमरिभिः संख्ये पार्षतमब्रवीत् ब्राह्मणस्य वशं नाहमियामद्य यथा प्रभो
पारावतसवर्णाश्व तथा नीतिर्विधीयतां धृष्टद्युम्न उवाच द्रोणस्य यतमानस्य वशं नैष्यसि सुव्रत अहमावारयिष्यामि द्रो
णमद्य सहानुगं मयि जीवति कौरव्य नोद्वेगं कर्तुमर्हसि न हि शक्तो रणे द्रोणो विजेतुं मां कथंचन संजय उवाच एवमुक्त्वा कि
रन्बाणान् ससंप्रहारस्तुमुलः द्रुपदस्य सुतो बली पारावतसवर्णाश्वः स्वयं द्रोणमुपाद्रवत् अनिष्टदर्शनं दृष्ट्वा धृष्टद्युम्नम
ग्रतः स्थितं क्षणेनैवाभवद्द्रोणो नातिहृष्टमना इव तं तु संप्रेक्ष्य पुत्रस्ते दुर्मुखः शत्रुकर्षणः प्रियं चिकीर्षुर्द्रोणस्य धृष्ट

Indira Gandhi National
Centre for the Arts

द्रोण० मृज्ञमवारयत् स तं प्रहारमतुलं सुघोरं समपद्यत पार्षतं चाश्वरथस्य दुर्मुखस्य च भारत पार्षतः सहजालेनच्छिन्नं प्रच्छ
२४ घटुमुखे भारद्वाजधारी द्रोणमहतामवारयत् द्रोणमाविर्तिहस्ताश्वत्थामावत्यजः तानालिंगोः प्रभग्नाते पार्षतमभ
मीहयत् ततो विविषितायाः संग्रामो चाल्पकं सुखयोः द्रोणाय्योधिष्ठिरौ त्वविवक्षाया वेमहार्बेः अनिलेनयथाभ्राणि
विछिन्नानिसमंततः तथापार्थस्य सैन्यानि विछिन्नानि क्वचित्क्वचित् मुहूर्त्तमेव तद्युद्धमासीन्मधुरदर्शनं ततउन्मत्तव
द्राजन्निर्मर्यादमवर्त्तत नैवस्वे नपरे राजन्नज्ञायंतेपरस्परं अनुमानेन संज्ञाभिर्युद्धं तत्समवर्त्तत चूडामणिषु निष्के
षुभूषणेष्वपिवर्मसु तेषामादित्यवर्णाभारश्मयः प्रचकाशिरे तत्प्रकीर्णपताकानांरथवारणवाजिनां बलाकासंवृताभ्राभं ददृ
शेरूपमाहवे नरानेवनराजघ्नुरुदग्राश्चहयाहयान् रथांश्चरथिनोजघ्नुर्वारणान्वरवारणाः समुच्छितपताकानांगजा
नांपरमद्विपैः क्षणेनतुमुलोघोरः संग्रामः समपद्यत तेषांसंसक्तगात्राणां कर्षतामितरेतरं दंतसंघातसंघर्षात्स
धूमोग्निरजायत विप्रकीर्णपताकास्ते विषाणजनिताग्नयः बभूवुः खंसमासाद्यसविद्युतइवांबुदः विक्षिपद्भिर्नदद्भिश्चनि
पतद्भिश्चवारणैः संबभूवमहीकीर्णाविबद्धैरिवशारदी तेषामाहत्यमानानांबाणतोमरहृष्टिभिः वारणानां[illegible]रवो जज्ञे राम
मेघानामिवसंप्लवे तोमरैरभिहताः केचिद्बाणैश्चपरमद्विपाः वित्रेसुः सर्वनागानां शब्दमेवापरेव्रजन् विषाणाभि २४
हतास्तत्र केचित्तत्रगजागजैः चक्रुरार्त्तस्वरंघोरमुत्पातजलदोपमा प्रतीपाः क्रियमाणाश्चवारणावरवारणैः
उन्मथ्यपुनराजघ्नुः प्रेरिताः परमांकुशैः निर्मनुष्याश्चमातंगा विनदंतस्ततस्ततः महामात्रैर्महामात्रास्ताडिताः
शरतोमरैः मत्ताः केचिद्गजाः शिखरेभ्यः पातयन्महीं ... निर्मनुष्याश्चमातंगा विनदंतस्ततस्ततः

ततः छित्त्वासंग्रामीवसंपेतुः संविश्यपरस्परं हतास्तात्रिविहतं पतिताः पतिताः पुनः दिशोजग्मुर्महानागाः केचिदेकाचराइव
नाडिताः स्ताद्यमानाश्चतोमरैः शिक्षितैस्तथा पतुरात्तस्वरं कृत्वा तदाविशविशसनेगजाः तेषांशैलोपमैः कायैर्निपतद्भिः समंततः
आहतास्सहसाभूमिश्चकंपे चलताइव सारोहैः सगजारोहैः सपताकैः समंततः मातंगैः शुशुभेभूमिर्विकीर्णैरिवपर्वतैः
गजस्थाश्चमहामात्रा निर्भिन्नहृदयारणे रथिभिः पातितामल्लैर्विकीर्णांकुशतोमराः क्रौंचवन्निनदंतोन्येनाराचाभिहतागजाः परा
न्स्वांश्चाप्यमृद्नंतः परिपेतुर्दिशोदश गजाश्वरथयोधानांशरीरौघसमावृता बभूवपृथिवीराजन्रथाश्वरथिभिर्हीना
सयोणितकर्दमा प्रमथ्यचविषाणाग्रैः समुत्क्षिप्याश्ववारणैः सचक्राश्चविचक्राश्चरथैरेवमहारथाः रथाश्चरथिभिर्हीना
निर्मनुष्याश्चवाजिनः हतारोहाश्चमातंगादिशोजग्मुर्भयातुराः जघानात्रपितापुत्रंपुत्रश्चपितरंतथा इ
त्यासीत्तुमुलंयुद्धंनप्रज्ञायतकिंचन आगुल्फेभ्योवसीदंतेनराःलोहितकर्दमे दीप्यमानैःपरिक्षिप्ता दावैरिवमहाद्रुमा
: शोणितैःसिच्यमानानिवस्त्राणिकवचानिचछत्राणिचपताकाश्चसर्वरक्तमदृश्यत हयौघाश्चरथौघाश्चनरौघा
श्चनिपातिताः संकृत्ताः पुनरावृत्य बहुधारथनेमिभिः सगजौघमहावेगः परासुनरशैवलः रथौघतुमुलावर्त्तः
प्रबभौसैन्यसागरः तंवाहनमहानौभिर्योधाः जयधनैषिणः अवगाह्याप्यमज्जंतोनैवमोहंप्रचक्रिरे शरवर्षाभिवृष्टे
षुयोधेष्वाचितलक्ष्मसु नतेषुचित्ततोत्स्वलभे कश्चिद्दाहाहवत्वहरणः वर्त्तमानेतथायुद्धेघोररूपेभयंकरे मोहयित्वापरा
न्द्रोणोयुधिष्ठिरमुपाद्रवत् इतिश्रीभारतेद्रोणपर्व्वणिद्विनीपहाति संजयउवाच ततोयुधिष्ठिरोद्रोणंदृष्ट्वांतिकमु
पागतं महताशरवर्षेणप्रत्यगृह्णादभीतवत् ततोहलहलाशब्दआसीद्यौधिष्ठिरेबले जिघृक्षतिमहासिंहेगजानां

Indira Gandhi National
Centre for the Arts

शिवग्रूपं दृष्ट्वा द्रोणं ततः परः सत्यजित्सत्यविक्रमः युधिष्ठिरमभिप्रेप्सुराचार्यं समुपाद्रवत् तत आचार्यपांचाल्यौ युयुधा
ते महाबलौ विक्षोभयंतौ तत्सैन्यमिंद्रवैरोचनाविव ततो द्रोणो महेष्वासः सत्यजित्सत्यविक्रमः अविध्यन्निशिताग्रेण परमा
स्त्रं विदर्शयन् तथैव सारथेः पंच शरान्सर्पविषोपमान् अमुंचदंतकप्रख्यान्संमुमोहास्य सारथिः अथास्य सहसा
विध्यद्धयान्दशभिराशुगैः दशभिर्दशभिः क्रुद्ध उभौ च पार्ष्णिसारथी मंडलं तु समावृत्य विचरन्पृतनामुखे ध्वजं चिच्छेद च
क्रुद्धो द्रोणस्यामित्रकर्षणः द्रोणस्तु तत्समालोक्य चरितं तस्य संयुगे मनसा चिंतयामास प्राप्तकालमरिंदमः ततः स
त्यजितं तीक्ष्णैर्दशभिर्मर्मभेदिभिः अविध्यच्छीघ्रमावीर्यः छित्वास्य सशरं धनुः स शीघ्रतरमादाय धनुरन्यत्प्रतापवान्
द्रोणमभ्यहनद्राजन्विंशता कंकपत्रिभिः दृष्ट्वा सत्यजिता द्रोणं ग्रस्यमानमिवाहवे वृकः शरशतैस्तीक्ष्णैः पांचाल्यो
द्रोणमर्दयत् संछाद्यमानं समरे द्रोणं दृष्ट्वा महारथं चुक्रुशुः पांडवा राजन्वस्त्राणि दुधुवुश्च ह वृकस्तु परमक्रुद्धो
द्रोणं षष्ट्या स्तनांतरे विव्याध बलवान्राजंस्तदद्भुतमिवाभवत् द्रोणस्तु शरवर्षेण छाद्यमानो महारथः
वेगं चक्रे महावेगः क्रोधादुद्वृत्य चक्षुषी ततः सत्यजितश्चापं छित्वा द्रोणो वृकस्य च षड्भिः ससूतं सहयं शरैर्द्रोणोवधी
द्वृकं अथान्यद्धनुरादाय सत्यजिद्वेगवत्तरं साश्वं ससूतं विशिखैर्द्रोणं विव्याध सध्वजं स तन्न ममृषे द्रोणः पांचाल्येना
र्दितो मृधे ततस्तस्य विनाशाय सत्वरं व्यसृजच्छरान् हयान्ध्वजान्धनुर्मुष्टिमुभौ च पार्ष्णिसारथी अवाकिरत्ततो द्रोणः श्र
शरवर्षैः सहस्रशः तथा संछाद्यमानेषु कार्मुकेषु पुनः पुनः पांचाल्यः परमास्त्रज्ञः शोणाश्वं समयोधयत् सत्य
जित्समालोक्य ततो द्रोणो महाहवे अर्धचंद्रेण चिच्छेद शिरस्तस्य महात्मनः तस्मिन्हते महामात्रे पांचालानां महा

रथे अपायाज्जवनैरश्वैर्द्रोणात्त्रस्तो युधिष्ठिरः पांचालाः केकया मत्स्याश्चेदिकारूषकोशलाः युधिष्ठिरमभीप्संतो दृष्ट्वा द्रो
णमुपाद्रवन् ततो युधिष्ठिरं प्रेप्सुराचार्यः शत्रुपूगहा व्यधमत्तान्यनीकानि तूलराशिमिवानलः निर्दहंतमनीकानि तानि तानि
पुनः पुनः द्रोणं मत्स्यादवरजः शतानीकोभ्यवर्तत सूर्यरश्मिप्रतीकाशैः कर्मारपरिमार्जितैः षड्भिः ससूतं सहयं द्रोणं विध्वान
दद्भृशं क्रूरायकर्मणे युक्तश्चिकीर्षुः कर्म दुष्करं अवाकिरच्छरशतैर्भारद्वाजं महारथं तस्य नानदतो द्रोणः शिरः कायात्सकुं
डलं क्षुरेणापाहरत्तूर्णं ततो मत्स्याः प्रदुद्रुवुः मत्स्यान्जित्वाजयच्चेदीन्करूषान्केकयानपि पांचालान्सृंजयान्पांडून्भा
रद्वाजः पुनः पुनः तं दहंतमनीकानि क्रुद्धमग्निं यथा वनं दृष्ट्वा रुक्मरथं वीरं समकंपंत सृंजयाः उत्तमं ह्याददानस्य धनुरस्य
आशुकारिणः ज्याघोषो निघ्नतोमित्रान्दिक्षु सर्वासु शुश्रुवे नागानश्वान्पदातींश्च रथिनो गजसादिनः रौद्रा हस्तवता
मुक्ताः प्रमथ्नंति स्म सायकाः नानद्यमानः पर्जन्यो मिश्रवातो हिमात्यये अश्मवर्षमिवावर्षत्परेषां भयमादधत् सर्वा दिशः स
मचरत्सैन्यं विक्षोभयन्निव बली शूरो महेष्वासो मित्राणामभयंकरः तस्य विद्युदिवाभ्रेषु चापं हेमपरिष्कृतं दिक्षु सर्वासु
पश्यामो द्रोणस्यामिततेजसः शोभमानं ध्वजं चास्य वेदीं पश्याम भारत हिमवच्छिखराकारं चरतः संयुगे भृशं द्रोणस्य
पांडवानीके चकार कदनं महत् यथा दैत्यगणे विष्णुः सुरासुरनमस्कृतः स शूरः सत्यवाग्प्राज्ञो बलवान्सत्यविक्रमः महा
नुभावः कल्पांते रौद्रां भीरुविभीषणां कवचोर्मिध्वजावर्तां मर्त्यकूलापहारिणीं गजवाजिमहाग्राहामसिमीनां दुरास
दां वीरास्थिशर्करां रौद्रां भेरीमुरजकच्छपां चर्मवर्मप्लवां घोरां केशशैवलशाद्वलां शरौघिणीं धनुःस्रोतां बाहुपन्नगसंकु
लां रणभूमिवहां तीव्रां कुरुसृंजयवाहिनीं मनुष्यशीर्षपाषाणां शक्तिमीनां गदोडुपां उष्णीषफेनवसनां विकी

Indira Gandhi National
Centre for the Arts

द्रोण० २६ गौत्रसरासरूपं वीरापखापहां विरणीमुखंमांसशोणितकर्दमां हस्तिग्राहांकेतुद्वीपांक्षत्रियाणांनिमज्जनीं क्रूरां शूरासंघहा
र्षितांकरोत्तुरत्यपां द्रोणः प्रावर्त्तयन्नत्र नदींसेतुकगामिनीं क्रव्यादगणसंघुष्टांश्रृगालगणसंयुतां निषेवितां महारथैः पि
शिताशैः समंततः तेहत्वामतीकानि रथोदारं कृतांतवत् सर्वतोभ्यद्रवद्द्रोणं कुंतीपुत्रयुधिष्ठिराः तेद्रोणं सहिताःशूराः
सर्वतःप्रत्यवारयन् गभस्तिभिरिवादित्यं तपंतंभुवनंयथा तंतुशूरंमहेष्वासंतावकाःप्युद्यतायुधाः राजानोराजपुत्राश्च
समंतात्पर्यवारयन् शिखंडीतुतातोद्रोणं पंचभिर्नतपर्वभिः क्षत्रधर्माचविंशत्यावसुदानश्चपंचभिः उत्तमौजास्त्रिभि
र्बाणैः क्षत्रदेवश्चसप्तभिः सात्यकिश्चशतेनाजौयुधामन्युस्तथाष्टभिः युधिष्ठिरोद्वादशभिर्द्रोणंविव्याधसायकैः धृ
ष्टद्युम्नश्चदशभिश्चेकितानस्त्रिभिःशरैः ततोद्रोणः सत्यसंधः प्रभिन्नइवकुंजरः अ[?]प्रतीत्यरथानीकं दृढसेनम
पातयत् ततोराजानमासाद्य प्रहरंतमभीतवत् अविध्यन्नवभिःद्रोणंसमहत्सः प्राप्यरथात् समध्यंप्राप्यसेनायाः सतोस
वाःप्रणिचरन्दिशः त्रातारंनाभ्यवदंस्तेषांत्रातव्यःकथंचन शिखंडिनंद्वादशभिर्विंशत्याचोत्तमौजसं वसुदानंचभल्ले
नप्रेषयद्यमसादनं अशीत्याक्षत्रधर्माणंषड्विंशत्यासुदक्षिणं क्षत्रदेवंचभल्लेनरथनीडादपातयत् युधामन्युंच
षष्ट्याच त्रिंशताचैवसात्यकिं विद्ध्वारुक्मरथस्तूर्णंयुधिष्ठिरमुपाद्रवत् ततोयुधिष्ठिरः क्षिप्रंकितवोगुरुसत्तमः
अपायाज्जवनैरश्वैः पांचाल्योद्रोणमभ्ययात् तंद्रोणः सधनुष्कंतंसाश्वयंतारमाक्षिणोत् सहतःन्यपतद्भूमौरथाभ राम
ज्योतिरिवांबरात् तस्मिन्हतेराजपुत्रेपांचाल्यानांयशस्करे हतद्रोणंहतद्रोणमित्यासीन्निस्वनोमहान् तांस्तथा २६
भृशसंरब्धान्पांचाल्यान्केकयान् मत्स्यान्पांडवांश्चैवद्रोणोव्यक्षोभयद्बली सात्यकिंचेकितानंचधृष्टद्युम्नशिखंडि

नौ वार्द्धक्षेमिंचैत्रसेनिंसेनाबिंदुंसुवर्चसं एतांश्चान्यांश्चसुबहून्नानाजनपदेश्वरान् सर्वान्द्रोणोजयद्युद्धेकुरुभिःपरिवारितः ता
वकाश्चमहाराजजयंलब्ध्वामहाहवे पांडवेयान्रणेजघ्नुर्द्रवमाणान्समंततः तेदानवाइवेंद्रेणवध्यमानामहात्मना पां
चालाःकेकयामत्स्याः समकंपंतमारत इतिश्रीमहाभारतेद्रोणपर्वणिविंशोध्यायः धृतराष्ट्रउवाच भारद्वाजेनभग्नेषुपां राम २
डवेषुमहामृधे पांचालेषुचसर्वेषुकश्चिदन्योभ्यवर्त्तत आर्यांयुद्धेमतिंकृत्वाक्षत्रियाणांयशस्करीं असेवितांकापुरुषैःसेवि
तांपुरुषर्षभैः सहिवीरोन्नतःशूरोयोभग्नेषुनिवर्त्तते अहोनासीत्पुमान्कश्चिद्दृष्ट्वाद्रोणंव्यवस्थितं जृंभमाणमिवव्याघ्रंप्रभिन्न
मिवकुंजरं त्यजंतमाहवेप्राणान्संनद्धंचित्रयोधिनं महेष्वासंनरव्याघ्रंद्विषतांभयवर्द्धनं कृतज्ञंसत्यनिरतंदुर्योधनहिते
षिणं भारद्वाजंयथानीकेदृष्ट्वाशूरमवस्थितं केशूराःसंन्यवर्त्तंततन्ममाचक्ष्वसंजय संजयउवाच तान्दृष्ट्वाचलि
तान्संख्येप्रणुन्नान्द्रोणसायकैः पांचालान्पांडवान्मत्स्यान्सृंजयांश्चेदिकेकयान् द्रोणचापविमुक्तेनशरौघेणासुहा
रिणा सिंधोरिवमहौघेनह्रियमाणान्यथाप्लवान् कौरवाःसिंहनादेननानावाद्यस्वनेनच रथद्विपनराश्वैश्चसर्वतःसम
वारयन् तान्पश्यन्स्वसैन्यस्थोराजास्वजनसंवृतः दुर्योधनोब्रवीत्कर्णंप्रहृष्टःप्रहसन्निव दुर्योधनउवाच यश्यरा
धयपांचालान्प्रभग्नान्द्रोणसायकैः सिंहेनेवमृगान्वन्यान्त्रासितान्दृढधन्विना नैतेजातुपुनर्युद्धमीहेयुरितिमेमतिः
यथातुभग्नाद्रोणेनवातेनेवमहाद्रुमाः अर्द्यमानाःशरैरेतेरुक्मपुंखैर्महात्मना पथानैकेनगच्छंति घूर्णमानास्त
तस्ततः संनिरुद्धाश्चकौरव्यैर्द्रोणेनचमहात्मना एतेत्येमंडलीभूताःपावकेनेवकुंजराः भ्रमरैरिवचाविष्टाद्रो
णस्यनिशितैःशरैः अन्योन्यंसमलीयंतपलायनपरायणाः एषभीमोमहाक्रोधोहीनःपांडवसृंजयैः मदीयैराहे

Indira Gandhi National
Centre for the Arts

द्रोण० २७

तोपोधैः कर्णानं द्रयतीवमो अत्रं द्रोणमपंल्लोक्य मघपश्यति दुर्मतिः निराशो जीवितान्नून ममराज्ञा च पांडवः कस्मिन्वाच
नोषज्ञाभ्युमुहावाहुर्जीवन्नाहवमुत्सृजेत तथैमां तु रुषव्याघ्रः सिंहक्षेपाच्वनवाध्यति नवापीपांडवा युद्धे भङ्ग्यराक्षिति
मेमतिः प्राम्भवल्नवेतन्याक्रुतास्त्रायुहदुर्मेहाः विषाग्निघृतसल्लो सवपांडवाः स्मरमाणानहास्यतिसंग्राममिति मेम
तिः निकृ नौहिमहावाकूरमितौजाह्वकोद्दरः वरान्वरान्हकौंतेयो रथ्या हारान्हनिष्पात अस्मिनाधनुश्छपाशानाहयेनानिगो
नैरंध्यैः अपमेन चहडेन तोभ्रान्भ्रातान्हितिष्पातितमेनमनुवर्त्तेति सात्यकिप्रमुखारथ्याः पांचालाः केकयास्तस्माः
पांडवाश्चविशेषतः प्राम्भुवल्नवेतम्भविक्रांतास्त्रमहारथ्याः निषधितान्स्त्रभीसेनतसंरक्षेनाभिद्रोहितांतद्रोणम
भिवर्त्तते सर्वतः कुरुपुंगवाः हृकोद्दरंपुरीशंतेः सुष्यमक्षगणाद्दव एकायतनमालोद्यते पोडयेपुयतव्रते अरद्दुमा
राम्भल्लभाषष्याहीपंमुमर्षवः असंशपंक्रुतास्त्राष्ठपपाभाम्भ्यापिवारणो अतिभारमहंमन्ये भारद्वाजेसमाहितं
भ्रातृभिः साहिष्णो घमन्वगानिष्पामोपत्रद्रोणोप्यवस्थितः कोकाद्दवमहानागोमावेहन्तुर्यतव्रते संजयप्रालाच
मघेयस्यचचः कृत्वा राजादुर्पोधनस्ततः भ्रातृभिःसहितोराजन्प्रापाद्रोणरथंप्रति तत्रशब्दोमहानासीदेकंद्रोण
जिघांसतां पांडवानां निवृत्तानां नावर्योर्हयोत्तमैः इतिश्रीमहाभारते द्रोणपर्वणि विजयेद्वितीयेहनि धृतराष्ट्रउवाच राम
कालवर्षीहयेर्द्दष्टाव्यायपृच्छतवृकोदरं रजताश्वस्ततःशूरः सेनेपः सन्त्यवर्त्तत सारंगाश्वोयुधामन्युः स्वस्सप्रत्वरर २७
यन्हेपान्पर्प्यवर्त्तत दुर्द्दर्षः कुद्धोद्रोणरथंप्रति पारावतसवर्णास्तु हेमभांडा महाजवैः पांचालराजस्यसुतोद्दष्टद्य
स्नोन्पवन्नत पितरंतुपरिप्रेप्सुः क्षत्रधर्मापतव्रतः सिद्धिश्चास्यरथंकाद्दन्तशोणाश्वासन्त्यवर्त्तत पद्मपत्रनिभाश्वाश्वा

त्वाक्षिकान्नस्वलंकृतान शैवेडिः क्षत्रहिवक्षस्वयंप्रत्यवरस्त्यायो हर्षातोयुधामन्युकांबोजाः शुकपत्रविभ्रहाः वहंतोनकु
लंशोघ्रताचकान्नभिद्रुद्रुवुः हृष्टास्तेमेघसंकाशा अवहन्नुमौजसं दुर्द्दषायाभिसंवापुत्रक्रहायुद्धायभासन तथातितिम
कल्माषाहयावातसमाजवे अवहंस्तकुलेपुहससहदेवमुदायुधं हंतवर्णास्तराजानंकालवाहीयुधिष्ठिरं भीमवे
गात्ररव्याप्रसवहन्वार्तरंहसः हेमोत्तमप्रतिछन्नैर्हयैर्वातसमैर्जवैः अभ्यवर्त्तत सैन्यानि सर्वीरापवयुधिष्ठिरं राजल्वे
नेतनोराज्ञापांचाल्यो द्रुपदोभवत् जातरूपमयच्छत्रःसर्वैस्तैरभिराक्षितः ललामैर्हरिभिर्युक्तैः सर्वशब्दक्षमैर्युधि
राज्ञोमध्ये महेष्वासः शांतभीरभ्यवर्त्तत तंविराटोन्वयाच्छीघ्रं सहसर्वैर्महारथैः केकयाश्चाशिखंडीचधृष्टकेतुस्तथैवच
स्वैः स्वैः सैन्यैः पराछन्नामत्स्याराजानमन्वयुः ततुपाटलिपुष्पाणां समवर्णाहयोत्तमाः वहमानाव्यराजंत मत्स्यस्या
मित्रघातिनः हरिद्रासमवर्णास्तुजवनाहेममालिनः पुत्रंविराटराजस्यसोत्तरंसमुदावहन् इंद्रगोपकवर्णैश्च भ्रा
तरःपंचकेकयाः जातरूपसमाभासः सर्वेलोहितकध्वजाः तेहेममालिनः शूराः सर्वेयुद्धविशारदाः वर्षतइवजीमू
ताः प्रत्यदृश्यंतदंशिताः आमपात्रनिकाशास्तुपांचाल्यममितौजसं दत्तास्तांबुरुणाहिव्याः शिखंडिनमुदावहन्
तथाद्वादशसाहस्राः पांचालानांमहारथाः तेषांतुषट्सहस्राणि येयेशिखंडिनमन्वयुः पुत्रंतुशिशुपालस्यनरसिंह
स्यमारिषा आक्रीडंतोवहंतिस्मसारंगशवलाहयाः धृष्टकेतुश्चचेदीनामृषभोतिवलोहितः कांबोजैः शवलैरश्वैः
अभ्यवर्त्ततदुर्जयः वृहत्क्षत्रंतुकैकेयंसुकुमारंहयोत्तमाः पलालधूमसंकाशाः सैंधवाःशीघ्रमावहन् मल्लिकाक्षाः
पद्मवर्णावाह्लिजाताः स्वलंकृताः शूरंशिखंडिनःपुत्रंक्षत्रदेवमुदावहन् रुक्मभांडप्रतिच्छन्नाकौशेयसदृशाह

द्रोण० १८ पाः॥ क्षमावंतो वहन्संख्ये सेनाबिंदुमरिंदमं॥ युवानमवहन्युद्धे क्रौंचवर्णा हयोत्तमाः॥ काश्यस्याभिभुवः पुत्रं सुकुमारं महा
रथे॥ श्वेतास्तं वहति विध्यं तेन स्रग्विणा मनोजवाः॥ यंतुः प्रेष्यकरा राजन्राजपुत्रमुदावहन्॥ सुतसोमं तु यं सौम्यं पार्थः पुत्र
मजीजनत्॥ माषपुष्पसवर्णास्तमवहन्वाजिनो रणे॥ सहस्रसोमप्रतिमास्तु भूपुरे कुरूणामुदयेंदुनाम्नि तस्मि
न्जातः सोमसंक्रंदमध्ये यस्मात्तस्मात्सुतसोमोऽभवत्सः॥ नाकुलिं तु शतानीकं शालपुष्पनिभा हयाः॥ आदित्यतरुण
प्रख्याः श्लाघनीयमुदावहन्॥ कांचनापीडितैर्योक्त्रैर्मयूरग्रीवसन्निभाः॥ द्रौपदेयं नरव्याघ्रं श्रुतकर्माणमावहन्॥ श्रु
तकीर्तिं श्रुतनिधिं द्रौपदेयं हयोत्तमाः॥ ऊहुः पार्थसमं युद्धे चाषपत्रनिभा हयाः॥ यमाहुरध्यर्धगुणं कृष्णात्पार्थाच्च सं
युगे॥ अभिमन्युं पिशंगास्तं कुमारमवहन्रणे॥ एकस्तु धार्तराष्ट्रेभ्यः पांडवान्यः समाश्रितः॥ तं बृहंतो महाकायाः यु
युत्सुमवहन्रणे॥ पलालकांडवर्णास्तु वार्धक्षेमिं तरस्विनं॥ ऊहुः सुतुमुले युद्धे हयाः कृष्णाः स्वलंकृताः॥ कुमारं
शितिपादास्तु रुक्मपत्रैरुरश्छदैः॥ सौचित्तिमवहन्युद्धे यंतुः प्रेष्यकरा हयाः॥ रुक्मपृष्ठावकीर्णास्तु कौशेयसदृशा हयाः॥
सुवर्णमालिनः क्षांताः श्रेणिमंतमुदावहन्॥ रुक्ममालाधराः शूरा हेमपृष्ठाः स्वलंकृताः॥ काशिराजं नरश्रेष्ठं श्ला
घनीयमुदावहन्॥ अस्त्राणां च धनुर्वेदे ब्राह्मे वेदे च पारगं॥ तं सत्यधृतिमायांतमरुणाः समुदावहन्॥ यः स पांचाल्यसे राम
नानीर्द्रोणमंशं कल्प्य ययौ॥ पारावतसवर्णास्तं धृष्टद्युम्नमुदावहन्॥ तमन्वयात्सत्यधृतिः सौचित्तिर्युद्धदुर्म १८
दः॥ श्रेणिमान्वसुदानश्च पुत्रः काश्यस्य वाभिभुः॥ युक्तैः परमकांबोजैर्जवनैर्हेममालिभिः॥ भीषयंतो द्विषत्से
न्यं यमवैश्रवणोपमाः॥ प्रभद्रकास्तु कांबोजाः षट्सहस्राण्युदायुधाः॥ नानावर्णैर्हयश्रेष्ठैर्हेमवर्णरथध्वजाः॥

ज्ञाः॥ शरव्रातैर्विधुन्वंतः शत्रून्विततकार्मुकाः॥ समानमृत्यवो भूत्वा धृष्टद्युम्नं समन्वयुः॥ बभ्रुकौशेयवर्णास्तु सुव
र्णमालिनः॥ ऊहुरम्लानमनसश्चेकितानं हयोत्तमाः॥ इंद्रायुधसवर्णैस्तु कुंतिभोजो हयोत्तमैः॥ आयात्सदश्वैः
पुरुजित्मातुलः सव्यसाचिनः॥ अंतरिक्षसवर्णास्तु तारकाचित्रिता इव॥ राजानं रोचमानं ते हयाः संख्ये समावहन्॥
कर्बुराः शितिपादास्तु स्वर्णजालपरिच्छदाः॥ जारासंधिं हयाः श्रेष्ठाः सहदेवमुदावहन्॥ ये तु पुष्करनालस्य समवर्णा
हयोत्तमाः॥ जवे श्येनसमाश्चित्राः सुदामानमुदावहन्॥ पांचालानां नरव्याघ्रो यः ख्यातो जनमेजयः॥ तस्य सर्ष
पपुष्पाणां तुल्यवर्णा हयोत्तमाः॥ शशलोहितवर्णास्तु पांडुरोद्गतराजयः॥ पांचाल्यं गोपतेः पुत्रं सिंहसेनमुदावहन्॥
माषवर्णास्तु जवनाः बृहंतो हेममालिनः॥ दधिपृष्ठाश्चंद्रमुखाः पांचाल्यमवहन्द्रुतं॥ शूराश्च भद्रकाश्चै
व शरकांडनिभा हयाः॥ पद्मकिंजल्कवर्णाभा दंडधारमुदावहन्॥ रासभारुणवर्णाभाः पृष्ठतो मूषकप्रभाः॥ वल्गंत इव संर
ब्धा व्याघ्रदत्तमुदावहन्॥ हरयः कालकापीडाश्चित्रमाल्यविभूषिताः॥ सुधन्वानं नरव्याघ्रं पांचाल्यं समुदाव
हन्॥ इंद्राशनिसमस्पर्शा इंद्रगोपकसन्निभाः॥ कायैश्चित्रांतराश्चित्राश्चित्रायुधमुदावहन्॥ बिभ्रतो हेममालास्तु
चक्रवाकोदरा हयाः॥ कोशलाधिपतेः पुत्रं सुक्षत्रं वाजिनोऽवहन्॥ शबलास्तु बृहंतोऽश्वा दांता जांबूनदा चैव शुक्लैः
शुक्लो न्यवर्तत॥ समुद्रसेनपुत्रं तु सामुद्रा रुद्रतेजसं॥ अश्वाः शशांकसदृशाश्चंद्रसेनमुदावहन्॥ नीलोत्पल
सवर्णास्तु तपनीयविभूषिताः॥ शैब्यं चित्ररथं संख्ये चित्रमाल्यावहन्हयाः॥ कलायपुष्पवर्णास्तु श्वेतलोहि

Indira Gandhi National
Centre for the Arts

द्रो॰भा॰ प्राजयः स्थसेनेहयश्रेष्ठाः समुद्रपुंड्रकर्मर्दं यंतुसर्वगातुवेभ्यः आकूः श्रुतंवल्यं तेपरश्वर्ईतांश्रुत्कवर्णाविहयाः चित्रायुधं
२९ चित्रमाल्याविवर्माऽयुधध्वजं ऊहुः किंशुकपुष्पाणां समवर्णा हयोत्तमाः एकवर्णा सुवर्णेन ध्वजे न कलकेन च धनुषा
रथवाहे श्वनीलेनीलान्यवर्तंत नानारूपेरत्नाविद्धैवरूथध्वजकार्मुकैः वाजिध्वजपताकाभिः चित्रैचत्रस्यवर्तंत ये
तुपुष्कररत्नस्यतुल्यवर्णा हयोत्तमाः तेरोचमानस्य सुतंहेमवर्णामुदावहन् योधाः पुत्रमहत्कायाः श्वेतंडान्यहेडयाः श्वेतो
डाः कुक्कुलंडाभाहेडकेतुहयावहन् केशवेहन्तते संस्थापितयेथ्यनराधिप भित्रेकपालेपाघातोविक्रलेषुचवंधुषु भी
ष्माहवाण्यवाहा गांदेरागा हामात्करपात्तथा अर्वैः समत्वसंप्राप्य सकिकरागंर्जुनात्मजैः इयं पाहास्कोहतुक
त्वेजंतुंचमेदिनी ▮ तिवारितस्ततः शावैः सुहृद्भिर्हितकामपावैसनवंधमुत्सृज्यचराज्यमनुशास्तिपः समागरध्व
जः पांडुश्रे शाशितिभिर्हयैः वैदूर्यजालसंछन्नेवोयंडूकविनिमास्थितः दिव्यविस्फरयच्चापंद्रोणमभ्यद्रवहली आर
षकवर्णाभाः हयाः पांड्यानुयाजिनं अवहन्वरथमुख्यानामपुतानिचतुर्दश नानावर्णनरूपेणनानाकृतिमुखाह
याः रथचक्रध्वजंवीरंघटोत्कचमुदावहन् भरतानांसमेतानामुत्सृज्यैकोमतानियः गतोयुधिष्ठिरंभक्त्यात्यक्त्वासर्वमभी
न प्सितं लोहिताश्वंमहाबाहुंवृहंतंभरिधिज्जाः महासत्वामहाकायाः सौवर्णास्यंदनस्थिताः सुवर्णवर्माधर्मज्ञमनीकस्थं राम
युधिष्ठिरंराजेंद्र श्रेष्ठाः सर्वतः पृष्ठतोन्वयुः वर्णोनैकेनवचैरन्यैः सदश्वानांप्रभद्रकाः सन्यवर्तंतयुद्धाय यहीतोदेवरूपिणः ते २९
पत्नांभीमसेनेनसहिताःकांचनध्वजाः प्रत्यदृश्यंतराजेंद्र सेंद्राइवदिवोकसः अरोचतततोन्मवातहृष्टद्युम्नः समागतान् सर्वा

रायतिचसेनानिभारद्वाजोभ्यरोचत अतीवशुशुभेतस्यध्वजः कलशांचितोत्तरः कमंडलुर्महाराजजातरूपमयःशुभः
ध्वजंतुभीमसेनस्यवैदूर्यमणिलोचनं भ्राजमानंमहासिंहंराजतेदृष्टवाहतं ध्वजंतुकुरुराजस्यपांडवस्यमहौजसः दृष्टवानस्मि
सौवर्णसोमंग्रहगणान्वितं भ्राजमानंमहासिंहंराजतेदृष्टवाहतं ध्वजंतुकुरुराजस्यपांडवस्यमहौजसः दृष्टवानक्षि मह
गावात्रविपुलौदिव्यौनंदोपनंदकौ रवपेमेवचपत्रेनाहन्यमानौ तस्यंदृष्टवानस्मिनकुलस्यमहाध्वजे अपश्याम रथेतुग्र
भीषणंतमवस्थितं हसंस्तेराजतः श्रीमानध्वजेघंटापताकवान् सहदेवस्यदुर्धर्षोद्विषतांशोकवर्धनः पंचानांद्रौपदेयानां
प्रतिमाध्वजमत्रषर्णांधर्ममारुतशक्राणामश्विनोश्चमहात्मनोः अभिमन्योःकुमारस्यशार्ङ्गपक्षीहिरण्मयः रथेध्वजवरो
जजाम्रचामीकरोज्वलः घटोत्कचस्यराजेन्द्रध्वजेगृध्रोव्यरोचत अश्वास्तथाभगवतःसंसवराम्यथापुरा माहेन्द्रंहिधनुर्दि
व्यंचधर्मराजेयुधिष्ठिरे वायव्यंभीमसेनस्यचधनुर्दिव्यंमहात्मनः त्रैलोक्यरक्षणार्थायब्रह्मणासृष्टमायुधं तद्दिव्यमजरंचै
वफाल्गुनायवैदत्तं वैष्णवंनकुलायाथसहदेवायचाश्विनं घटोत्कचायपौलस्त्यंधनुर्दिव्यंभयानकं रौद्राग्नेयकौवे
रयाम्यगिरिशमेवच पंचानांद्रौपदेयानांधनूरत्नानिभारत रौद्रंधनुर्वरश्रेष्ठंलेभेरोहिणीसुतः तंतुष्टःप्रददौरामःसौभद्रा
यमहात्मने एतेचान्येचवहवोध्वजाहेमविभूषिताः तत्रादृश्यंतशूराणांद्विषतांशोकवर्धनाः तदभूद्ध्वजसंवाधमकापुरुष
सेवितं द्रोणानीकंमहाराजपटेचित्रमिवार्पितं शुश्रुवुर्नामगोत्राणिवीराणांसंयुगेतदा द्रोणमाद्रवतोराजन्स्वयंवर
इवाहवे इतिश्रीमहाभारतेद्रोणपर्वणिविजयेद्वितीयेहनि ध्वजवर्णने धृतराष्ट्रउवाच व्यथयेयुरिमेसेनांदेवानामपिसंजय आ
हवेपेत्यवर्तंतवृकोदरमुखान्नृपाः संप्रयुक्ताःकिलैवायंदिष्टैर्भवतिपूरुषः तस्मिन्नेवचसर्वार्थाः प्रदृश्यंतेपृथग्विधाः

Indira Gandhi National
Centre for the Arts

द्रोण० दीर्घं विप्रोषितः कालमरण्ये जटिलोजिनी अज्ञातश्चैव लोकस्य विजहार युधिष्ठिरः स एव महतीं सेनां समावर्तयदाहवे कि
३० मन्यद्दैवसंयोगान्मम पुत्रस्य चाभवत् पुत्र एव हि भाग्येन कृच्छ्रमुत्पद्यते नरः स यथा कृष्यते तेन न यथा स्वयमिच्छति द्यूतव्यसनमा न२
साद्य क्लेशितो हि युधिष्ठिरः स पुनर्भागधेयेन सहायानुपलब्धवान् अधनेके कपालब्धाः काशिकाः कोसलाश्च ये चेदयश्चा
परे वंगाः मामेव समुपाश्रिताः पृथिवी भूयसी तात मम पार्थस्य नो तथा इति मामब्रवीत्सूत मन्दो दुर्योधनः पुरा तस्य सेनास
मूहस्य मध्ये द्रोणः सुरक्षितः निहतः पार्षतेनाजौ किमन्यद्भागधेयतः मध्ये राज्ञां महाबाहुं सदा युद्धाभिनंदिनं सर्वास्त्रपार
गं द्रोणं कथं मृत्युरुपेयिवान् समनुप्राप्तकृच्छ्रोहं संमोहं परमं गतः भीष्मद्रोणौ हतौ श्रुत्वा नाहं जीवितुमुत्सहे यन्मा क्षत्ता
ब्रवीत्तात प्रपश्यन्पुत्रगृद्धिनं दुर्योधनेन तत्सर्वं प्राप्तं सूत मया सह नृशंसं तु परं तत्स्यात्त्यक्त्वा दुर्योधनं यदि पुत्रशेषं चिकीर्षेयं
कृत्स्नं न मरणं व्रजेत् यो हि धर्मं परित्यज्य भवत्यर्थपरो नरः सोस्माच्च हीयते लोकात्क्षुद्रभावं च गच्छति अद्य चा
प्यस्य राष्ट्रस्य हतोत्साहस्य संजय अवशेषं न पश्यामि ककुदे मृदिते सति कथं स्यादवशेषो हि धुर्ययोरभ्यतीतयोः यौ नित्यमु
पजीवामः क्षमिणौ पुरुषर्षभौ व्यक्तमेव च मे शंस यथा युद्धमवर्तत केयुध्यन्के व्यपाकर्षन्के क्षुद्राः प्राद्रवन्भयात् धनंज
यं च मे शंस यद्यच्चक्रे रथर्षभ तस्माद्भयं नो भूयिष्ठं भ्रातृव्याच्च वृकोदरात् यथासीच्च निवृत्तेषु पांडवेषु संजय मम सैन्या राम
वशेषस्य सन्निपातः सुदारुणः कथं च वो मनस्तात निवृत्तेष्वभवत्तदा मामकानां च ये शूराः के कांस्तत्र समवारयन्
इति श्रीभारते द्रोणपर्वणि द्रोणविजये द्वितीयोध्यायः संजय उवाच महद्भैरवमासीन्नः संनिवृत्तेषु पांडुषु दृष्ट्वा द्रोणं ३०
छाद्यमानं तैर्भास्करमिवांबुदैः तैश्चोद्धूतं रजस्तीव्रमवचक्रे चमूं तव ततो हतममंस्याम द्रोणं दृष्टिपथे हते तान्स्म

वा स्त्रहेषामान् क्रूरं कर्म चिकीर्षतः दृष्ट्वा दुर्योधनस्तूर्णं स्वं सैन्यं समचूचुदत् यथाशक्ति यथोत्साहं यथासत्त्वं नराधिपाः वा
रयध्वं यथायोगं पांडवानामनीकिनीं ततो दुर्मर्षणो भीमं अभ्यगच्छत्सुतस्तव आराद्दृष्ट्वा किरन्बाणैरिच्छन्द्रोणस्य जीवि
तं बाणैरवतेतार क्रुद्धो मृत्युरिवाहवे तं च भीमोतुदद्बाणैस्तदासीत्तुमुलं महत् ते दृष्टसमाविष्टाः प्राज्ञाः शूराः प्रहारिणः रा
ज्यं मृत्युभयं त्यक्त्वा प्रत्यतिष्ठन्परान्युधि कृतवर्मा शिनेः पौत्रं द्रोणप्रेप्सुं विशांपते पर्यवारयदायांतं शूरः समरशोभिनं तं शैनेयः
शरव्रातैः क्रुद्धः क्रुद्धमवारयत् कृतवर्मा च शैनेयं मत्तो मत्तमिव द्विपं सैंधवः क्षत्रधर्माणमापतंतं निशितैः शरैः उग्रधन्वानमिष्वास
वा यत्नाद्द्रोणादवारयत् सुबाहोः सधनुष्कौ बाणौ च पतः परिघोपमौ युयुत्सुः शितबाणाभ्यां क्षुराभ्या
मच्छिनद्रणे राजानं पांडवश्रेष्ठं धर्मात्मानं युधिष्ठिरं वेलेव सागरं क्षुब्धं मद्रराजः समताडयत् तं धर्मराजो बहुभिर्मर्मभिद्भिरवाकिर
त् संपूज्य चतुःषष्ट्या शरैर्विद्ध्वानदत्पुनः आद्रवंतं सहानीकेन न्यवारयत तद्युद्धमभवद्घोरं सहदेवः समसैन्ययोः यथा महाप्र
हृष्टं तस्य तानं हतः केतुः सच्च कर्त्तंच कार्मुकं क्षुराभ्यां पांडवश्रेष्ठस्ततश्चुकुशुर्जनाः तथैव राजा बाह्लीको राजानं द्रुपदं द्रुपदे
आद्रवंतं सहानीकं न्यवारयत तद्युद्धमभवद्घोरं वृद्धयोः समसैन्ययोः यथा महायूथपयोः संप्रभिन्नयोः विहायविहायवेतौ
विराटं मत्स्यमार्छंतं सह सैन्यं सहानीकं यथेंद्रामी पुरा बलिं तद्युद्धमभवद्घोरं मत्स्यानां केकयैः सार्द्धं संभिन्ना
श्वरथद्विपं नाकुलिं तु शतानीकं भूतकर्मा समृपतिः अस्यंतमिषुजालानि यांतं द्रोणमवारयत् ततो नकुलदायादस्त्रि
भिर्भल्लैः सुसंशितैः चक्रे विबाहुशिरसं भूतकर्माणमाहवे सुतसोमं तु विक्रांतमापतंतं शरौघिणं द्रोणायाभिमुखं वी
रं विविंशतिः प्रावारयत् सुतसोमस्तु संक्रुद्धः स्वपितृव्यमजिह्मगैः विविंशतिं शरैर्विद्ध्वा नाभ्यवर्त्तत दंशितः अथ भीमरथः

Indira Gandhi National
Centre for the Arts

द्रोण० शाल्वमायैसेणपुरोगाः। शितैः पंक्तिभिश्चाश्वानियंतारं अश्वनागधमसाहकं अकृतास्त्रमामापांतेमरहस्यहृशोहृयेः चित्रसेनिर्महाराजन
३२ वृषोत्रमपारयत् तोपांत्रोतवक्रुद्धः द्रौणीं परस्परवधैषिणौ पितृणामर्थे निश्चयं चक्रतुर्युद्ध मुत्तमं तिष्ठंतमग्रतो दृष्ट्वा प्रति विं
ध्यमहाहवे द्रोणिर्मानं पितुः कुर्वन्मार्गणैः समवारयत् तंक्रुद्धं प्रतिविव्याध प्रतिविंध्यः शितैः सिंहलांगूलकलक्ष्माणां पि
तुरर्थे व्यवस्थितं अवपन्निव बीजानि बीजकाले नरर्षभ द्रौणायनिं द्रौपदेयाः शरवर्षैरवाकिरत् आर्जुनिं श्रुतकीर्तिस्तु द्रौपदेयं
महारथं द्रोणायाभिमुखं यान्तं द्रौणिः शरैः समवारयत् तस्य कृष्णसमः कार्ष्णिस्त्रिभिर्भल्लैः सुसंशितैः धनुर्ध्वजं च सूतं च
छित्वा द्रोणांतिकं ययौ यस्तु शूरतमो राजन्नुभयोः सेनयोर्मतः तं पटच्चराहंतारं शल्ययाः समवारयत् सत्कृत्य स्वम
हतं छित्वा सर्वम्भारत तम्मरोगागजालाभिविसृजन्नवद्ध्यं श्रेगमत् विकर्णस्तं महाप्राज्ञो योजयेति शरवं हितं
पर्यवारयदायान्तं युवा च समरे युवा ततस्तमियुजालेन पाडयेति सत्तिः समाहरोगात् विसृयद्व्याजालं चमीत्वयुतेमवल्ली
अंगाह्नो भिमुखं वीरमुत्तमौजसमाहवे द्रोणायाभिमुखं यान्तं शरौघैरान्यवारयत् समंप्रहारस्तु मुखः तयोः पुरुष
सिंहयोः सैनिकानां च सर्वेषां तयो प्रप्रीतिवर्द्धनं दुर्मुखस्तु महेष्वासो वीरं पुरुजितं बली द्रोणायाभिमुखं यान्तं वत्सदन्तैः सम
हतैरयत् स दुर्मुखं भ्रुवोर्मध्ये नाराचेनाभ्यताडयत् तस्यतद्विबभौ वक्रं सनालमिव पं राज ३२
कजं कर्णस्तु केकयान्भ्रातृन् पञ्च लोहितकध्वजान् द्रोणायाभिमुखं यान्तं शरवर्षैरवाकिरत् ते चैनं भृशसंतप्ता
शरवर्षैरवाकिरत् ते चैनं छादयामासुः शरजालैः पुनः पुनः नैव कर्णो नते पंच ददृशुर्बाणसंवृताः साश्वसूतध्वज
रथाः परस्पराचिताः पुत्रास्ते दुर्जयश्चैव जयश्च विजयश्च ह नीलं काश्यं जयत्सेनं त्रयस्त्रीन्पर्यवारयन् तद्युद्धमभव

द्घोरं क्रोशप्रीतिविवर्द्धनं सिंहव्याघ्रतरक्षूणां यथा ऋक्षमहिषर्षभैः क्षेमधूर्तिर्बृहन्तौ तु भ्रातरौ सात्वतं युधि द्रोणायाभि
मुखं यान्तं शरैस्तीक्ष्णैरतुदतां ततः तयोस्तस्य च तद्युद्धमत्यद्भुतमिवाभवत् सिंहस्य द्वीपमुख्याभ्यां प्रभिन्नाभ्यां यथा
वने राजानं तु तथाम्बष्ठमेकं युद्धाभिनंदिनं चेदिराजः शरानस्यन्क्रुद्धो द्रोणामुखमपत् ततोम्बष्ठोस्थिनाभिः
मशास्त्राविर्भिधव्रत्सममत्यश्वामशरं चापरं शाद्धमिमुष्णामत् वर्द्धक्षेमिं तु शर्मा कृपः शारद्वतः शरैः क्ष
द्रकं क्षुद्रकैः शरैः क्रुद्ध तमवारयत् युध्यंतौ कृपवार्ष्णेयौ ये पश्यश्चित्रयोधिनौ ते युद्धासक्तमनसो नान्या
न्बुबुधिरे क्रियाः सौमदत्तिस्तु राजानं मणिमंतमतंद्रितं पर्यवारयद्यान्तं यशो द्रोणस्य वर्द्धयन् स
मौसुर्वं तिस्त्वरितास्य मंद्रयमतकेतवे पुनः पताकां सूतं च छत्रं चापातयद्रथात् अथाप्लुत्य रथात्तूर्णं यूपकेतुर
मित्रहा सास्तं समहाध्वजरथं तं चकर्त्त वरासिना रथं च स्वं समास्थाय धनुरादाय चापरं स्वयं हयांस्ततो यात
राजंस्तवपूजत् महंतीचमूं पाण्ड्यमिंद्रमिवायान्तमभ्यायात्प्रतिदुर्जये समर्थः सायकौघैस्तं वृषसेनोभ्यवार
यत् गदापरिघनिस्त्रिंशपट्टिशायोधनश्चवैः कडंगावेणुमुसली भिः प्रासैस्तोमरसायकैः मुशलैर्मुद्गरैश्चक्रैः
भिंडिपालपरश्वधैः पांसुवातांनिसलिलैर्भस्मलोष्ठतृणाङ्कैः अरुजन्प्ररुजन्भंजन्निघ्नन्वि
द्रावयन्क्षिपन् सेनां भीषयन्नायाद्रोणप्रेप्सुर्घटोत्कचः तं तु नानाप्रहरणैर्नानायुद्धविशेषणैः

द्रो॰ सा॰ राज्ञेसंशप्तकैः क्रुद्धः समाजघ्ने धनंजयः तयोस्तदभवद्युद्धं इन्द्राग्न्योरमरामुख्ययोः तादृक्यादृक्का स्यंतं श्रो
वासवराजयोः एवं द्वंद्वशतान्यासन्रथनागाश्ववाजिनां पत्तीनां च महाराज तस्मिन्वीरक्षये च संकुले नैतादृशो दृष्टपूर्वः
३२ संग्रामो नैव च श्रुतः द्रोणस्याभावितप्रसक्तानां यथाभवत् इदं घोरमिदं चित्रमिदं रौद्रमिति प्रभो तत्र युद्धान्यदृश्यप
न्तपुनता निवृत्तिच इति [illegible] द्रोणपर्वणि द्वंद्वयुद्धे द्वितीयेऽहनि धृतराष्ट्र उवाच तेष्वेवं संनिवृत्तेषु प्रत्युद्या
तेषु भागशः कथं युधिष्ठिरे यात्यो मामकाश्च ततोऽर्जुनः किमकुर्वत पार्थाश्च करोत्संशप्तकवलेप्रति संस
तेषु भागशः कथं युधिष्ठिरे याथो मामकाश्च ततो... किमकुर्वत पांडवा... प्रत्युद्यातेषु भागशः स्वयमभ्यगमद्द्रोणं
मकाधापार्थस्य किमकुर्वत संजय संजय उवाच तथा प्रतिद्वंद्वेषु प्रत्युद्यातेषु भागशः स्वयमभ्यगमद्दुर्यो
धनानीकेन तेजसा गजानीकेन संयुक्तः सभगदत्तो नागेन वृषेणेव महावृष समाहूतः यंराज्ञा नागानीकमुपाद्रवत् संयुद्ध
ना नानीके न तेषुतः सभगदत्तो नागेनैव नगोपरिषेणेव महावृष समाहूतः ... तेगजा गिरिसंकाशाः
कुशलाः पार्थवाक्यवीर्यैराचार्याचिताः समिनन्तः कुंजराणां नीकमेचिरेणैव मारिषः तेगजा गिरिसंकाशाः
क्षतांतः सर्वतोमदं भीमसेनस्य नाराचैर्विमुखा विमहाकृताः विविधमे दृष्ट्वा राजा नानिपप्याथा वायुः समु
द्धृत यूथमन्तानानीकानि तथैवप्रत्यमज्जः सतेषु विसृज्यनागानामभीमेभ्यो नागव्यशोभत भुवनेष्विवसर्व
षुगाभक्तिनुदितोरविः तेभीमवाणाभिहताः संस्यूता विवसुर्गजाः गभस्तिभिरिवार्कस्य व्योम्नीनानावला
हकाः तथागजानीकहतं कुर्वाणमनिलात्मजं क्रुद्धो दुर्योधनोभ्येत्य प्रत्यविध्यच्छितैः शरैः ततः क्षणा

गात्तत्क्षितिपात् क्षतजप्रतिमेक्षणः क्षयं निनीषुर्निशितैर्भीमो विव्याधपत्रिभिः सशरार्पितसर्वांगः क्रुद्धो
विव्याध पांडवं नाराचैरर्कसंकाशैर्भीमसेनं स्मयन्निव तस्य नागं मणिमयं रत्नचित्रध्वजे स्थितं भल्लाभ्यां
कार्मुकं चैव क्षिप्रं चिच्छेद पांडवः दुर्योधनं पीड्यमानं दृष्ट्वा भीमेन मारिष चुक्षोभयिषुरभ्यागाद्गोमातंगमस्थिताः
तमापतंतं नागेन्द्रमंबुदप्रतिमस्वनं कुंभांतरे भीमसेनो नाराचैरर्दयाद्दृशं तस्यकायं विनिर्भिद्य न्यमज्जद्धरणीतले
ततः पपात द्विरदो वज्रनिहत इवाचलः तस्यावर्जितनागस्य म्लेच्छस्य च पतिष्यतः शिरश्चिच्छेद भल्लेन क्षिप्रका
री वृकोदरः तस्मिन्निपतिते वीरे संप्रद्रुत महाचमूः संभ्रांताश्वद्विपरथा पदातीनवमर्द्दती तेषनीकेषु भग्ने
षु विद्रवत्सु समंततः प्राग्ज्योतिषस्ततो भीमं कुंजरेणसमाद्रवत् चरणाभ्याम थोद्धीभ्यो सह हस्तेन करेणाच व्याघ
त्तनयः क्रुद्धः प्रगृह्य निर्विपांडवं वृकोदररथंसाश्वमविशेषमचूर्णयत् पद्भ्यां भीमोऽप्यथोधावंस्तस्य गात्रेष्वहो
यताञ्जानन्नञ्जलिकविधिनाप्रक्रामतयाद्रवः गात्राभ्यंतरगो भूत्वा करेणाताडयन्मुहुः लालयामासतं
नागं वधाकांक्षिणमव्ययः कुलालचक्रवन्नागस्तदा तूर्णमथाभ्रमत् नागायुतबलः श्रीमान्कालयानो
वृकोदरं भीमोऽपि निष्क्रम्यततः सुप्रतीकाग्रतोऽभवत् भीमं करेणावनम्य जानुभ्यामन्यपातयत् ग्रीवायां
वेष्टयित्वैनं समजो हंतुमाहत करवेष्टं भीमसेनो भ्रमं दत्वा व्यमोचयत् पुनर्गात्राणि नागस्य प्रविवेश वृको
दरः तावत्प्रति गजायातं स्वबलंप्रत्यवेक्षत भीमोऽपि नागगात्रेभ्यो विनिःसृत्यापयाज्जवात् ततः सर्वस्य सैन्यस्य

द्रोण० दः समभवन्महान् अहो धिग्गिति हतो भीमः कुञ्जरेणेति मारिष। तेन नागेन संत्रस्ता पाण्डवानामनीकिनी सह
३३ सा प्राद्रवद्राजन्यत्रातिष्ठद्वृकोदरः ततो युधिष्ठिरो राजा हतं मत्वा वृकोदरं भगदत्तं सपाञ्चाल्यः सर्वतः समवा
रयत् तं रथैः रथिनां श्रेष्ठाः परिवार्य समन्ततः अवाकिरञ्छरैस्तीक्ष्णैः शतशोऽथ सहस्रशः स विघातं पृषत्का
नां अङ्कुशेन समाचरन् गजेन पाण्डुपाञ्चालान् व्यधमत्पर्वतेश्वरः तदद्भुतमपश्याम भगदत्तस्य संयुगे तथा
वृद्धस्य चरतो कुञ्जरेण विशांपते ततो राजा दशार्णानां प्राग्ज्योतिषमुपाद्रवत् तिर्यग्यातेन नागेन समदेनाशु
गामिना तयोर्युद्धं समभवन्नागयोर्भीमरूपयोः सपक्षयोः पर्वतयोः यथा सद्रुमयोः पुरा अथ भीमोऽपि
वा लब्ध्वा तु राजा निस्त्यसन्त्वरः प्राग्ज्योतिषपतेर्नागः हृतिपद्य त्वपा पार्श्वे दशार्णाधिपतेर्गजं त्वाती
गमपातयत् तोमरैः सूर्यरश्मिकाशैर्भगदत्तोऽथ सप्तभिः जघान द्विरदस्थं तं शत्रुं प्रचलितासनं व्यवछिद्य
तु राजानं भगदत्तं युधिष्ठिरः रथानीकेन महता सर्वतः पर्यवारयत् स कुञ्जरस्थो रथिभिः शुशुभे स
र्वतो वृतः पर्वते वनमध्यस्थो ज्वलन्निव हुताशनः मण्डले सर्वतः श्लिष्टे रथिनामुग्रधन्विनां किरतां श राम
रवर्षाणि स नागः पर्यवर्तत ततः प्राग्ज्योतिषो राजा परिगृह्य महागजं प्रेषयामास सहसा युयुधानरथं
प्रति शिनेः पौत्रस्य तु रथं परिगृह्य महाद्विपः प्रतिचिक्षेप वेगेन युयुधानस्त्वपाक्रमत् बृहतः सैन्धवानश्वा ३३
न्समुत्थाप्य महारथिः सारथिः तस्थौ सात्यकिमासाद्य प्लुतः स्वं रथं प्रति स तु लब्ध्वान्तरं नागस्त्वरितो र

थमण्डलात् निश्चक्राम ततः सर्वान्परिचिक्षेप पार्थिवान् ते त्वाशुगतिना तेन त्रास्यमाना नरर्षभाः तमेकं द्विरदं संख्ये मेनिरे श
तशो द्विपान् ते गजस्थेन काल्यन्ते भगदत्तेन पाण्डवाः ऐरावतस्थेन यथा देवराजेन दानवाः तेषां प्रद्रवतां भीमः पाञ्चालानां
मितस्ततः गजवाजिकृतः शब्दः सुमहान्समजायत भगदत्तेन समरे काल्यमानेषु पाण्डुषु प्राग्ज्योतिषमभिक्रुद्धः पुनर्भी
मः समभ्यपात् तस्याभिद्रवतो वाहान् हस्तमुक्तेन वारिणा सिक्त्वा व्यत्रासयन्नागस्ते पार्थमवहंस्ततः ततस्तमभ्ययात्तूर्णं
रुचिपर्वाकृतिस्ततः समुञ्चञ्छरवर्षाणि रथस्थोऽन्तकसंनिभः ततः स रुचिपर्वाणं शरेणानतपर्वणा सुपर्वा पर्वतपतिर्निन्ये
वैवस्वतक्षयं तस्मिन्निपतिते वीरे सौभद्रो द्रौपदीसुताः चेकितानो धृष्टकेतुर्युयुत्सुश्चार्दयन्द्विपं त एनं शरधाराभिर्धाराभि
रिव तोयदाः शिक्षिता भैरवान्नादान् विनेदुर्जलदा इव ततः पार्ष्ण्यङ्कुशाङ्गुष्ठैः कृतिना चोदितो द्विपः प्रसारितकरः प्राप्ल
वत्कर्णौ दृढं कृत्वा स विष्टाय पदा वाहान् युयुत्सोः सूतमारुजत् युयुत्सुस्तु रथाद्राजन्नपयत्संभ्रमान्वितः ततः पाण्ड
वेयास्तत्र राजेन्द्रं शिषितुं भैरवान्नादान्विनेदुस्ते विजिघांसवः युत्रस्त तं संभ्रान्तः सौभद्रस्यात्मजं तदा रथ
स कुञ्जरस्थो विसृजन्निषून्रिपुषु पार्थिवः बभौ रश्मीन्निवादित्यो भुवनेषु समुत्सृजन् तमार्जुनिर्द्वादशभिर्युयु
त्सुर्दशभिः शरैः त्रिभिस्त्रिभिर्द्रौपदेया धृष्टकेतुश्च विव्यधुः सोऽतिप्रयत्नार्पितैर्वीरो राचितो द्विरदो बभौ संस्यूत इव सूर्यस्य
रश्मिभिर्जलदो महान् नियन्तुः शिल्पयत्नाभ्यां प्रेरितोऽरिशरार्दितः परिविद्धपतन्नागः सव्यदक्षिणतो गोपा
लदण्डेनेव पशुगणान्वत अविघ्नपततोऽमनी भगदत्तस्य भुक्तः द्विग्रेपता भिषत्रा नागा मत्ता मिच चक्रतः

द्रो॰ वभूव पांडवेयानां हर्षो विह्वलतो रणे रक्तं स्रुतं महद्गाजं तत्रैव संमायरो नं सेव रणमार्गो वियति भाति हेडहवो छिन्नः
३४ समुच्छ्रितो मत्वा गात्राणि सेनया सुमुज्जा यथा अति धावति कौतेयं वीथपान्तिवधार्जुनं सनागराजः प्रवर्षलक्षणाह
तः पुरा सपक्षो द्विवरो पृथ्यां तपस्यपतद्गिरिर्युगसमाहमद्रिश्वरिणं जनानां हृषितो यथा रीवः ततो ध्वनिर्द्विरदस्या
श्वा पार्थिवे मेघा इव द्विर्जनितोनि तितेरवैः हितिविपत्वविधि शोरिधिशतत्यास्मान् हयोगात्यार्थिवसंपुगतानः सत
नानागप्रसोपार्थिवा भ्रशं जनो हृष्टिषतापत्नीकितौ पुरास्तु सुमा विबुधैरिवाहवे विरोचनोदेवविनस्थितो मिव हृष्ट
वभौ ज्वलनसमो महाभुजः समरथो अमृगवस्पिच्चेवैसेतिकात तमेकनागं गतप्राशाय थायाज्ञाः समेततो हतासिव
मेतिजनाः इतिश्रीमहाभारते द्रोणपर्वणि भगदत्तवधहितीपहेनि संजय उवाच प्रत्यं पार्थस्य संग्रामे कर्म
विशेषविशेषमि तद्भुतं शृणु महाबाहो यथा योपहृकरीद्रणे रुजो हृष्यासमुद्गतेश्र तच गजनितः भ्वरे भुमृहत्वंवि
कुर्वाणो कौतेयः कृष्णमब्रवीत् यथापास्यो निषां राजा गजेन मधुसूदन त्वरमाणो निर्मितः कृष्णो ततो भवत स्पैषति
स्थितः इन्द्राद् नवरः संस्थ्यार्थिप्यामितिमेमति सचापि शाल्यचा तच सपांडव वले सर्वमपि वे केऽप्याप्यायिष्यति न
हि रक्षिष्टः सहस्रतिगजोयुधि सुवेशस्त्रातिगः सत्यंकृतकर्मा जितक्रमः सहषाक्षेलिपाताना मग्निसहशोस्ह राम
चा तच सपांडववले सर्वं न चित्कृत्वा प्रयिष्यति न वावा न्यासुते सो कि शत्रून्निः प्रतिवाधितुं त्वरमाणस्ततो ३४
या हियतः प्राज्योतिषाधिपः इत्यस्य स्योह्रिपव ना द्रूपसा वापि विक्लित अर्धने प्राप्यामि वल हर्षनोन्नुःप्रणाति

वियंच नारायणरूप सत्तम अपोस मामाचितः दीर्यते भगदत्तेन यत्र पांडव्या हितौ तेष पातेयत्रा नाममहारथाः चत्वारिसहस्राततः
पश्चादाहय तो महारथाः समप्तकाः समाराहत्सहस्राणि चतुर्दश दशैवतु सहस्राणि त्रितौ तेषपातेत गजैना महारथाः
चत्वारि च सहस्राणि वासुदेवसचानुगाः दीर्यमाणं चमेदृष्ट्वा भगदत्तेन मारिष अदृष्ट पमभाग स्यचैतेरभवद्ध्रुवं द्विधा
किन्तु श्रेयस्करं कर्म भवेदघेति चिन्तयन् इहवाविनिवर्ते ये गच्छेयं वा युधिष्ठिरं तस्य वुद्धिर्विचार्येचमर्जुनस्य कुरूद्वह अभ
वद्भूयसी वुद्धिः संसप्तकवधे स्थिरा स संनिवृत्तः सहसा कपिप्रवरकेतनः एको रथसहस्राणि निहंतुं वासवी रणे साहि
दुर्योधनस्यासीन्मतिः सोस्य चोभयोः अर्जुनस्य वधोपाये तेन द्वैधमकल्पयत् सतुद्वैल्लायमानो मध्ये धीमान्वनयोऽ
वाः वधेनतु नराग्र्याणां मकरोन्नमृषा तदा ततः शतसहस्राणि शराणां नतपर्वणां असृजन्नर्जुने राजन् संसप्तकमहा
रथाः नैवकुंती सुतः पार्थो नैवकृष्णो जनार्दनः न हयानयो राजन् हृष्यंते स्म शरैश्चिताः यदा मोहमनुप्राप्तः सस्वेद
नर्दवः ततस्तान्प्रायशः पार्थो व्रजास्त्रेणनिजघ्निवान् शतशः पाणयश्छिन्नाः रथिनश्चापि तत्र हि तो गज्जाः संख्ये सुवर्णः स
कायाः सुकल्पिताः हतारोहाः क्षितौ पेतुः द्विपाः पार्थशराहताः विप्रविद्धा कुशानभाः छन्नभ्रांताः पराश्रवः साऽरोहास्त
रणोपेतुर्ल्पहस्ताशिनार्जुनो भृशं साष्टिंप्राशासि तत्रवराः समुद्गरपरश्वधाः विच्छिन्नवाहवः पेतुर्द्रयो भल्लैः किरीटिना
वाल्यादित्यांवुजेन्दूनां तुल्यरूपाणि मारिषा संछिन्नान्यर्जुनशरैः शिरांस्युर्व्यां प्रपेदिरे जज्वालालंकृतासेना पत्रिभिः प्रा
णिभोजनैः नानारूपैस्तदा मित्रान् क्रुद्धे निघ्नति फल्गुने क्षोभयंतस्तदा सेनां द्विरदो नलिनीमिव धनंजयोन्नतगणाः
साधु साध्विति पूजयन् दृष्ट्वा तत्कर्म पार्थस्य वासवस्येव माधवः विस्मयं परमं गत्वा प्रांजलिस्तमुवाच ह कर्मैतत्

द्रो०ण० र्थशत्रेणापमेन धनंजेन च दृष्ट्वा समरे यत्रेकृत मघेति मे मतिः प्राग्ज्योतिषस्य संग्रामे शतशोथ सहस्रशः यतिता एव संहृष्टा
३५ संसप्तकमहारथाः संसप्तकास्ततो हत्वा भूयिष्ठं ये व्यवस्थिताः नागहत्वापयाहीति कृष्णम्पार्थोभ्यभाषत ततो जवात्
भयतोह्यत इति श्रीमहाभारते द्रोणपर्वणि संसप्तकवधो द्वितीयेहनि संजय उवाच यियासतस्ततः कृष्णः पार्थस्य
श्वान्मनोजवान् सर्वशैक्षसमे लब्धा द्रोणानीकाय सत्वरान् तं प्रयान्तं कुरुश्रेष्ठं स्वान् त्रातुं द्रोणतापितान् सुश
र्मा भ्रातृभिः सार्धं युद्धार्थी पृष्ठतोन्वयात् ततः श्वेतहयः कृष्णमब्रवीदजितंजयः एष मां भ्रातृभिः सार्धं सुशर्मा
ह्वयतेच्युत दीर्यते चोत्तरेणाथ तत्सैन्यं शत्रुसूदन द्वैधीभूतं मनो मेद्य कृतं संसप्तकैरिदं किन्नु संसप्तकान्
हन्मि स्वान् रक्षाम्यहितार्दितान् इति मे त्वं मतं वेत्सि तत्र किं सुकृतं भवेत् एवमुक्तस्तु दाशार्हः स्यन्दनं प्रत्यवाहयत्
येन त्रिगर्ताधिपतिः पांडवं समुपाह्वयत् ततोर्जुनः सुशर्माणं विध्वा सप्तभिराशुगैः ध्वजं धनुश्चास्य तथा क्षुराभ्यां
समकृंतत त्रिगर्ताधिपतेश्चापि भ्रातरं षड्भिराशुगैः साश्वं ससूतं त्वरितः पार्थः प्रैषीद्यमक्षयं ततो भुजंगसंकाशां
सुशर्मा शक्तिमायसीं चिक्षेपार्जुनमादिश्य वासुदेवाय तोमरं शक्तिं त्रिभिः शरैश्छित्वा तोमरं त्रिभिरर्जुनः सुशर्माणं श
रव्रातैः मोहयित्वा न्यवर्तयत् तं वासवमिवायांतं भूरिवर्षं शरौघिणं राजंस्तावकसैन्यानां नोग्रं कश्चिदवारयत् ततो धनंजयो बाणैः राम
सर्वानेव महारथान् आयाद्विनिघ्नन् कौरव्यान् दहन् कक्षमिवानलः तस्य वेगमसह्यं तं कुंतीपुत्रस्य धीमतः नाशक्नुवंस्ते सं ३५
सोढुं स्पर्शमग्नेरिव प्रजाः संवेष्टयन्नथानीकानि शरवर्षेण पांडवः सुपर्णपातवद्राजन्नायात् प्राग्ज्योतिषं प्रति तत्तदानामय
जिह्मभृतां नामपायिनां धनुः हेमकं रक्षोद्विषतामसुवर्हनं तदैव तव पुत्रस्य राजन् दुर्द्यूतदेविनः कृते क्षत्रविनाशाय धनुरा

यच्छदर्जुनः तथाभिद्राव्यमाणानां पार्थेन तव वाहिनी व्यपतद्दृश्यमानानामापद्गतीति गोरथः आर्द्धतार्थं युद्धे भारं सर्वमसहो यु
धि यथा नत्ववनं क्रुद्धः प्रभिन्नः षष्टिहायनः मृद्गीयात्तद्वदापन्नः पार्थोमृद्गच्चमूं तव तस्मिन् प्रमथिते सैन्ये भगदत्तो नराधिपः ते
नतामेव सहसा धनंजयमुपाद्रवत् तं रथेन नरव्याघ्रः प्रत्यगृह्णाद्धनंजयः समन्निपातस्तुमुलो बभूव रथनागयोः कल्पिताभ्याय
थाशास्त्रं रथेन च गजेन च संग्रामे चेरतुर्वीरौ भगदत्त धनंजयौ ततो जीमूतसंकाशान्नागादिंद्र इव प्रभुः अभ्यवर्षच्छरौघेण भग
दत्तो धनंजयं सचापि शरवर्षं तं शरवर्षेण वासविः अप्राप्तमेव चिच्छेद वीर्यवान् ततः प्राग्ज्योतिषो राजा शरवर्षं निवार्य त
त् शरैर्जघ्ने महाबाहुः पार्थं कृष्णं च मारिष ततस्तु शरजालेन महता भ्यवकीर्य तौ चोदयामास तं नागं वधायाच्युतपा
र्थयोः तमापतंतं द्विरदं दृष्ट्वा क्रुद्धमिवांतकं चक्रेपसव्यं त्वरितः स्यंदनेनाहपांश्चारुह्यमभिष प्राहिणोन्मृत्युलोकाय तत्तोप
हनेव जनार्दनः संप्राप्तमपि नेयेष परावृत्तं महाद्विपं सारोहं मृत्युसात्कर्तुं स्मरन् धर्मं धनंजयः स तु नागो द्विपरथान् हयांश्चा
रूपमभिष प्राहिणोन्मृत्युलोकाय ततोप्यहद्धनंजयः इति श्रीमहाभारते द्रोणपर्वणि भगदत्तवधे द्वितीयेहनि धृतराष्ट्र
उवाच तथा क्रुद्धः किमकरोद्भगदत्तस्य पांडवः प्राग्ज्योतिषो वा पार्थस्य तन्मे शंस यथातथं संजय उवाच प्राग्ज्यो
तिषेण संसक्तावुभौ दाशार्हपांडवौ मृत्युदंष्ट्रांतिकं प्राप्तौ सर्वभूतानि मेनिरे तथा तु शरवर्षाणि पातयत्यनिशं प्रभो गजस्कं
धान्महाराज कृष्णयोः स्यंदनस्थयोः अथ कार्ष्णायसैर्बाणैः पूर्णकार्मुकनिःसृतैः अविध्यद्देवकीपुत्रं हेमपुं
खैः शिलाशितैः अग्निस्पर्शसमास्तीक्ष्णा भगदत्तेन चोदिताः निर्भिद्य देवकीपुत्रं क्षितिं जग्मुः सुवाससः तस्य पार्थो
धनुश्छित्वा परिवारं निहत्य च लालयन्निव राजानं भगदत्तमयोधयत् सोर्करश्मिनिभांस्तीक्ष्णान् तोमरांश्च चतुर्दश

Indira Gandhi National Centre for the Arts

द्रोण॰ ऽप्रैयत्तस्य सञ्चीत्तु द्विपे केकम स्थापितत ततो नागस्य तस्य मर्म्मस्वभ्यमत्याकर्णान्तैः शरजालेन महता तच्छादीपतभ्रतले
३६ विशीर्णाङ्ग इव मा सगजः शरैः सुभद्रजमहितः वमन् धाराः तिपाती नोऽभ्रमाः पर्वतराडिव ततः प्राग्ज्योतिषः शरैः विव्याध हृदि
निहेमदण्डा मपत्रयो मुसृजद्दीप्तस्तेवाण द्विधा तामर्ज्जुनोच्छित ततः छत्रध्वजं चैव छित्वा पार्थोर्ज्जुनः शरैः विव्याध दशभिस्तूर्णा
निहेमदण्डामपत्रयी मुमुजत्। सुरेवापद्विधा तामर्ज्जुनो छित ततः छत्रध्वजं चैव छित्वा पार्थोर्ज्जुनः शरैः विव्याध दशभिस्तूर्णा
स्तमपर्वतेश्वरं सोऽतिविद्धोर्ज्जुनशरैः सुपुंखैः कंकपत्रिभिः भगदत्तस्ततः क्रुद्धः प्राग्ज्योतिषजनाधिप व्यसृजत्तोमरान्मूर्ध्नि श्वेताश्व
स्याऽव्रवाहच ते अर्ज्जुनस्य समरे किरीटं परिवर्त्तितं परिवृत्तकिरीटं तत्तस्मिन्पतिते न पाण्डवः सुदृष्टः क्रियतां लोक इति राजानम
ब्रवीत् एवमुक्तस्तु संक्रुद्धः शरवर्षेण पाण्डवं अभ्यवर्षत्स गोविंदं धनुरादाय भास्वरं तस्य पार्थो धनुश्छित्त्वा तूणीरान्सं
निकृत्य च त्वरमाणो द्विसप्तत्या सर्वमर्मस्वताडयत् विद्धस्तथाप्यव्यथितो वैष्णवास्त्रमुदीरयत् अभिमंत्र्यांकुशं क्रुद्धो
व्यसृजत्पाण्डवोरसि अर्ज्जुने तेन अस्त्रं विसृष्टं वे समासाद्य ते हाहाकारः समभवद्देवानामपि संयुगे तदस्त्रमुद्यतं दृष्ट्वा वासुदे
वः प्रतापवान् अर्ज्जुनं प्रच्छाद्य ततः कृत्वा प्रतिजग्राह वीर्यवान् विसृष्टं भगदत्तेन तदस्त्रं सर्वघाति वै उरसा प्रतिजग्राह
पार्थं संछाद्य केशव वैजयन्त्यभवन्माला तदस्त्रं केशवोरसि ततोऽर्जुनः क्लान्तमनाः केशवं प्रत्यभाषत अयुध्यमानस्तुर राम
गान्संयन्तास्मीति जनार्दन इत्युक्त्वा पुंडरीकाक्ष प्रतिज्ञां स्वां न रक्षसि यद्यहं व्यसनी वा स्यामशक्तो वा निवारणे ततस्त्वया ३६
वकार्यं स्यान्नो कार्यमपस्थिते सबाणः सधनुष्चाहं ससुरासुरमानुषान् शक्तो लोकानिमान्जेतुं तच्चापि विदितं तव ततो
र्ज्जुनं वासुदेवः प्रत्युवाचार्थवद्वचः शृणु गुह्यमिदं पार्थ पुरा वृत्तं यथानघ चतुर्मूर्तिरहं शश्वल्लोकत्राणार्थमुद्यतः आत्मा
नं प्रविभज्येह लोकानां हितमादधे एका मूर्तिस्तपश्चर्यां कुरुते मे भुवि स्थिता अपरा पश्यति जगत्कुर्वाणं साध्वसाधुनी अपरा कु

रुते कर्म मानुषं लोकमाश्रितः शेते चतुर्थी त्वपरा निद्रां वर्षसहस्रिकीं यासौ वर्षसहस्रान्ते मूर्तिरुत्तिष्ठते मम वरार्हेभ्यो वरान्श्रेष्ठां
स्तस्मिन्काले ददाति सा तं तु कालमनुप्राप्तं विदित्वा पृथिवी तदा अयाचत वरं यं मां नरकार्थाय तच्छृणु देवानामसुराणां च अवध्य
स्तनयोऽस्तु मे उपेतो वैष्णवास्त्रेण तन्मे त्वं दातुमर्हसि एवं वरमहं श्रुत्वा जगत्यास्तनये तदा अमोघमस्त्रमददं वैष्णवं परमं पुरा
अवोचं चैतदस्त्रं वै ह्यमोघं भवतु क्षमे नरकस्याभिरक्षार्थं नैनं कश्चिद्वधिष्यति अनेनास्त्रेण ते गुप्तः सुतः परबलार्द्दनः भविष्यति
दुराधर्षः सर्वलोकेषु सर्वदा तथेत्युक्त्वा गता देवी कृतकामा मनस्विनी स चाप्यासीद्दुराधर्षो नरकः शत्रुतापनः तस्मात्प्राग्ज्योति
षं प्राप्तं तदस्त्रं पार्थ मामकं नास्यावध्योऽस्ति लोकेषु सेन्द्ररुद्रेषु मारिष तन्मया त्वत्कृते नैतदन्यथा व्यपनायितं विमुक्तं परमा
स्त्रेण जहि पार्थ महासुरं वैरिणं युधि दुर्द्धर्षं भगदत्तं सुरद्विषं यथाहं जघ्निवान्पूर्वं हितार्थं नरकं तथा एवमुक्तस्ततः पार्थः के
शवेन महात्मना भगदत्तं शितैर्बाणैः सहसा समवाकिरत ततोऽकांचनसंछन्नो विशिखः कर्मवित्तिर्मितो सोऽवर्षास्त्रं खला
न्दहन्मघः विच्छिद्य पाण्डवः स घोरशरघातेन वज्रनिःपेषसंयुतः पपात हस्तपतितं वज्रं विवस्वसुज्वलं हस्तिराजपिहितान्
राजवद्घनवाणेः किरीटिना पपात हस्तसंधानं नागत्वात्सर्पवद्वृक्षितो भगदत्तेन निर्मुक्तः सुप्रतीकोऽपि वेगवान् हतुमन्य
पर्विवस्फुरन्नार्थमिवोत्सुकः ततः पार्थो महाबाहुरसंभ्रान्तो महामनाः कुंभयोरंतरे नागं नाराचेन समार्पयत स समासा
द्य तं नागं बाणो वज्र इवाचलं अभ्यगात्सह पुंखेन वल्मीकमिव पन्नगः स करी भगदत्तेन प्रेर्यमाणो मुहुर्मुहुः न क
रोति वचस्तस्य दरिद्रस्येव योषितः स तु विष्टभ्य गात्राणि दंताभ्यामवनीं ययौ नदन्नार्त्तस्वरं प्राणानुत्ससर्ज महाद्विपः
ततः शरेणार्द्धचंद्रेण नागोनतपर्वणा बिभेद हृदयं राज्ञो भगदत्तस्य पाण्डवः स भिन्नहृदयो राजा भगदत्तः किरीटिना

२

द्रोणा० ३७

शमरासनं शरांश्चैव तावतासुः प्रमुमोच ह शिरस्त्रस्य विभ्रंशं पपात च महीं भुवं तालमात्रं ततो विभ्रष्टं पताकाशोभितं दिवसहेममाली
तपनीयभांडात्पपात त्वगाद्रिरिवाग्निकाशात् सुपुष्पितो मारुतवेगरुग्णो महीधराग्रादिव कर्णिकारः निहत्य तं नरपतिमिंद्रविक्र
मं सखायमिंद्रस्य तदैंद्रिराहवे ततः परांस्तव जयकांक्षिणो नरान्बभंज वायुर्बलवान्द्रुमानिव इति श्री महाभारते द्रोणपर्वणि भगदत्तवधः
संजय उवाच पूर्वं हैत्य महावीरं भगदत्तं महाबलं कस्मैहासौ हार्हवीभत्सं जयतु युधि दुर्जयो नानायुतवः लक्षणं गजस्य माहवशोभिते
सुप्रतीके पि क्ववचाध्वे भगदत्ते न्ताप्राप्तसमोक्तोवै समवाप्तेरणसंयुक्तो अंकुशेन च वीर्यवान् त्रीशिकेतज्ञा स्थितत्रैवक्त्रेताभि
निव चाध्वे भगदत्तं महाशूरं को हत्वा दर्जुनं विना अर्जुनोऽपि महावीर्यो हत्वा पक्षमवस्थितः हृत्तः प्रधर्मविविचित्ताः अविधिविधिव
चाब्रवीत् तमाहित्य समरं को नाम भूमौ निपातितं हि वः प्रसमीक्ष्य यथा काम्यं विना ताम्प्रव युद्धिते संजय उवाच प्रियमिंद्रस्य सततं
सखायममितौजसं हत्वा प्राग्ज्योतिषं पार्थः प्रदक्षिणमवर्त्तत ततो गांधारराजस्य सुतौ परपुरंजयौ आर्द्देतामर्जुनं संख्ये
भ्रातरौ वृषकाचलौ तौ समेत्यार्जुनं वीरौ पुरः पश्चाच्च धन्विनौ अविध्येतां महावेगैर्निशितैराशुगैर्भृशं वृषकस्य हयान्सू
तं धनुश्छत्रं रथं ध्वजं तिलशो व्यधमत्पार्थः सौबलस्य शितैः शरैः ततोऽर्जुनः शरव्रातैर्नानाप्रहरणैरपि गांधारानाकुला राम
न्वृषके सोऽचलप्रमुखान्पुनः ततः पंचशतान्वीरान्गांधारानुद्यतायुधान् प्राहिणोन्मृत्युलोकाय क्रुद्धो बाणैर्धनंजयः ३७
हताश्वात्तु रथात्तूर्णं अवतीर्य महाभुजः आरुरोह रथं भ्रातुरन्यच्च धनुराददे तावेकरथमारूढौ भ्रातरौ वृषकाचलौ शरवर्षेण वी
भत्सुमविध्येतां मुहुर्मुहुः स्यालौ तव महात्मानौ राजानौ वृषकाचलौ भृशं निजघ्नतुः पार्थमिंद्रं वृत्रबलाविव लब्धलक्ष्यौ तु गांधा
रावहतां पांडवं शरैः निदाघवार्षिकौ मासौ लोकं घर्मांबुभिर्यथा तौ रथस्थौ नरव्याघ्रौ राजानौ वृषकाचलौ संश्लिष्टांगौ स्थितौ राजन्नर्जु

नानेकेषुणार्जुनः तौ रथात्सिंहसंकाशौ लोहिताक्षौ महाभुजौ गतासू पेततुर्वीरौ सोदर्यावेकलक्षणौ तौ भूमिंयातौ देहौ वंधुजनप्रि
यौ रथात् यशो दशदिशः पुण्यंमपित्वात्मवस्थितौ दृष्ट्वा विनिहतौ सख्यौ मातुलौ पतनिपौ भृशं मुमुचुरस्त्राणि पुत्रास्तव
विशांपते निहतौ भ्रातरौ दृष्ट्वा मायाशतविशारदः कृष्णौ संमोहयन्मायां विदधे शकुनिस्ततः लगुडायोगुडाश्मानः शतघ्न्य
श्च सशक्तयः करिणो विशिखाः प्राशाः प्रविविधान्यायुधानि च प्रपेतुः शतशो दिव्याः अहिः स्माज्जुनं प्रति खरोष्ट्रमहिषाः
सिंहाः व्याघ्राः सृमरचिल्लकाः ऋक्षाः शालावृका गृध्राः कपयश्च सरीसृपाः विविधानि च रक्षांसि क्षुधितान्यर्जुनं प्रति
संक्रुद्धान्यभ्यधावन्त विविधानि वयांसि च ततो दिव्यास्त्रविच्छूरः कुंतीपुत्रो धनंजयः विसृजन्निषुजालानि सहसा तान्यपा
इयत्ते हन्यमानाः शूरेण प्रवरैः सायकैर्दृढैः विरुवन्तो महारावं विनेशुः सर्वतोमुखं ततस्तमः प्रादुरभूदर्जुनस्य रथं प्रति
तस्माच्च तमसो वाचः क्रूराः पार्थमभर्त्सयन् तत्तमोऽतिभयं घोरं भयकर्त्तृ महाहवे उत्तमास्त्रेण महता ज्योतिषेणार्जुनोऽवधीत्
हते तस्मिन्जलौघाः प्रादुरासन्भयानकाः अंभसस्तस्य नाशार्थमादित्यास्त्रमथार्जुनः प्रायुंक्ताभ्यस्तेनास्त्राप्रशो
त्रेणाशोषितं एवं बहुविधा मायाः सौबलस्य कृताः कृताः जघानास्त्रबलेनाशु प्रहसन्नर्जुनस्तदा तथा हतासु मायासु
त्रस्तोऽर्जुनशराहतः अपायाज्जवनैरश्वैः शकुनिः प्राकृतो यथा ततोऽर्जुनोऽस्त्रविच्छ्रैष्ठ्यं दर्शयन्नात्मनोऽरिषु अभ्य
वर्षच्छरौघेण कौरवाणामनीकिनीं सा हन्यमाना पार्थेन तव पुत्रस्य वाहिनी द्वैधीभूता महाराज गंगेवासाद्य पर्वतं
द्रोणमेवान्वपद्यंत केचित्तत्र नरर्षभाः केचिद्दुर्योधनं राजन्नर्द्यमानाः किरीटिना नापश्याम स्ततः सैन्यं वै रजसा
वृते गांडीवस्य च निर्घोषः श्रुतो दक्षिणतो मया शंखदुंदुभिनिर्घोषं वादित्राणां

Indira Gandhi National
Centre for the Arts

द्रोण० ३८ वतिः प्रवृत्तं गांडीवस्य तिर्निर्घोषो ह्यतिक्रम्य स्वनं दिवं ततः पुनर्दक्षिणतः संग्रामश्चित्रयोधिनोः सुमहानर्जुन
स्यासीद्दृढं च द्रोणस्य च पार्थिवाः युधिष्ठिरपतीकानि पुर्दहतिततस्ततः नानाविधान्यनीकानि पुत्राणां तव भारत
अर्जुनो व्यधमत्काले दिवीवाभ्राणि मारुतः तं वासवमिवायांतं भूरिवर्षं शरौघिणं महेष्वासं नरव्याघ्रं नोग्रं कश्चि
द्वारयत् ते हन्यमाना पार्थेन त्वदीया व्यथिता भृशं स्वानेव घ्नंतो जग्मुर्विद्रवंतस्ततस्ततः तेर्जुनेन शरा मुक्ताः कं
कपत्राश्शत्रुच्छिदः शलभा इव संपेतुः संवृण्वाना दिशो दश तुरंगान्रथिनो नागान्पदातीनपि मारिष विनिर्भिद्य क्षिति
जग्मुर्वल्मीकमिव पन्नगाः न च द्वितीयं व्यसृजत्कुंजराश्वनरेषु च पृथगेकशराग्धानि निपेतुस्ते गतासवः
हतैर्मनुष्यैर्द्विरदैश्च सर्वतः शराभिवृष्टैश्च हयैर्निपातितैः तदा श्वगोमायुबलाभिनादितं विचित्रमायोधन
शिरो बभूव तत् पिता सुतं त्यजति सुहृद्वरं सुहृत् तथैव पुत्रः पितरं शरातुरः स्वरक्षणे कृतमतयस्तदा जनास्त्यजंति
वाहानपि पार्थपीडिताः इति श्रीद्रोणपर्वणि शकुनिपराजये धृतराष्ट्र उवाच तेष्वनीकेषु भग्नेषु पांडुपुत्रेण संज
य चलितानां द्रुतानां च कथमासीन्मनो हि वः १ अनीकानां प्रभग्नानामवस्थानमपश्यतां दुष्करं प्रतिसंधानं तन्म
मामाचक्ष्व संजय संजय उवाच तथापि तव पुत्राणां प्रियकामो विशांपते यशः प्रवीरो लोकेषु रक्षन्द्रोणोन्वपद्यत समरे
युद्धे समुद्यतेष्वाजौ प्रहृष्टेषु सुसंभ्रांतेषु युधिष्ठिरे अकुर्वन्नार्यकर्माणि भैरवे सति भीतवत् अंतरं भीमसेनस्य प्रापत ३८
त्रमितौजसः सात्यकेश्चैव वीरस्य धृष्टद्युम्नस्य वा विभो द्रोणं द्रोणमिति क्रूराः पांचालाः समचोदयन् मा द्रो
णमिति पुत्रास्ते कुरून्सर्वानचोदयन् द्रोणं द्रोणमिति ह्येके मा द्रोणमिति चापरे कुरूणां पांडवानां च द्रोणद्यूत

मभवत् यं यं प्रभजते वीरः पांचालानां रथव्रजं तत्र तत्र स्म पांचाल्यो धृष्टद्युम्नोऽभ्यवर्तत यथाभागवि
पर्यासे संग्रामे भैरवे सति वीराः समासदन्वीरान्गर्जंतो भैरवान्रवान् अकंपनीयाः शत्रूणां बभूवुस्तत्र
पांडवाः अकंपयंस्त्वनीकानि स्मरंतः क्लेशमात्मनः ते त्वमर्षवशं प्राप्ता ह्रीमंतः सत्त्वचोदिताः त्य
क्त्वा प्राणान्न्यवर्तंत घ्नंतो द्रोणं महाहवे अयसामिव संपातः शिलानामिव चाभवत् दीव्यतां तुमुले यु
द्धे प्राणैरमिततेजसां न तु स्मरंति संग्राममपि वृद्धास्तथाविधं दृष्टपूर्वं महाराज श्रुतपूर्वमथापि वा
प्रकंपतेव पृथिवी तस्मिन्वीरावसादने प्रवर्तता बलौघेन महता भारपीडिता घूर्णतो हि बलौघस्य दिवं
स्तब्ध्वेव निःस्वनः अजातशत्रोस्तत्सैन्यमाविवेश सुभैरवः समासाद्य तु पांडूनामनीकानि सहस्रशः द्रो
णेन चरता संख्ये प्रभग्नानि शितैः शरैः तेषु प्रमथ्यमानेषु द्रोणेनाद्भुतकर्मणा पर्यवा

Indira Gandhi National
Centre for the Arts

द्रो० ३९ रथरथा मापद्रोणं सेनापतिः स्वयं । तत्राद्भुतमभूद्युद्धं द्रोणपांचाल्ययोस्तदा नैवतस्योपमा काचिदिति मे निश्चि-
तामतिः तथा नीलो नलवत्प्रोदद्दाह कुरुवाहिनीं शरस्फुलिंगश्चापार्चिः सुदहन्कक्षमिवा-
नलः तं दहंतमनीकानि द्रोणपुत्रः प्रतापवान् पूर्वाभिभाषी श्लक्ष्णः स्मयमानोऽभ्यभा-
षत नील किं बहुभिर्दग्धैस्तव योधैः शरार्चिषा मयैकेन हि युध्यस्व क्रुद्धः प्रहर चाशु वै तं
पद्मनिकराकारं पद्मपत्रनिभेक्षणं । व्याकोशपद्माभिमुखं नीलो विव्याध सायकैः तेनविद्धस्ततः सह-
साद्रौणिर्भल्लैः सितैस्त्रिभिः धनुर्ध्वजं च छत्रं च द्विषतः समकृंतत सोऽवप्लुत्य रथात्तस्मान्नीलश्च- प: ३९
र्मवरासिधृक् । द्रौणायनेः शिरः कायाद्धर्तुमैच्छत्पतत्रिवत् तस्योद्यतासेः सुनसं शिरः कायात्सकुंड-
लं भल्लेनापाहरद्द्रौणिः स्मयमान इवानघ संपूर्णचंद्राभिमुखः पद्मपत्रनिभेक्षणः प्रांशुरुत्पलगर्भाभो नि-
हतो न्यपतत् क्षितौ ततः प्रविव्यथे सेना पांडवी भृशमाकुला आचार्यपुत्रेण हते नीले ज्वलिततेजसि अचिंतयंश्च ते सर्वे

पांडवानां महारथाः कथं नो वासविस्त्राणाच्छत्रुभ्यः स्यादिति प्रभो २८ दक्षिणेन तु सेनायाः कुरुते कदनं बली संशप्तकावशेषस्य नारायणब-
लस्य च २९ इति द्रोणपर्वणि ३९ संजय उवाच प्रतिघातं तु सैन्यस्य नामृष्यत वृकोदरः सोऽभ्याहनद्गुरुं षष्ट्या कर्णं च दशभिः
शरैः १ तस्य द्रोणः शितैर्बाणैस्तीक्ष्णाग्रैरजिह्मगैः जीवितांतमभिप्रेप्सुर्मर्मण्याशु जघान २ आनंतर्यमभिप्रेप्सुः षड्विंशत्या समा-
र्पयत् कर्णो द्वादशभिर्बाणैरश्वत्थामा च सप्तभिः ३ षड्भिर्दुर्योधनो राजा तत एनमथाकिरत् भीमसेनोऽपि तान्सर्वान्प्रत्यविध्यन्महाब-
लः ४ द्रोणं पंचाशतेषूणां कर्णं च दशभिः शरैः दुर्योधनं द्वादशभिर्द्रौणिमष्टाभिराशुगैः ५ आरावं तुमुलं कुर्वन्नभ्यवर्तत तान्रणे तस्मि-
न्संत्यजति प्राणान्मृत्युसाधारणीकृते ६ अजातशत्रुस्तान्योधान्भीमं त्रातेत्यचोदयत् ते ययुर्भीमसेनस्य समीपममितौजसः युयुधानप्र-
भृतयो माद्रीपुत्रौ च पांडवौ ७ ते समेत्य सुसंरब्धाः सहिताः पुरुषर्षभाः ८ महेष्वासवरैर्गुप्तं द्रोणानीकं विभित्सवः समापेतुर्महावीर्याः
भीमप्रभृतयो रथाः ९ तान्प्रत्यगृह्णादव्यग्रो द्रोणोऽपि रथिनां वरः महारथानतिबलान्वीरान्समरयोधिनः १० बाह्यं मृत्युभयं कृत्वा तावका
पांडवान्ययुः सादिनः सादिनोऽभ्यघ्नंस्तथैव रथिनो रथान् ११ आसीच्छक्त्यसिसंपातो युद्धमासीत्परश्वधैः प्रकृष्टमसियुद्धं च बभूव कटुकोदयम् १२
कुंजराणां च संपाते युद्धमासीत्सुदारुणं अपतत्कुंजरादन्यो हयादन्यस्त्ववाक्शिराः १३ नरो बाणविनिर्भिन्नो रथादन्यश्च मारिष तत्राम्-
न्यच्च संमर्दे पतितस्य विवर्मणः १४ शिरः प्रध्वंसयामास वक्षस्याक्रम्य कुंजरः अपरांश्चापरे मृद्नंति वारणाः पतितान्नरान् १५ विषाणैश्चा-
वनिं गत्वा व्यभिंदन्रथिनो बहून् नरांत्रैः केचिदपरे विषाणालग्नसंस्थितैः १६ बभ्रमुः समरे नागा मृद्नंतः शतशो नरान् कार्ष्णायसतनुत्रा-

द्रो
५०
ग्रामाद्रामन्नरथ्यकुंजरान् १७ पतितान्योथयंश्च कुर्द्विपाः स्खलत्तलानिव गम्भपन्नाश्चिन्नांसामित्रायनानिनराधिपा १८ छीमंतः
कालसंपक्कीतदुःखामनुधारते हंतिस्मात्रपितापुत्रं रथेनाप्यसंयुगे १९ पुत्रस्तु पितरंमोहान्निर्म्मर्यादमवर्त्तत रथोनग्रीव
ज्छिन्नस्य त्रमुत्तमांनिपातिते २० पुत्रोद्धिछिन्नमारात्प्रमद्राव्रतयाहृपः सासिनाद्धानि पतितःशिरश्छिन्नंसकुंडलं २१ गजेनान्निप
वल्गिनाथः सद्यूतोत्नहितो रथिनाताडितोनागोनागेनापतितहितो २२ मरोहस्थापतद्दन्ती गजेनाप्याहतोप्यश्वनिम्मर्यादमा
हयुद्धमवर्त्तत सुदारुणं २३ हातातहापुत्र सखेक्वासिविविष्टकथावसि महाराहजमेनोस्मितल्लंडितगर्जिते २४ उत्सेवमुद्धांतिस्म
मंवेतेविविधानि हृनरास्सोम्बसनागसासमजतयोगिते २५ उपाशाम्यद्रजोभौमंभीरूनकश्मलमाविशत् चक्रोगावक्रमासाधवा
रोपारस्मसंयुगे २६ ध्वताते स्वपश्येकालेन्द्रहोरराग हप्याशिरःश्याशाकेरापरामर्षोमुष्टिपुद्धे वराहलो २७ नरेन्द्रेतेस्वमूरागांमहीप राम·
हापमिछ्ठतो तत्राछिघतस्त्रस्मस्मरद्वौबाहूरुणम २८ सर्वनुस्थापरस्यापिसत्वरःसांकुशसत्याश्चाकोपाद्रममसोचतथास्माविं ५०
तथान्नोविमुलोदृवत् २९ अनःस्मान्नसचामम्यस्थिरःकायाद्यपाहरत् सशत्रुममवस्थाम्भशद्वाद्रमोचमद्वतो ३० स्वानमोथपरा
नसोनघानविशितैःशरैः गिरिःशृंगोपमस्थात्रवाराचोःननिपातितः ३१ मांतगोनापतद्भूमोनदीरोधद्ववौस्मगे तथेवरथिनोना
गन्द्वारज्ञागिरिःबारुजात् ३२ अमातिष्ठस तान्नूमोमहान्मसहमाद्धि श्वानुमहरतोहस्माक्रुतान्स्वानरुभिरोजितान् ३३ बद्दनमा
विशल्कोहोभारन्नद्रपतुकेशान् सवंमाविन्नममवद्वमा तापवकिंवन ३४ सेनेनरजमाध्वसंनिर्म्मर्यादमवर्त्तत ततःसेना

पतिः पाण्डुमपंकालरात्रिमिवव ३५ कुर्वतः शासनं तस्य पोरवाबाहुशालिनः सरोहं सार्वापतुर्मतोद्रोणस्यस्थमति ३६ गहत्वानार
वतामोमंविभीतानिनिस्ततः स्मासान्तुमुलः शब्दोहर्षस्यसमपद्यत ३७ ततोद्रोणः कृपः कर्णोद्रोणीराजाजयद्रथः विंदानुविंदावा
वंतोशल्यश्चेतामवारयन् ३८ तेनार्यधर्म्मसंरब्धादुर्निवारादुरासदाः शरार्त्तानजहुर्द्रोणंपाञ्चालाःपांडवैःसह ३९ ततोद्रोणोतिसं
क्रुद्धोविसृजंश्शतशःशरान् चेदिपांचालपांडूनामकरोत्कदनंमहत् ४० तस्यज्यातलनिर्घोषःशुश्रुवेदिक्षुमारिष वज्रसंह्राद
संकाशस्त्रासयन्मानवान्बहून् ४१ एतस्मिन्नंतरेजिष्णुर्जित्वासंशप्तकान्बहून् अभ्ययात्तत्रयत्रासौद्रोणःपांडून्प्रमर्दति ४२
तांछरौघान्महावर्त्तान्शोणितोदान्महाह्रदान् सोर्णःसंशप्तकान्हत्वाप्रत्यदृश्यतफाल्गुन ४३ तस्यकीर्त्तिमतोलक्ष्मसूर्यप्रति
मतेजसः दीप्यमानमपश्यामतेजसावानरध्वजं ४४ संशप्तकसमुद्रंतमुच्छोष्यास्त्रगभस्तिभिः सपांडवयुगान्तार्कःकुरूनप्यभ्यतापय
त् ४५ प्रददाहकुरून्सर्वानर्जुनःशस्त्रतेजसा युगान्तेसर्वभूतानिधूमकेतुरिवोत्थितः ४६ तेनबाणसहस्रौघैर्गजाश्वरथयोधि
नःताड्यमानाःक्षितिंजग्मुर्मुक्तकेशाःशरार्दिताः ४७ केचिदार्त्तस्वनंचक्रुर्विनेशुरपरेपुनः पार्थबाणहताःकेचिन्निपेतुर्विगता
सव ४८ तेषामुत्पतितान्कांश्चित्पतितांश्चपराङ्मुखान् नजघानार्जुनोयोधान्योधव्रतमनुस्मरन् ४९ तेविकीर्णरथाश्चित्रा
ःप्रायशश्चपराङ्मुखाः कुरवःकर्णकर्णेतिहाहेतिचविचुक्रुशुः ५० तमाधिरथिराक्रंदंविज्ञायशरणैषिणां माभैरितिप्रतिज्ञाय
ययावभिमुखोर्जुनं ५१ सभारतरथश्रेष्ठःसर्वभारतहर्षणः प्रादुश्चक्रेतदाग्नेयमस्त्रमस्त्रविदांवरः ५२ तस्यदीप्तशरौघस्यदीप्तचापध
रस्यच शरौघाञ्छरजालेनविदुधावधनंजयः ५३ तथैवाधिरथिस्तस्यबाणाञ्ज्वलिततेजसः अस्त्रमस्त्रेणसंवार्यप्राणदद्विसृजञ्छरा
न् ५४ धृष्टद्युम्नश्चभीमश्च ... केश्चमहारथः विव्यधुःकर्णमासाद्यत्रिभिस्त्रिभिरजिह्मगैः ५५ अर्जुनोस्त्रंतुराधेयः सेनापं कर्णस्यप्रति

Indira Gandhi National
Centre for the Arts

द्रो. तेषां त्रयाणां चापानि निकृत्य विशिखैस्त्रिभिः ५६ ते निकृत्तायुधाः शूरा निर्विषा भुजगा इव रथानुत्सृज्य सहसा समुद्दिश्य मृगं सिंहा
४१ इवानदन् ५७ भुजा मे महावेगा वनिस्त्रिंशा भुजगोपमाः स्फीयमाना महाशक्तीः जगृहुर्विधिवत्तदा ५८ तान्त्रिक्रमतस्तानेतानभितो विभि
रजितो गैनवादवल वानुकर्णाः पार्थाः पाविस्रजन् स्थाने अर्जुनस्यापि राधेय विधासमप्राप्तो गैः ५९ कर्णोत्स्व हतं जगतो जया
न निशितैः शरैः ततः शत्रुंजयं हत्वा पार्थः षडिर जितो गैः ६० उहार सद्योन स्वेन विपाठ सशिरो रथात् पश्यतां धार्तराष्ट्राणा
मेकेनैव किरीटिना ६१ प्रमुखे सूतपुत्रस्य सोदर्यो निहतास्त्रयः ततो भीमः समुत्पत्य स्वरथाद्वैनतेयवत् ६२ वरासिना कर्ण
पक्षात्तृजघान दशपंचच पुनः स्वरथमास्थाय धनुरादाय चापरं ६३ विव्याध दशभिः कर्णं सूतं च दशभिः शरैः धृष्टद्युम्नोथ
पत्राता जघान दश पंचच पुनः स्वरथमास्थाय धनुरादाय चापरं ६४ जघान चैव कर्मांगान्वरहस्तेन चैव पंच ततः स्वरथमास्थाय धार्तराष्ट्र काल्मुकं ६५ आदाय
मिव दंष्टमिवा हापतास्तरं ६५ जघान चेदकर्माणं च कृहस्तेन चैवपंभं ततः स्वरथमास्थाय पांचाल्योम्सच्च कार्मुकं ६५ आदाय
करुंति विभावत्रिस नमानदन्तरो श्रोनेपोयमनाहाप धनुर्द्रुमसमद्युतिः ६६ स तु पुत्रेण पुत्रः स शार्दूलसिंह इवानदत् महा रुण·
कर्मा ति भीमो त्रिसप्त मानसद्धरो ततो दुर्योधनो द्रोणो राजा चैव जयद्र ४१
थः साधुमुक्ता सोधिता कर्णस्य कार्मुकं ६७ पुनः कर्णस्त्रिभिर्वीरो वाहेकाश्ववाहपत ततो दुर्योधनो द्रोणो राजा चैव जयद्र
थः ६७ निमज्जमानं राधेयमुज्जहुः साग्सकार्णवात् पतन्त्यश्च धनो भानामात रापाः ग़ततवो परे ६८ कर्ण मेवाभ्यधावंत त्रासपाना
महाराजः धृष्टद्युम्नप्रमादस्त्सो जगदो ग्यौ नवरच ६९ नकुलः सहदेवश्च सात्यकिं जगुहुस्तदा एवमेष महारौद्रः स्तपार्थिव
वैवभिनां ७० ताव कानां परेषां च प्रमत्तानां क्षयो मतः पदातिरथनागाश्च गजाश्वा रथपत्तिभिः ७१ रथिनो नागपत्ति
भिर्युक्तात्र यहितैःः ७२ संयुक्ताः समदृश्यंत पत्तयश्चापि पत्तिभिः एवमेतद्वर्तकालिलयुद्धमा

साक्रथ्यात्यहर्त्तां ७३ महद्भिस्तैरभीतानां यमराष्ट्रविवर्द्धनं ततो हतानि रथयवाजि कुंजरै रनेकशो द्विपरथपत्तिवाजिन गजैर्गजा रथि
भिरुदायुधा रथा हयैर्हयाः पत्तिगणाश्च पत्तिभिः ७४ रथैर्द्विपाः द्विरदवरैर्महाहया हयैर्नरा वररथिभिश्च वाजिनः निरस्तजिह्वाद्दशनेक्षणा
क्षितौ क्षयं गताः प्रमथितवर्मभूषणाः ७५ तथा परैर्बहुकरणैर्वरायुधैर्हता गताः प्रतिभयदर्शनाः क्षितिं विपोथिता हयगजपादताडि
ता भृशाकुला रथमुखनेमिभिः क्षताः ७६ प्रमोदने श्वापदपक्षिरक्षसां जनक्षये वर्तितितत्र दारुणे महाबला स्ते कुपिताः परस्परं निसूद
यंतः प्रविचेरुरोजसा ७७ ततो बले भृशलुलिते परस्परं निरीक्षमाणौ रुधिरौघसंप्लुते दिवाकरेस्तंगिरिमास्थिते शनैरुभे प्रयाते शिबिराय
भारत ७८ इति श्री महाभारते द्रोणपर्वणि द्वात्रिंशोध्यायः ३२ संजय उवाच पूर्वमस्मासु भग्नेषु फाल्गुनेनामितौजसा द्रोणे च मो
घसंकल्पे रक्षिते च युधिष्ठिरे १ सर्वे विध्वस्तकवचास्तावका युधि निर्जिताः रजस्वला भृशोद्विग्ना वीक्षमाणा दिशो दश २ अवहारं ततः कृ
त्वा भारद्वाजस्य संमते लब्धलक्ष्यैः शरैर्भिन्ना भृशावहसिता रणे ३ श्लाघमानेषु पार्थेषु फाल्गुनस्यामितान्गुणान् केशवस्य च सौ
हार्दं कीर्त्यमानेर्जुनं प्रति ४ अभिशस्ता इवाभूवन्ध्यानमूकत्वमास्थिताः ततः प्रभातसमये द्रोणं दुर्योधनोब्रवीत् ५ प्रणयादभिमा
नाच्च द्विषद्वृद्ध्या च दुर्मनाः शृण्वतां सर्वयोधानां संरब्धो वाक्यकोविदः ६ नूनं वयं वध्यपक्षे भवतो ब्रह्मसत्तम तथा हि नाग्रहीः प्राप्तं
समीपेद्य युधिष्ठिरं ७ इच्छतस्ते न मुच्येत चक्षुःप्राप्तो रणेरिपुः जिघृक्षतो रक्ष्यमाणः सामरैरपि पांडवैः ८ वरं दत्त्वा मम प्रीतः पश्चाद्विकृत
वानसि आशाभंगं न कुर्वंति भक्तस्यार्याः कथंचन ९ ततोप्रीतस्तथोक्तः सन्भारद्वाजोब्रवीन्नृपं नार्हसे मान्यथा ज्ञातुं घटमानं तव
प्रिये १० ससुरासुरगंधर्वाः सयक्षोरगराक्षसाः नालं लोका रणे जेतुं पाल्यमानं किरीटिना ११ विश्वसृक् यत्र गोविंदः पृतनानीस्त
त्रार्जुनः तत्र कस्य बलं क्रामेदन्यत्र त्र्यंबकात्प्रभो १२ सत्यं तात ब्रवीम्यद्य नैतज्जातु भवेदन्यथा अद्यैकं प्रवरं कंचित्पातयिष्ये महारथं १३

द्रो० ४१ तेचवक्रहेविवास्मिपे।।मेघस्विस्थेशोपि योगेनकेनविद्राजन्नक्षेनस्थपनीपतं १४ नमज्ञातमसाथंवातस्ससंख्येपिकिंचन तेन
मुपांतमेकलमवेतानामितस्ततः १५ द्रोणोनत्योहतेमेनेससमलकंगणाःपुनः आ द्रूपत्रजैनेमरस्थेरत्तिगणामितोदिशं १६ ततो
जैनस्यायपदैःसार्द्धंसमभवद्रणःतादृशोयादृशोनामःस्कतोदृष्टोपिवाश्रुत १७ तत्रद्रोणोलावहितोसूद्रोराजन्नरोचत च
रन्नसंस्थितिमप्यःपापपत्रिवुद्वेदशः१८ तेनाभिमन्युवचनात्तुशुभस्मापतां विभेदद्रुणेरंसंख्येचक्रैयूहमनेकधा १९ सकला
दुष्करंकर्मद्रवाणान्सहस्रशः षट्सुवीरेषुसंसक्तोरोपःशासनिवृंगत २० वपुपरमसद्रुमापाण्डवाःशोककर्षिताःसोनदेनिद्र
तेराजन्नवहारमकुर्वत २१ धृतराष्ट्रउवाच पुत्रपुरुषसिंहस्यसंजयामामयौवनं रणोविनिहतंश्रुत्वाहृदयंमेसिपतेमनः २२ दारु
णःक्षत्रधर्मोयंविहितोधर्मकर्तृभिः यत्रराज्येप्सवःशूराबालेशस्त्रमपातयन् २३ बालमत्यंतसुखिनंविचरंतमभीतवत् कृतास्त्रबहवो
जघ्नुर्ब्रूहिगावल्गणेकथं २४ विभित्सतारथानीकंसौभद्रेणामितौजसा विक्रीडितंयथासंख्येतन्ममाचक्ष्वसंजय २५ संजयउ०
यन्मांपृच्छसिराजेंद्रसौभद्रस्यनिपातनं तत्तेकात्स्न्येनवक्ष्यामिशृणुराजन्समाहित २६ विक्रीडितंकुमारेणयथानीकंविभित्सता आ
रुग्णाश्चयथावाराःदुःसाध्याश्चापिविस्मये २७ दावाग्निपरीतानांभूरिगुल्मतृणद्रुमे वनोकसामिवासीत्त्वत्सैन्यानामभूद्भयं २८ द्रो
णपर्वणि ३३ संजयउवाच समरेऽत्युग्रकर्मीणःकर्मीणःकर्मभिर्जितक्लमा २९ सकृष्णाःपाण्डवाःपंचदेवैरपिदुरासदा १ राम ५१
सत्वकर्मान्वयैर्बुध्याकीर्त्याचयशसाश्रिया नैवभूतोनभविताजैवतुल्यगुणःपुमान् २ सत्यधर्मरतोदांतोविप्रपूजादिभिर्गुणैः सदैवत्रि
दिवंप्राप्तोराजाकिलयुधिष्ठिरः ३ युगांतेचांतकोराजन्जामदग्न्यश्चवीर्यवान् रथस्थोभीमसेनश्चकथ्यतेसदृशास्त्रय ४ प्रतिज्ञाकर्म
दक्षस्यरणेगांडीवधन्वनः उपमांनाधिगच्छामिपार्थस्यसदृशींक्षितौ ५ गुरुवात्सल्यमत्यंतंनैभृत्यंविनयोदमः नकुलेमातिरूप्यंचशौ

र्यंचनियतानिषट् ६ श्रुतगांभीर्यमाधुर्यसत्वरूपपराक्रमैः सदृशोदेवयोर्वीरसहदेवःकिलाश्विनो ७ येचकृष्णेगुणाःस्फीताःपां
डवेषुचयेगुणाः अभिमन्यौकिलैकस्थाःदृश्यंतेगुणसंचयाः ८ युधिष्ठिरस्यवीर्येणकृष्णस्यसत्त्वितेनच कर्मभिर्भीमसेनस्यसदृशो
भीमकर्मणा ९ धनंजयस्यरूपेणविक्रमेणश्रुतेनच विनयात्सहदेवस्यसदृशोनकुलस्यच १० धृतराष्ट्रउवाच अभिमन्यु
महंसूतसौभद्रमपराजितं श्रोतुमिच्छामिकात्स्न्येनकथमायोधनेहत ११ संजयउवाच स्थिरोभवमहाराजशोकंधारयदुःस
ह महांतंबंधुनाशंतेकथयिष्यामितच्छृणु १२ चक्रव्यूहोमहाराजआचार्येणाभिकल्पितः तत्रशक्रोपमाःसर्वेराजानोवि
निवेशिता १३ अंगस्थानेषुविन्यस्ताःकुमाराःसूर्यवर्चसः संघातोराजपुत्राणांसर्वेषामभवत्तदा १४ कृताभिसमयाःस
र्वेसुवर्णविकृतध्वजाः रक्तांबरधराःसर्वेसर्वेरक्तविभूषणाः १५ सर्वेरक्तपताकाश्चसर्वेवैहेममालिनः चंदनागुरुदिग्धां
गाःस्रग्विणःसूक्ष्मवाससः १६ सहिताःपर्यधावंतकार्ष्णिंप्रतियुयुत्सवः तेषांदशसहस्राणिबभूवुर्दृढधन्विनां १७ पौत्रंतव
पुरस्कृत्यलक्ष्मणंप्रियदर्शनं अन्योन्यसमदुःखास्तेअन्योन्यसमसाहसाः १८ अन्योन्यंस्पर्धमानाश्चअन्योन्यस्यहितेरताः दु
र्योधनस्तुराजेंद्रसैन्यमध्येव्यवस्थितः १९ कर्णदुःशासनकृपैर्वृतोराजामहारथैः देवराजोपमःश्रीमान्श्वेतच्छत्राभिसंवृत २०
चामरव्यजनाक्षेपैरुदयन्निवभास्करः प्रमुखेतस्यसैन्यस्यद्रोणोऽभवत्स्थितोनायकेश्वरः सिंधुराजस्तथातिष्ठच्छ्रीमान्मेरुरिवाचलः
सिंधुराजस्यपार्श्वस्थाश्वत्थामपुरोगमाः २२ सुतास्तवमहाराजत्रिंशत्त्रिदशोपमाः गांधारराजःकितवःशल्योभूरिश्रवास्त
थाः २३ पार्श्वतःसिंधुराजस्यराजंतेमहारथाः ततःप्रववृतेयुद्धंतुमुलंलोमहर्षणं २४ तावकानांपरेषांचमृत्युंकृत्वानिवर्तनं २५ द्रो

द्रो० ४२ णपर्वणि अभिमन्युवधे ३४ संजय उवाच तदनीकमनाधृष्यं भारद्वाजेन रक्षितं पार्थाः समभ्यवर्तंत भीमसेनपुरोगमाः
१ सात्यकिश्चेकितानश्च धृष्टद्युम्नश्च पार्षतः कुंतिभोजश्च विक्रांतो द्रुपदश्च महारथ २ आर्जुनिः क्षत्रधर्मा च बृहत्क्षत्रश्च वी
र्यवान् चेदिपो धृष्टकेतुश्च माद्रीपुत्रौ घटोत्कच ३ युधामन्युश्च विक्रांतः शिखंडी चापराजितः उत्तमौजाश्च दुर्धर्षो विराटश्च
महारथः द्रौपदेयाश्च संरब्धाः शैशुपालिश्च वीर्यवान् केकयाश्च महावीर्याः सृंजयाश्च सहस्रशः एते चान्ये च सगणाः ४
कृतास्त्रा युद्धदुर्मदाः ५ समभ्यधावन्सहसा भारद्वाजं युयुत्सवः समीपे वर्तमानांस्तान्भारद्वाजोतिवीर्यवान् ६ असंभ्रांतः
शरौघेण महता समवारयत महौघः सलिलस्येव गिरिमासाद्य दुर्भिदं ७ द्रोणं ते नाभ्यवर्तंत वेलामिव जलाशयाः पीड्यमानाः श
रै राजन् द्रोणचापविनिःसृतैः ८ न शेकुः प्रमुखे स्थातुं भारद्वाजस्य पांडवाः तदद्भुतमपश्याम द्रोणस्य भुजयोर्बलं ९ यदेनं नाभ्यवर्तं
त पांचालाः सृंजयैः सह तमायांतमभिक्रुद्धं द्रोणं दृष्ट्वा युधिष्ठिरः १० बहुधा चिंतयामास द्रोणस्य प्रतिवारणं अशक्यं तु तमन्येन द्रो
णं मत्वा युधिष्ठिरः ११ अविषह्यं गुरुं भारं सौभद्रे समवासृजत वासुदेवादनवरं फाल्गुनाच्चामितौजसं १२ अब्रवीत्परवीरघ्नमभिमन्यु
मिदं वचः एत्य नो नार्जुनो गर्हेद्यथा तात तथा कुरु १३ चक्रव्यूहस्य न वयं विद्म भेदं कथंचन त्वं वार्जुनो वा कृष्णो वा भिंद्यात्प्रद्यु
म्न एव वा १४ चक्रव्यूहं महाबाहो पंचमो नोपपद्यते अभिमन्यो वरं तात याचतां दातुमर्हसि १५ पितॄणां मातुलानां च सैन्यानां कुरु सर्व
शः धनंजयो हि नस्तात गर्हयेदेत्य संयुगात् १६ क्षिप्रमस्त्रं समादाय द्रोणानीकं विशातय अभिमन्युरुवाच द्रोणस्य दृढमत्युग्रम

नीकप्रवरं युधि पितॄणां जयमाकांक्षन्नवगाहे विलंबितं १७ उपदिष्टो हि मे पित्रा योगोनीकविशातने नोत्सहे हि विनिर्गंतुम
हं कस्यांचिदापदि १८ युधिष्ठिर उवाच भिंध्यनीकं युधां श्रेष्ठ द्वारं संजनयस्व नः वयं त्वानुगमिष्यामो येन त्वं तात यास्यसि १९ धनं
जयसमं युद्धे त्वां वयं तात संयुगे प्रणिधायानुयास्यामो रक्षंतः सर्वतोमुखाः २० भीम उवाच अहं त्वानुगमिष्यामि धृष्टद्युम्नोथ सा
त्यकिः पंचालाः केकया मत्स्यास्तथा सर्वे प्रभद्रकाः २१ सकृद्भिन्नं त्वया व्यूहं तत्र तत्र पुनः पुनः वयं प्रध्वंसयिष्यामो निघ्नमाना वरा
न्वरान् २२ अभिमन्युरुवाच अहमेतत्प्रवेक्ष्यामि द्रोणानीकं दुरासदं पतंग इव संक्रुद्धो ज्वलितं जातवेदसं २३ तत्कर्माद्य करि
ष्यामि हितं यद्वंशयोर्द्वयोः मातुलस्य च या प्रीतिं करिष्यति पितुश्च ते २४ शिशुनैकेन संग्रामे काल्यमानानि संघशः द्रक्ष्यंति
सर्वभूतानि द्विषत्सैन्यानि वै मया २५ नाहं पार्थेन जातः स्यां न च जातः सुभद्रया यदि मे संयुगे कश्चिज्जीवितो नाद्य मुच्यते २६
यदि चैकरथेनाहं समग्रं क्षत्रमंडलं न करोम्यष्टधा युद्धे न भवाम्यर्जुनात्मज २७ युधिष्ठिर उवाच एवं ते भाषमाणस्य बलं सौभ
द्र वर्धतां यस्त्वमुत्सहसे भेत्तुं द्रोणानीकं दुरासदं २८ रक्षितं पुरुषव्याघ्रैर्महेष्वासैर्महाबलैः साध्यरुद्रमरुत्तुल्यैर्वस्वग्न्यादि
त्यविक्रमैः २९ संजय उवाच तस्य तद्वचनं श्रुत्वा स यंतारमचोदयत सुमित्राश्वान्रणे क्षिप्रं द्रोणानीकाय चोदय ३० इति महा
भारते द्रोणपर्वणि अभिमन्युवधे ३५ संजय उवाच सौभद्रस्तद्वचः श्रुत्वा धर्मराजस्य धीमतः अचोदयत यंतारं द्रोणानीकाय भा
रत १ तेन संचोद्यमानस्तु याहि याहीति सारथिः प्रत्युवाच ततो राजन्नभिमन्युमिदं वचः २ अतिभारोयमायुष्मन्नाहितस्त्वयि पांडवैः
संप्रधार्य क्षणं बुद्ध्या ततस्त्वं योद्धुमर्हसि ३ आचार्यो हि कृती द्रोणः परमास्त्रे कृतश्रमः अत्यंतसुखसंवृद्धस्त्वं चायुद्धविशारदः

Indira Gandhi National Centre for the Arts

द्रो· ४ ततोऽभिमन्युः प्रहसन् सारथिं वाक्यमब्रवीत् सारथे को न्वयं द्रोणः समग्रं क्षत्रमेव वा ५ ऐरावतगतं शक्रं सहामरगणै
४२ रहं अद्य वा रुद्रमीशानं सर्वभूतगणार्चितं ६ योधयेयं रणमुखे न मे क्षत्रेऽद्य विस्मयः न ममैतद्द्विषत्सैन्यं कलामर्हति षो
डशीं ७ अपि विश्वजितं विष्णुं मातुलं प्राप्य सूतज पितरं वार्ज्जुनं युद्धे न भीर्मामुपयास्यति ८ अभिमन्युस्तु तां वाचं कदर्थी
कृत्य सारथेः याहीत्येवाब्रवीदेनं द्रोणानीकाय माचिरं ९ ततः संचोदयामास हयानाशु त्रिहायनान् नातिहृष्टमनाः
सूतो हेमभाण्डपरिच्छदान् १० ते प्रेषिताः सुमित्रेण द्रोणानीकाय वाजिनः द्रोणमभ्यद्रवन् राजन् महावेगपराक्रमाः ११
तमुदीक्ष्य तथायान्तं सर्वे द्रोणपुरोगमाः अभ्यवर्त्तन्त कौरव्याः पाण्डवाश्च तमन्वयुः १२ स कर्णिकारप्रवरोच्छ्रितध्वजः सुव
र्णवर्मार्ज्जुनिरर्ज्जुनाद्वरः युयुत्सया द्रोणमुखान्महारथान् समासदत् सिंहशिशुर्यथा द्विपान् १३ ते विंशतिपदे यत्ताः
संप्रहारं प्रचक्रिरे आसीद्गाङ्ग इवावर्त्तो मुहूर्त्तमुदधेरिव १४ शूराणां युध्यमानानां निघ्नतामितरेतरं संग्रामस्तुमुलो राज
न्प्रावर्त्तत सुदारुणः १५ प्रवर्त्तमाने संग्रामे तस्मिन्नतिभयङ्करे द्रोणस्य मिषतो व्यूहं भित्वा प्राविशदार्ज्जुनिः १६ तं प्रविष्टं विनिघ्नन्तं श
त्रुसङ्घान्महाबलं हस्त्यश्वरथपत्त्यौघाः परिवव्रुरुदायुधाः १७ नानावादित्रनिनदैः क्ष्वेडितोत्क्रुष्टगर्ज्जितैः हुङ्कारैः सिंहनादैश्च तिष्ठ ति राम
ष्ठेति निस्वनैः १८ घोरैर्हलहलाशब्दैर्मा गास्तिष्ठैहि मामिति असावहममुत्रेति प्रवदन्तो मुहुर्मुहुः १९ बृंहितैः शिञ्जितैर्हासैः करनेमि ४३
स्वनैरपि सन्नादयन्तो वसुधामभिदुद्रुवुरार्ज्जुनिं २० तेषामापततां वीरः शीघ्रयोधी महाबलः क्षिप्रास्त्रो न्यवधीद्राजन् मर्मज्ञो मर्मभेदि
भिः २१ ते हन्यमाना विवशा नानालिङ्गैः शितैः शरैः अभिपेतुस्तमेवाजौ शलभा इव पावकं २२ ततस्तेषां शरीरैश्च शरीरावयवै

श्च सः आतस्तार क्षितिं क्षिप्रं कुशैर्वेदीमिवाध्वरे २३ बद्धगोधाङ्गुलित्राणान् सशरासनसायकान् सासिचर्माङ्कुशाभीषून् सतोमरप
रश्वधान् २४ सगदायोगुडप्रासान् सर्ष्टितोमरपट्टिशान् सभिण्डिपालपरिघान् सशक्तिवरकम्पनान् २५ सप्रतोदमहाशंखान् सकुन्ता
न्सकचग्रहान् समुद्गरक्षेपणीयान् सपाशपरिघोपलान् २६ सकेयूराङ्गदान् बाहून् हृद्यगन्धानुलेपनान् संचिच्छेदार्ज्जुनिर्वृत्तां
स्त्वदीयानां सहस्रशः २७ तैः स्फुरद्भिर्महाराज शुशुभे लोहितोक्षितैः पञ्चास्यैः पन्नगैश्छिन्नैर्गरुडेनेव मारिष सुनासाननकेशा
न्तैरव्रणैश्चारुकुण्डलैः संदष्टौष्ठपुटैः क्रोधात् क्षरद्भिः शोणितं बहु २९ सुचारुमुकुटोष्णीषैर्मणिरत्नविराजितैः विनालनलिनाकारै
रिवार्कशशिप्रभैः ३० हितप्रियंवदैः काले बहुभिः पुण्यगन्धिभिः द्विषच्छिरोभिः पृथ्वीं समवतस्तार फाल्गुनिः ३१ गन्धर्वनगराका
रान्विधिवत्कल्पितान्रथान् ईषामुखान्त्रिवेणूंश्च नलदण्डकबन्धुरान् ३२ विजङ्घाकूबरांस्तत्र विनाभीन्दशनानपि विच
क्रोपस्करोपस्थान् भग्नोपकरणानपि ३३ प्रपातितोपस्तरणान् हतयोधान् सहस्रशः शरैर्विशकलीकुर्वन् दिक्षु सर्वास्वदृश्यत ३४
पुनर्द्विपान्द्विपारोहान् वैजयन्त्यङ्कुशध्वजान् तूणान्वर्माण्यथो कक्ष्या ग्रैवेयानथ कम्बलान् ३५ घण्टाः शुण्डान्विषाणाग्रान्छत्र
मालाः पदानुगान् शरैर्निशितधाराग्रैः शात्रवाणामशातयत् ३६ वनायुजान्पार्वतीयान् काम्बोजारट्टबाह्लिकान् स्थिरवालधि
कर्णाक्षान् जवनान् साधुवाहिनः ३७ आरूढान् शिक्षितैर्योधैः शक्त्यृष्टिप्रासयोधिभिः विध्वस्तचामरमुखान् विप्रविद्धप्रकीर्णकान् ३८
निरस्तजिह्वानयनान्निष्कीर्णान्त्रयकृद्धनान् हतारोहान् छिन्नघण्टान् क्रव्यादगणमोदकान् ३९ निकृत्तचर्मकवचान् शकृन्मूत्रा
सृगाप्लुतान् निपातयन्नश्ववरांस्तावकान्स व्यरोचत ४० एको विष्णुरिवाचिन्त्यः कृत्वा कर्म सुदुष्करं तथा निर्मथितं तेन त्र्यङ्गं तव बलं
महत् ४१ यथासुरबलं घोरं त्र्यम्बकेन महौजसा कृत्वा कर्माण्यसह्यानि परैरार्ज्जुनिराहवे ४२ अभिनच्च पदातीनां महायानेव सर्वशः

Indira Gandhi National
Centre for the Arts

द्रो° ४५ एवमेकेन तां सेनां सौभद्रेण शितैः शरैः ४३ भृशं विप्रहतां दृष्ट्वा स्कंदेनेवासुरीं चमूं त्वदीयास्तव पुत्राश्च वीक्षमाणा दिशो दश
४४ संशुष्कास्याश्चलन्नेत्राः प्रस्विन्ना लोमहर्षिणः पलायनकृतोत्साहा निरुत्साहा द्विषज्जये ४५ गोत्रनामभिरन्योन्यं क्रंदंतो वि
जयैषिणः हतान्पुत्रान्पितॄन्भ्रातॄन्बंधून्संबंधिनस्तथा ४६ प्रातिष्ठंत समुत्सृज्य त्वरयंतो हयद्विपान् इति द्रोणपर्वणि अ
भिमन्युवधे ३६ संजय उवाच तां प्रभग्नां चमूं दृष्ट्वा सौभद्रेणामितौजसा दुर्योधनो भृशं क्रुद्धः स्वयं सौभद्रमभ्ययात् १ ततो
राजानमावृत्तं सौभद्रं प्रति संयुगे दृष्ट्वा द्रोणोऽब्रवीद्योधान्परीप्सध्वं नराधिपं २ पुराभिमन्युर्लक्ष्यं नः पश्यतां हंति वीर्यवान् त
माद्रवत मा भैष्ट क्षिप्रं रक्षत कौरवं ३ ततः कृतज्ञा बलिनः सुहृदो जितकाशिनः त्रास्यमाना भयाद्वीरं परिवव्रुस्तवात्मजं ४ द्रो
णो द्रौणिः कृपः कर्णः कृतवर्मा च सौबलः बृहद्बलो मद्रराजो भूरिर्भूरिश्रवाः शलः ५ पौरवो वृषसेनश्च विसृजंतः शिताञ्शरान्
सौभद्रं शरवर्षेण महता समवाकिरन् ६ संमोहयित्वा तमथ दुर्योधनममोचयन् आस्याद्ग्रासमिवाक्षिप्तं ममृषे नार्जुनात्मजः ७ तांछ
रौघेण महता साश्वसूतान्महारथान् विमुखीकृत्य सौभद्रः सिंहनादमथानदत् ८ तस्य नादं ततः श्रुत्वा सिंहस्येवामिषैषिणः नामृ राम॰
ष्यंत सुसंरब्धाः पुनर्द्रोणमुखा रथाः ९ त एनं कोष्ठकीकृत्य रथवंशेन मारिष व्यसृजन्निषुजालानि नानालिंगानि संघशः १० तान्यंत ४४
रिक्षे चिच्छेद पौत्रस्ते निशितैः शरैः तांश्चैव प्रतिविव्याध तदद्भुतमिवाभवत् ११ ततस्ते कोपितास्तेन शरैराशीविषोपमैः परिवव्रुर्जिघां
सवः सौभद्रमपराजितं १२ समुद्रमिव पर्यस्तं त्वदीयं तद्बलार्णवं दधारैकोऽर्जुनिर्बाणैर्वेलेव भरतर्षभ १३ शूराणां युध्यमानानां
निघ्नतामितरेतरं अभिमन्योः परेषां च नासीत्कश्चित्पराङ्मुखः १४ तस्मिंस्तु घोरे संग्रामे वर्तमाने भयंकरे दुःसहो नवभिर्बाणैरभि
मन्युमविध्यत १५ दुःशासनो द्वादशभिः कृपः शारद्वतस्त्रिभिः द्रोणस्तु सप्तदशभिः शरैराशीविषोपमैः १६ विविंशतिश्च सप्तत्या कृ

तवर्मा च सप्तभिः बृहद्बलस्तथाष्टाभिरश्वत्थामा च सप्तभिः १७ भूरिश्रवास्त्रिभिर्बाणैर्मद्रेशः षड्भिराशुगैः द्वाभ्यां शराभ्यां श
कुनिस्त्रिभिर्दुर्योधनो नृपः १८ स तु तान्प्रतिविव्याध त्रिभिस्त्रिभिरजिह्मगैः नृत्यन्निव महाराज चापहस्तः प्रतापवान् १९ ततो
ऽभिमन्युः संक्रुद्धस्त्रास्यमानस्तवात्मजैः विदर्शयन्वै सुमहच्छिक्षौरसकृतं बलं २० गरुडानिलरंहोभिर्यंतुर्वाक्यकरैर्हयैः दांतै
रश्मकदायादं त्वरमाणोऽभ्यवारयत् २१ विव्याध चैनं दशभिर्बाणैस्तिष्ठेति चाब्रवीत् तस्याभिमन्युर्दशभिर्हयान्सूतं ध्वजं श
रैः २२ बाहू धनुः शिरश्चोर्व्यां स्मयमानोऽभ्यपातयत् ततस्तस्मिन्हते वीरे सौभद्रेणाश्मकेश्वरे २३ संचचाल बलं सर्वं पलाय
नपरायणं ततः कर्णः कृपो द्रोणो द्रौणिर्गांधारराट् शलः शल्यो भूरिश्रवाः क्राथः सोमदत्तो विविंशतिः वृषसेनः सुषेणश्च
कुंडभेदी प्रतर्दनः २५ वृंदारकोऽललित्थश्च प्रबाहुर्दीर्घलोचनः दुर्योधनश्च संक्रुद्धः शरवर्षैरवाकिरन् २६ सोऽतिविद्धो महेष्वा
सैरभिमन्युरजिह्मगैः शरमादत्त कर्णाय परकायावभेदनं २७ तस्य भित्त्वा तनुत्राणं देहं निर्भिद्य चाशुगः प्राविशद्धरणीं वेगाद्व
ल्मीकमिव पन्नगः २८ स तेनातिप्रहारेण व्यथितो विह्वलन्निव संचचाल रणे कर्णः क्षितिकंपे यथाचलः २९ तथान्यैर्निशितैर्बा
णैः सुषेणं दीर्घलोचनं कुंडभेदिं च संक्रुद्धस्त्रिभिस्त्रीनवधीद्बली ३० कर्णस्तं पंचविंशत्या नाराचानां समार्पयत् अश्वत्थामा
च विंशत्या कृतवर्मा च सप्तभिः ३१ स शराचितसर्वांगः क्रुद्धः शक्रात्मजात्मजः विचरन्ददृशे सैन्ये पाशहस्त इवांतकः ३२ शल्यं
च शरवर्षेण समीपस्थमवाकिरत् उदक्रोशन्महाबाहुस्तव सैन्यानि भीषयन् ३३ ततः स विद्धोऽस्त्रविदा मर्मभिद्भिरजिह्मगैः
शल्यो राजन्रथोपस्थे निषसाद मुमोह च ३४ तं हि विद्धं तथा दृष्ट्वा सौभद्रेण यशस्विना संप्राद्रवच्चमूः सर्वा भारद्वाजस्य प

Indira Gandhi National Centre for the Arts

द्रो॰ ष्यतः ३५ संप्रेक्ष्य तं महाबाहुं फल्गुनं बन्धुभिः समावृतं तद्वीपाः प्रपलायंत मृगाः सिंहार्दिता इव ३६ समुत्क्रुश्य पश्चामाभिवृष्ट्यमा
४५ णाः पितस्वरवारणाभिद्रूपक्तः संवेः अवनितलगतैस्त्वभूतं संधे यतिविबभौ उत्तमपृथ्यास्मिक्तः ३७ द्रोणाम्ब्वतिश्चाभिम
न्युवधे ३८ धृतराष्ट्र उवाच तथा प्रमथमानं तं महेष्वासमजिह्मगैः ३९ आर्जुनिं मामकाः सर्वे के चैनं समवारयन् १
संजय उवाच शृणु राजन्कुमारस्य रणे विक्रीडितं महत् बिभित्सतो रथानीकं भारद्वाजेन रक्षितं २ मद्रेशं सादितं दृष्ट्वा सौभद्रेयाणस्तु ये
रणोत्कल्माद्वरजः क्रुद्धः किरन्बाणान्समभ्यपात् ३ सविंशाद्दशभिर्बाणैः साश्वयंतारमार्जुनिं उदक्रोशन्महाशब्दं तिष्ठ तिष्ठेति चाब्र
वीत् ४ तस्यार्जुनिः शिरोग्रीवं पाणिपादं धनुर्हयान् छत्रं ध्वजं नियंतारं त्रिवेणुं तल्पमेव च ५ चक्रे युगं च तूणीरं ह्यनुकर्षं च सायकैः
पताकां चक्रगोप्तारौ सर्वोपकरणानि च ६ लघुहस्तः प्रचिच्छेद ददृशे तं न कश्चन सपपात क्षितौ क्षीणः प्रविद्धाभरणांबरः ७ वायुनेव महाशै
लः संभग्नो मितौजसा अनुगास्तस्य वित्रस्ताः प्राद्रवन्सर्वतो दिशः ८ आर्जुनेः कर्म तद्दृष्ट्वा संप्रणेदुः समंततः नादेन सर्वभूतानि साधु साध्विति भारत रा॰
९ शल्यभ्रातर्यथा रुग्णो बहुशस्तस्य सैनिकाः कुलाधिवासनामानि श्रावयंतो अर्जुनात्मजं १० अभ्यधावंत संक्रुद्धा विविधायुधपाणयः रथैरश्वै ४५
र्गजैश्चान्ये पद्भिश्चान्ये बलोत्कटाः ११ बाणशब्देन महता रथनेमिस्वनेन च हुंकारैः क्ष्वेडितोत्क्रुष्टैः सिंहनादैः सगर्जितैः १२ ज्यातलत्रस्वनै
रन्ये गर्जंतो अर्जुननंदनं ब्रुवंतश्च न नो जीवन्मोक्ष्यसे जीवितादिति १३ तांस्तथा ब्रुवतो दृष्ट्वा सौभद्रः प्रहसन्निव यो यः स्म प्राहरत्पूर्वं तं तं विव्याध प
त्रिभिः १४ संदर्शयिष्यन्नस्त्राणि विचित्राणि लघूनि च आर्जुनिः समरे शूरो मृदुपूर्वमयुध्यत १५ वासुदेवादुपात्तं यदस्त्रं यच्च धनंज

यात् अदर्शयत तत्कार्ष्णिः कृष्णाभ्यामविस्फुरद्दिक्षु दर्शयते शेषवत् १६ वहतां स गुरून्भारान्सांधयंश्चाशुगान्रणे संदधद्विसृजंश्चेषून्निर्विशेषमदृश्य
त १७ चापमंडलमेवास्य विस्फुरद्दिक्षु दृश्यते सुदीप्तस्य शरत्काले सवितुर्मंडलं यथा १८ ज्याशब्दः शुश्रुवे तस्य तलशब्दश्च दारुणः महाशनिमुचः कालेप
योदस्येव निःस्वनः १९ ह्रीमानमर्षी मानकृत् प्रियदर्शनः संमिमानयिषुर्वीरानिष्वस्त्रैश्चाप्ययुध्यत २० मृदुर्भूत्वा महाराज दारुणः समप
द्यत वर्षाभ्यतीतो भगवान्शरदीव दिवाकरः २१ शरान्विचित्रान्सुबहून्रुक्मपुंखाञ्शिलाशितान् मुमोच शतशः क्रुद्धो गभस्तीनिव भास्क
रः २२ क्षुरप्रैर्वत्सदंतैश्च विपाठैश्च महारथः नाराचैरर्धनाराचैर्भल्लैरंजलिकैरपि २३ अवाकिरद्रथानीकं भारद्वाजस्य पश्यतः ततः सैन्यमभव
द्विमुखं शरपीडितं २४ द्रोणपर्वणि अभिमन्युवधे ३९ धृतराष्ट्र उवाच द्वैधीभवति मे चित्तं ह्रिया तुष्ट्या च संजय मम पुत्रस्य यत्सैन्यं सौभद्रः
समवारयत् १ विस्तरेणैव मे शंस सर्वं गावल्गणे पुनः विक्रीडितं कुमारस्य स्कंदस्येवासुरैः सह २ संजय उवाच हंत ते संप्रवक्ष्यामि विमर्दमतिदारुणं
एकस्य च बहूनां च यथासीत्तुमुलो रणः ३ अभिमन्युः कृतोत्साहः कृतोत्साहानरिंदमान् रथस्थो रथिनः सर्वांस्तावकानभ्यवर्षयत् ४ द्रोणं क
र्णं कृपं शल्यं द्रौणिं भोजं बृहद्बलं दुर्योधनं सोमदत्तिं शकुनिं च महाबलं ५ नानानृपान्नृपसुतान्सैन्यानि विविधानि च अलातचक्रवत्स
र्वांश्चरन्बाणैः समार्पयत् ६ निघ्नन्नमित्रान्सौभद्रः परमास्त्रैः प्रतापवान् अदर्शयत तेजस्वी दिक्षु सर्वासु भारत ७ तद्दृष्ट्वा चरितं तस्य सौ
भद्रस्यामितौजसः समकंपंत सैन्यानि त्वदीयानि सहस्रशः ८ अथाब्रवीन्महाप्राज्ञो भारद्वाजः प्रतापवान् हर्षेणोत्फुल्लनयनः कृपमाभाष्य
सत्वरं ९ घट्टयन्निव मर्माणि तव पुत्रस्य भारत अभिमन्युं रणे दृष्ट्वा तदा रणविशारदं १० एष गच्छति सौभद्रः पार्थानामग्रतो युवा नंदयन्
सुहृदः सर्वान्राजानं च युधिष्ठिरं ११ नकुलं सहदेवं च भीमसेनं च पांडवं बंधून्संबंधिनश्चान्यान्मध्यस्थान्सुहृदस्तथा १२ नास्य युद्धे समं
मन्ये कंचिदन्यं धनुर्धरं इच्छन्हन्यादिमां सेनां किमर्थमपि नेच्छति १३ द्रोणस्य प्रीतिसंयुक्तं श्रुत्वा वाक्यं तवात्मजः आर्जुनिं प्रति संक्रु

Indira Gandhi National
Centre for the Arts

द्रो द्रोणोऽहं स्यात्सपत्निव २४ अथ दुर्योधनः कर्णमब्रवीद्धृष्टमानसः शृणु कर्ण तमं मद्रराजेनात्स्यात्म्यान्महात्मना २५ सर्वे मूर्द्धाभि
४८ षिक्ता नामनावार्यो ब्रह्मविदामम अर्जुनस्य सुतं मूढो नायं हंतुमिहेच्छति २६ न ह्यस्य समरे मुच्येदंतकोप्याततायिन किंमंग पुनरेवान्यो मर्त्यः सत्य
वामिकं २७ अर्जुनस्य सुतं त्रातुं शिष्यत्वाद्रक्षति संयुगे शिष्याः पुत्राश्च दयितास्तदपत्यं च धर्मिणा २८ संरक्षमाणो द्रोणेन मन्यते वीर्यमात्मनः
आत्मसंभावितो मूढस्तं प्रमथ्नीत मा चिरं २९ एवमुक्तास्ततस्ते तु सात्वताश्च मम पुत्रं संरब्धा निजिघांसंतो भारद्वाजस्य पश्यतः ३० दुःशासनस्तु
तच्छ्रुत्वा दुर्योधनवचस्तदा अब्रवीत् कुरुशार्दूलो दुर्योधनमिदं वचः ३१ अहमेनं हनिष्यामि महाराज ब्रवीमि ते मिषतां पांडुपुत्राणां पांचा
लानां च पश्यतां ३२ ग्रसिष्याम्यद्य सौभद्रं यथा राहुर्दिवाकरं उत्क्रुश्य चाब्रवीद्वाक्यं कुरुराजमिदं वचः ३३ श्रुत्वा कृष्णौ मया ग्रस्तं सौभद्रमतिमानिनौ
मतिमानिनो गमिष्यतः प्रेतलोकं जीवलोकाच्च संशयः ३४ तौ च श्रुत्वा मृतौ व्यक्तं पांडोः क्षेत्रोद्भवाः सुता एकाह्ना ससुहृद्वर्गाः क्लैब्यान्
हास्यंति जीवितं ३५ तस्मादस्मिन् हते शत्रौ हताः सर्वे हिता स्तव शिवेन मां ध्याहि राजन्नेष हन्मि रिपुं तव ३६ एवमुक्त्वा नदन् राजन् पुत्रो दुःशासन
स्तव सौभद्रमभ्ययात् क्रुद्धः शरवर्षैरवाकिरत् ३७ तमभिक्रुद्धमायांतं तव पुत्रमरिंदमः अभिमन्युः शरैस्तीक्ष्णैः षड्विंशत्या समार्पयत् ३८
दुःशासनस्तु संक्रुद्धः प्रभिन्न इव कुंजरः अयोधयत सौभद्रमभिमन्युश्च तं रणे ३९ तौ मंडलानि चित्राणि रथाभ्यां सव्यदक्षिणं चरमाणा
वयुध्येतां रथशिक्षाविशारदौ ४० अथ पणवमृदंगदुंदुभीनां क्रकचमहानकभेरिझर्झराणां निनदमतिभृशं नराः प्रचक्रुर्लवणजलोद्
वसंहनादमिश्रं ४१ इति श्रीद्रोणपर्वणि अभिमन्युवधे ३९ संजय उवाच शरविक्षतगात्रस्तु प्रत्यमित्रमवस्थितं अभिमन्युः स्मयन् धी
मान् दुःशासनमथाब्रवीत् १ दिष्ट्या पश्यामि संग्रामे मानिनं शूरमागतं निष्ठुरं त्यक्तधर्माणमाक्रोशनपरायणं २ यत् सभायां त्वया राजा
धृतराष्ट्रस्य शृण्वतः कोपितः परुषैर्वाक्यैर्धर्मराजो युधिष्ठिरः ३ जयोन्मत्तेन भीमश्च बह्वबद्धं प्रभाषितः अक्षद्यूतेन मायावी माससकौ पान्महा

त्मनः ४ परवित्तापहारस्य क्रोधस्याशमनस्य च लोभस्य ज्ञाननाशस्य द्रोहस्यात्याहितस्य च ५ पितॄणां मम राज्यस्य हरणस्योग्रधन्विनां
तत्त्वमेवमनुप्राप्तः कोपाद्वै महात्मनां ६ सद्यश्चोग्रमधर्मस्य फलं प्राप्नुहि दुर्मते शासिताद्य त्वाहं बाणैः सर्वसैन्यस्य पश्यतः ७ अद्या
हमनृणस्तस्य कोपस्य भविता रणे अमर्षितायाः कृष्णायाः कांक्षितस्य च मे पितुः ८ अद्य कौरव्य भीमस्य भविताप्यनृणो युधि न
हि मे मोक्ष्यसे जीवन् यदि नोत्सृजसे रणं ९ एवमुक्त्वा महाबाहुर्बाणं दुःशासनांतकं संदधे परवीरघ्नः कालाग्न्यनिलवर्चसं १० तस्यो
रस्तूर्णमासाद्य जत्रुदेशे विभिद्य तं अथैनमनुहृत्यैव वल्मीकमिव पन्नगः ११ अथैनं पंचविंशत्या पुनरेव समार्पयत् शरैरग्निसम
स्पर्शैराकर्णसमचोदितैः १२ स गाढविद्धो व्यथितो रथोपस्थ उपाविशत् दुःशासनो महाराज कश्मलं चाविशन्महत् १३ सारथि
स्त्वरमाणस्तु दुःशासनमचेतनं रणमध्यादपोवाह सौभद्रशरपीडितं १४ पांडवा द्रौपदेयाश्च विराटश्च समीक्ष्य तं पांचाला केक
याश्चैव सिंहनादमथानदन् १५ वादित्राणि च सर्वाणि नानालिंगानि सर्वशः प्रावादयंत संहृष्टाः पांडूनां तत्र सैनिकाः १६ अपश्यन्स्म
यमानास्ते सौभद्रस्य विचेष्टितं अत्यंतवैरिणं दृप्तं दृष्ट्वा शत्रुं पराजितं १७ धर्ममारुतशक्राणामश्विनोः प्रतिमास्तथा धारयंतो ध्व
जाग्रेषु द्रौपदेयाः महारथाः १८ सात्यकिश्चेकितानश्च धृष्टद्युम्नशिखंडिनौ केकया धृष्टकेतुश्च मत्स्याः पांचालसृंजयाः १९ पांड
वाश्च मुदा युक्ता युधिष्ठिरपुरोगमाः अभ्यद्रवंत त्वरिता द्रोणानीकं विभित्सवः २० ततोऽभवन्महद्युद्धं त्वदीयानां परैः सह जयमा
कांक्षमाणानां शूराणामनिवर्तिनां २१ तथा तु वर्तमाने वै संग्रामे दारुणे तदा दुर्योधनो महाराज राधेयमिदमब्रवीत् २२ पश्य दुः
शासनं वीरमभिमन्युवशं गतं प्रतपंतमिवादित्यं निघ्नंतं शात्रवान् रणे २३ अथ चैते सुसंरब्धाः सिंहा इव बलोत्कटाः सौभद्रमुद्य
तास्त्रातुं निर्यात्यंतो पांडवाः २४ ततः कर्णः शरैस्तीक्ष्णैरभिमन्युं दुरासदं अभ्यवर्षत संक्रुद्धः पुत्रस्य हितकृत्तव २५

द्रो ४७ तस्य बाहुवरान्नाम्नो वृत्तिं वा धनुषा मे धृतिं स्ववक्षा द्वे कं स्त्रः सोमदत्तस्य राजाजिरे २६ अभिमन्युस्तु राजेन्द्र त्रिसप्तत्या शिलीमु
खैः अविध्यत्ततो राजन्हृदये सुमहायशाः २७ ततो यानाश्च कम्पितो द्रोणपुत्रः त्वरान्वितः आजगाम तरसा तत्र हन्तुं
सौभद्रमाहवे २८ ततः कर्णो जयद्रथश्च सुमनोनाम्नि सर्वे धनुष्मतः सोऽभ्यधावत शत्रूनाहवे संक्रुद्धः समन्तादभ्यधावत २९ सौभद्रः स्वविरोधि
गणान् शिष्यः पराक्रमवान् समरे शत्रुदुर्धर्षमभिमन्युमपातयत् ३० स तथा पीड्यमानस्तु राधेयेनाभ्यहन्यत समरे संकाशः
सोमदत्तेन समाहतः ३१ ततः शालालिभिस्तेषां तोमरैः शैलनन्दनैः सिंहनादान्विनेदुश्च विस्फारितं मार्जुनिः कर्णमार्पयत् ३२ धनुर्म
ण्डलनिर्मुक्तैः शरैरग्नि विशिखैः सच्छत्रध्वजं पताकां सारथिं साश्वमाशु पत्रिभिः ३३ कर्णोऽपि नामविशेषनाराचैः तत्पर्वणः सुसं
शितैः सुतानस्य वीना गच्छन् कालुनाल्मज ३४ ततो मुहूर्तात् कर्णस्य वाजिनैकेन वायवान् स धनुः कार्मुकं वा च्छित्त्वा मामवपा
तयत् ३५ ततः कृपश्च राजेन्द्र कर्णश्च कृतवर्मा ततः सोमदत्तस्य पात्रं शरैरमुष्य कार्मुकं ३६ ततश्च कुरुमुख्यास्तेषां बाणा
चारजना वादित्राणि विमलसंप्रसूमे चापि तु धृतु ३७ इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधे ५० संजय उ० सोऽभिराजेन धनुष्याणि संधि
कर्णश्च नतः तु चतः तपोऽम्बर्याः तानि नाराचान् रथानस्मवारयत् १ सोऽविध्यद्दशभिर्वाणैरभिमन्युरसारं सच्छत्रध्वजं पताकां सार्ङ्गमा राम० ५१
शुक्लपत्रिभिः २ ततः पेनाम्नहर्के कर्मकृत्यां राममिति मातुर्य इष्वा हितशरैः कार्मिनसपाद्वेषितामभवत् ३ तस्याभिमन्युराप्नुम
स्पेन्द्रकेन पत्रिणा शिरः प्रपातयामास तस्या त्रापतद्भुवि ४ कर्णि कारमिवोद्धृतं वातेन पतितं नगात् भ्रातरं निहतं दृष्ट्वा
राजन्कर्णो व्यथां ययौ ५ विमुखीकृत्य कर्णं तु सौभद्रः कङ्कपत्रिभिः अन्यानपि महेष्वासांस्तानभ्यधावदुद्ध्वे ६ ततस्त
द्वितते सैन्यं हस्त्यश्वरथपत्तिमत् क्रुद्धोऽभिमन्युर्भिनत्तिमितेजा महायशाः ७ कर्णस्तु बहुभिर्बाणैरर्द्यमानोऽभिमन्युना

अपयाज्जवनैरश्वैस्ततोऽनीकमभिद्यत ८ शलभैरिव वा काशे धाराभिरिव वावृतं अभिमन्योः शरै राजन्न प्राज्ञायत किंच
न ९ तावकानां तु योधानां वध्यतां निशितैः शरैः अन्यत्र सैन्धवाद्राजन्न स्म कश्चिद्व्यतिष्ठत १० सौभद्रस्तु ततः शङ्खं प्रध्माय पुरुष
र्षभः शीघ्रमभ्यपतत्सेनां भारतीं भरतर्षभ ११ स कक्षेऽग्निरिवोत्सृष्टो निर्दहंस्तरसा रिपून् मध्ये भारतसैन्यानामार्जुनिः पर्यव
र्तत १२ रथनागाश्वमनुजानर्दयन्निशितैः शरैः सम्प्रविश्याकरोद्भूमिं कबन्धगणसंकुलाम् १३ सौभद्रचापप्रभवैर्निकृत्ताः प
रमेषुभिः स्वानेवाभिमुखान्घ्नन्तः प्राद्रवञ्जीवितार्थिनः १४ ते घोरा रौद्रकर्माणो विपाठा बहवः शिताः निघ्नन्तो रथना
गाश्वाञ्जग्मुराशु वसुन्धरां १५ सायुधाः साङ्गुलित्राणाः सगदाः साङ्गदा रणे दृश्यन्ते बाहवश्छिन्ना हेमाभरणभूषि
ता १६ शरांश्चापानि खड्गांश्च शरीराणि शिरांसि च सकुण्डलानि स्रग्वीणि भूमावास्तरणेऽभवन् १७ सोपस्करैरधिष्ठा
नैरीषादण्डकबन्धुरैः अक्षैर्विमथितैश्चक्रैर्भग्नैश्च बहुधा युगैः १८ शक्तिचापासिभिश्चैव पतितैश्च महाध्वजैः चर्मचापश
रैश्चैव व्यवकीर्णैः समन्ततः १९ निहतैः क्षत्रियैरश्वैर्वारणैश्च विशाम्पते अगम्यरूपा पृथिवी क्षणेनासीत्सुदारुणा २०
वध्यतां राजपुत्राणां क्रन्दतामितरेतरं प्रादुरासीन्महाशब्दो भीरूणां भयवर्धनः २१ स शब्दो भरतश्रेष्ठ दिशः सर्वा व्यनाद
यत् सौभद्रश्चाद्रवत्सेनां निघ्नन्नश्वरथद्विपान् २२ कक्षमग्निरिवोत्सृष्टो निर्दहंस्तरसा रिपून् मध्ये भारतसैन्यानामार्जुनिः
समदृश्यत २३ विचरन्स दिशः सर्वाः प्रदिशश्चापि भारत तदवस्थं तु सौभद्रं नाज्ञासिष्म महारथ २४ आददानं तु नाश्वा
न्रथान्वा शरान् विमुञ्चन्तमवेक्षामहे वयं २५ अभिमन्युमवज्ञाय जयमपश्यंस्तु हिरण्मयं
सा च्छिन्नं वा भुवि भाति हतेन ...

द्रो सव समः संख्ये वासवस्यात्मजात्मजः २६ अभिमन्युर्महाराज सेनामध्ये व्यरोचत इति द्रोणपर्वण्यभिमन्युवधे ४२ धृतरा
४८ ष्ट्र उवाच बालमत्यंतसुखिनं स्वबाहुबलदर्पितं युद्धेषु कुशलं वीरं कुलपुत्रं तनुत्यजं १ गाहमानमनीकानि सदश्वै
स्त्रिहायनैः अपि यौधिष्ठिरात्सैन्यात्कश्चिदन्वपतद्बली २ संजय उवाच युधिष्ठिरो भीमसेनः शिखंडी सात्यकिर्यमौ
धृष्टद्युम्नो विराटश्च द्रुपदश्च सकेकयः ३ धृष्टकेतुश्च संरब्धो मत्स्याश्चान्वपतन्रणे तेनैव तु पथा यांतः पितरो मातुलैः स
ह ४ अभ्यद्रवन्परीप्संतो व्यूढानीकाः प्रहारिणः तांस्तु दृष्ट्वा द्रुतान्शूरांस्त्वदीया विमुखाभवन् ५ ततस्तद्विमुखं दृष्ट्वा त
व सूनोर्महद्बलं जामाता तव तेजस्वी विष्टंभयिषुरावजत् ६ सैंधवस्य महाराज पुत्रो राजा जयद्रथः स पुत्रगृद्धिनः पा
र्थान्सह सैन्यानवारयत् ७ उग्रधन्वा महेष्वासो दिव्यमस्त्रमुदीरयन् वार्द्धक्षत्रिरुपासेधत्प्रवणादिव कुंजरः ८ धृतरा
ष्ट्र उवाच अतिभारमहं मन्ये सैंधवे संजयाहितं यदेकः पांडवान्क्रुद्धान्पुत्रगृद्धिनवारयत् ९ अत्यद्भुतमहं मन्ये
बलं शौर्यं च सैंधवे तदस्य ब्रूहि मे वीर्यं कर्म चाग्र्यं महात्मनः १० किं दत्तं हुतमिष्टं वा किं सुतप्तमथो तपः सिंधुराजे
न येनैकः पांडवान्समवारयत् ११ संजय उवाच द्रौपदीहरणे यत्तद्भीमसेनेन निर्जितः मानात्स तप्तवान्राजा वरार्थी सुम ए
हत्तपः १२ इंद्रियाणींद्रियार्थेभ्यः प्रियेभ्यः संनिवर्त्य सः क्षुत्पिपासातपसहः कृशो धमनिसंततः १३ देवमाराधयच्छ ४८
बालः सुपर्ण इव सागरं तेनुयाता वयं वीर सात्वतीपुत्रमाहवे प्रवेष्टुमानास्तेनैव येन संप्राविशच्चमूं ततः सै
न्धवको राजा क्षुद्रस्तात जयद्रथः वरदानेन रुद्रस्य सर्वान्नः समवारयत ततो द्रोणः कृपः कर्णो द्रौणिः कौ

शल्यश्चैव च कृतवर्मा च सौभद्रं षड्रथाः पर्यवारयन परिवार्य तु तैः सर्वैर्युधि बालो महारथैः यतमानः परं शक्त्या चतुर्भि
र्विरथीकृतः ततो दौःशासनिः क्षिप्रं तथा तैर्विरथीकृतं संशयं परमं प्राप्य दिष्टांतेनाभ्ययोजयत स तु हत्वा सहस्राणि नराश्वर
थदंतिनां अष्टौ रथसहस्राणि नवदंतिशतानि च राजपुत्रसहस्रे द्वे वीरांश्चालक्षितान्बहून बृहद्बलं च राजानं स्वर्गेणा
जौ प्रयोज्य ह ततः परमधर्मात्मा दिष्टांतमुपजग्मिवान एतावदेव निर्वृत्तमस्माकं शोकवर्द्धनं स चैव पुरुषव्याघ्रः स्वर्गलो
कमवाप्नवान ततोर्जुनो वचः श्रुत्वा धर्मराजेन भाषितं हा पुत्र इति निःश्वस्य व्यथितो न्यपतद्भुवि विषण्णवदनाः सर्वे परिवा
र्य धनंजयं नेत्रैरनिमिषैर्दीनाः प्रत्यवेक्षन्परस्परं प्रतिलभ्य ततः संज्ञां वासविः क्रोधमूर्छितः कंपमानो ज्वरेणेव निःश्व
संश्च मुहुर्मुहुः पाणिं पाणौ विनिष्पिष्य श्वसमानोश्रुनेत्रवान उन्मत्त इव विप्रेक्षन्निदं वचनमब्रवीत सत्यं वः प्रतिजा
नामि श्वोस्मि हंता जयद्रथं न चेद्वधभयाद्भीतो धार्तराष्ट्रान्प्रहास्यति न चास्मान् शरणं गच्छेत्कृष्णं वा पुरुषोत्तमं भवंतं
वा महाराज श्वोस्मि हंता जयद्रथं धार्तराष्ट्रप्रियकरं मयि विस्मृतसौहृदं पापं बालवधे हेतुं श्वोस्मि हंता जयद्रथं र
क्षमाणाश्च तं संख्ये ये मां योत्स्यंति केचन अपि द्रोणकृपौ राजन् छादयिष्यामि तान् शरैः यद्येतदेवं संग्रामे न कुर्यां पुरुषर्ष
भाः मास्म पुण्यकृतां लोकान्प्राप्नुयां शूरसंमतान् ये लोका मातृहंतॄणां ये चापि पितृघातिनां गुरु
दारगतानां ये च साधूनसूयतां ये च ये चापि परिवादिनां ये च निक्षेपहर्तॄणां ये च विश्वासघातिनां तानहं चाधिगच्छे
यं न चेद्धन्यां जयद्रथं भुक्तपूर्वां स्त्रियं ये च निंदतामघशंसिनां ब्रह्मघ्नानां च ये लोका ये च गोघातिनामपि पायसं वा यवा
न्नं शाकं कृशरमेव च संयावापूपमांसानि ये च लोका वृथाश्नतां तानह्नैवाधिगच्छेयं न चेद्धन्यां जयद्रथं वेदाध्या

द्रोण० ४३

पितृमातृवधे संशितेव्राह्निजोत्तमे अवमस्य च ये यांति विश्वासात् साधुन्तु कं तथा स्पृशतो ब्राह्मणं गां च पादेनाग्निं च यो भवेत् याप
सुश्लेष्मपुरीषं च मूत्रं चाप्सु च तां गतिः तां गच्छेयं गतिं कष्टां न चेद्धन्यां जयद्रथं नग्नस्य स्नायमानस्य या च संध्यातिथेर्गतिः उ
त्कोचिनां मृषा कीर्तनां वंचकानां च या गतिः आत्मापहारिणां या च या च मिथ्याभिशंसिनां भृत्यैः संदृश्यमानानां पुत्रदारा
श्रितैस्तथा असंविभज्य क्षुद्राणां या गतिर्मिष्टमश्नतां तां गच्छेयं गतिं घोरां न चेद्धन्यां जयद्रथं आश्रितं चापि यस्त्यक्त्वा साधुं त
द्वचने रतं न विभर्त्ति नृशंसात्मा निंदते चोपकारिणं अर्हते प्रतिवेश्याय श्राद्धं यो न ददाति च अनर्हेभ्यश्च यो दद्यात् वृषली
पतये तथा मद्यपो भिन्नमर्यादः कृतघ्नो भर्तृनिंदकः तेषां गतिमियां क्षिप्रं न चेद्धन्यां जयद्रथं धर्माद्पेतास्तथा ये चान्येत्र मया
नात्रानुकीर्तिताः ये चानुकीर्तितास्तेषां गतिं क्षिप्रमवाप्नुयां यदि व्युष्टामिमां रात्रिं श्वो न हन्यां जयद्रथं इमां चाप्यपरां भूयः
प्रतिज्ञां मे निबोधत अस्मिन्नहते पापे सूर्योस्तमुपयास्यति भुंजानानामसंस्थ्येऽत्तं वा चापि स्वाहतां पालाशमास्
नेचैव पादुके हेतु धावनं यं वा च जयतां लोकाः स्वपतां चयथोचस्ति गच्छेयं तान्ह लोकान्न चेद्धन्यां जयद्रथं शीतभीताश्चये
विप्राणां लोभसंक्षात्त्रियाः तां गच्छेयं गतिं वीर न चेद्धन्यां जयद्रथं एककूपोदकग्रामे वेदध्वनिविवर्जिते षण्मासं तत्र वासे
मेन चेद्धन्यां जयद्रथं धनयोवतहृष्यो भर्त्तारं वावमन्यते तां गतिं हि गमिष्यामि न चेद्धन्यां जयद्रथं परदाररता ये च ये च ब्रह्म
णनिंदकाः गोलवाधरतानां च वृषलीपतिनां तथा दिवामैथुनिनः पापा दिवसेषु च शेरते आगारदाहिनां च आशांति सम
श्चाविवर्जिताः रजस्वलां सेवयते ये मोषापाकेषु च विघ्नकृत् कन्यां शुल्केन हरन्तं ब्राह्मणाः कविक्रया वेदविक्रयिणां या
वा पियामद्विजक्षातिनां याचकानां कुयाजीनां ब्राह्मणानां स्ववर्त्तिनां आस्यमैथुनिकानां लोकान्ये चाभैथुनिकीर्त्तताः तान्ह्लो

कान्क्षिप्रामि न चेद्धन्यां जयद्रथं ब्राह्मणस्य प्रतिश्रुत्य येन बालो न मोहिताः स्त्रीणामुतिहतानां च स्त्रीवाधनकौचित्राणाहि
वद्वम प्रत्युक्त्वा नो याति गतिर्ह्येवं नितिष्ठितेः तां हि गमिष्यामि न चेद्धन्यां जयद्रथं यद्यस्मिन्नहते पापे सूर्योस्तमुपयास्यति
इहैवमं प्रवेष्टाहं ज्वलितं जातवेदसं असुरसुरमनुष्याः पक्षिणो वोरगा वा पितृरजनिचरा वा ब्रह्मदेवर्षयो वा
चरमचरमपीदं यत्परं चापि तस्मात् तदपि मम रिपुं तं रक्षितुं नैव शक्ताः यदि विशति रसातलं तदग्र्यं वियदपि देवपुरं दितेः पुरं वा
तदपि शरशतैरहं प्रभाते भृशमभिमन्युरिपोः शिरोभिहन्ता एवमुक्त्वा विचिक्षेप गांडिवं सव्यदक्षिणं तस्य शब्दमतिक्र
म्यस्य तुः शब्दो स्पृष्टदिवं अर्जुनेन प्रतिज्ञाते पांचजन्यं जनार्दनः प्रदध्मौ तत्र संक्रुद्धो देवदत्तं च फाल्गुनः स पांचजन्यो
च्युतवक्रवायुनाभृशं सुपूर्णोदरनिःसृतो ध्वनिः जगत्सपातालवियद्दिगीश्वरं प्रकंपयामास युगात्ययो यथा ततो वादि
त्रघोषाश्च प्रादुरासन्सहस्रशः सिंहनादाश्च पांडूनां प्रतिज्ञाते महात्मना इति श्रीमहाभारते द्रोणपर्वणि अभि
मन्युवधः समाप्तः संजय उवाच श्रुत्वा तु तं महाशब्दं पांडूनां जयगृद्धिनां चारैः प्रवेदिते तत्र समुत्थाय जयद्रथः
शोकसंमूढहृदयो दुःखेनाभिपरिप्लुतः मज्जमान इवागाधे विपुले शोकसागरे जगाम समितिं राज्ञां सेवको विम
प्रवक्तु स तेषां नरदेवानां सकाशे परिदेवयन् अभिमन्योः पितुर्भीतः सव्रीडो वाक्यमब्रवीत् यो सौ पांडोः किल
क्षेत्रे जातः शक्रेण कामिना स निनीषति दुर्बुद्धिर्मां किलैकं यमक्षयं तत्स्वस्ति वोस्तु यास्यामि स्वगृहं जीवितेप्सया
अथवा स्थ प्रतिबला स्त्रातुं मां मानकाहिते किं मां पुनर्मेकेन फाल्गुनेन जिघांसता तन्न त्रायत्तु भवन्तो मां समस्ताः
पतयः क्षितिः प्रहर्षः पांडवानां तु श्रुत्वा महज्जयं सीदंति मम गात्राणि मुमूर्षोरिव पार्थिवाः वधो नूनं प्रतिज्ञातो मम

Indira Gandhi National Centre for the Arts

द्रोण० ४४

मगांडीवधन्वना तथाहि हृष्टाः क्रोशंति शोककाले स्म पांडवाः तन्नहे वा न गंधर्वा नासुरोरगराक्षसाः उत्सहंते ऽन्यथा कर्तुं
कुतएव नराधिपाः तस्मान्मामभ्यनुज्ञातुमर्हथ भद्रं वोस्तु नरर्षभाः अदर्शनं गमिष्यामि न मां द्रक्ष्यंति पांडवाः एवं विलपमा
नं तं भयाद्व्याकुलचेतसं आत्मकार्यगरीयस्त्वाद्राजा दुर्योधनो ऽब्रवीत् न भेतव्यं नरव्याघ्र को हि त्वां पुरुषर्षभ मध्ये क्ष
त्रियवीराणां तिष्ठंतं प्रार्थयेद्युधि अहं वैकर्तनः कर्णश्चित्रसेनो विविंशतिः भूरिश्रवाः शलः शल्यो वृषसेनो दु
र्मर्षणः पुरुमित्रो जयो भोजः कांबोजश्च सुदक्षिणः सत्यव्रतो महाबाहुर्विकर्णो दुर्मुखस्तथा दुःशासनः सुबा
हुश्च कलिंगश्चाप्युदायुधः विंदानुविंदावावंत्यौ द्रोणो द्रौणिः ससौबलः एते चान्ये च बहवो नानाजनपदेश्व
राः ससैन्यास्त्वामभियास्यंति व्येतु मानससंज्वरः त्वं चापि रथिनां श्रेष्ठः स्वयं शूरो ऽमितद्युते स कथं पांडवेभ्यो भयम
यं पश्यसि सैंधव अक्षौहिण्यो हि सायाहं एकादश महायास्त्वं शरणा यत्नाद्योत्स्यंति मा भैस्त्वं सैंधव व्येतु ते भयं सैंधवस्त्वेवं
च एवमाश्वासितो राजन्पुत्रेण तव सैंधवः दुर्योधनेन सहितो द्रोणं रात्रावुपागमत् उपसंग्रहणं कृत्वा द्रोणाय महीप
तौ ते उपोपविश्य प्रणतः पप्रच्छेदं इदं तदा निमित्ते दूरपातित्वे लघुत्वे दृढवेधने मम ब्रवीतु भगवान्विशेषं फाल्गु
नस्य च विद्याविशेषमिच्छामि ज्ञातुमाचार्य तत्त्वतः अर्जुनस्यात्मनश्चैव यथा यात्रा यथातथ्यं प्रचक्ष्व मे द्रोण उवाच सममा राम
चार्यकं तात तव चैवार्जुनस्य च योगाद्दुःखोषितत्वाच्च तस्मात्त्वत्तोधिकोर्जुनः न तु ते युधि संत्रासः कार्यः पा
र्थात्कथंचन अहं हि रक्षिता तात भयात्त्वां नात्र संशयः न हि मद्बाहुगुप्तस्य प्रभवंत्यमरा अपि अहं यियासामि ते व्यू
हं यं पार्थो न तरिष्यति तस्माद्युध्यस्व मा भैस्त्वं स्वधर्ममनुपालयन् पितृपैतामहं मार्गमनुयाहि महारथ अधीत्य

विधिवद्वेदानग्नयः सुहुतास्त्वया इष्टं च बहुभिर्यज्ञैर्न ते मृत्युर्भयंकरः दुर्लभं मानुषैर्मंदैर्महाभाग्यमवाप्य तु भुजवीर्या
र्जितांल्लोकान्दिव्यान्प्राप्स्यस्यनुत्तमान् कुरवः पांडवाश्चैव वृष्णयो ऽन्ये च मानवाः अहं च सहपुत्रेण अध्रुवा इति वि
चिंत्यतां पर्यायेण वयं सर्वे कालेन बलिना हताः परलोकं गमिष्यामः स्वैः स्वैः कर्मभिरर्चिताः तपस्तप्त्वा तु यांल्लो
कांस्तु प्राप्नुवंति तपस्विनः क्षत्रधर्माश्रिता वीराः क्षत्रियाः प्राप्नुवंति तान् एवमाश्वासितो राजन्भारद्वाजेन सैं
धवः अपानुदद्भयं पार्थाद्युद्धाय च मनो दधे ततः प्रहर्षः सैन्यानां तवाप्यासीद्विशांपते वादित्राणां च निनदैः सिं
हनादरवैः सह इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधो संजय उवाच प्रतिज्ञाते तु पार्थेन सिंधुराजवधे
तदा वासुदेवो महाबाहुर्धनंजयमभाषत भ्रातृणां मतमाज्ञाय त्वया वाचा प्रतिश्रुतं सैंधवं चास्मि हंतेति तत्साह
सं कृतं असंमंत्र्य मया सार्धमतिभारो ऽयमुद्यतः कथं तु सर्वलोकस्य नावहास्याम हे वयं धार्तराष्ट्रस्य शिबिरे
मया प्रणिहिताश्चराः त इमे शीघ्रमागम्य प्रवृत्तिं वेदयंति नः त्वया वै संप्रतिज्ञाते सिंधुराजवधे विभो सिंहनादः
स वादित्रैः सुमहानिह तैः श्रुतः तेन शब्देन वित्रस्ता धार्तराष्ट्राः ससैंधवाः नाकस्मात्सिंहनादो ऽयमिति मत्वा व्यव
स्थिताः सुमहानभवच्छब्दः संयत्ताः कौरवा महाभुज आसीन्नागाश्वपत्तीनां रथघोषश्च भैरवः अभिमन्युवधं श्रुत्वा
ध्रुवमार्तो धनंजयः रात्रौ निर्यास्यति क्रोधादिति मत्वा व्यवस्थिताः नशाङ्कसंयात्ताः कौरवाणां महाभुज आसीन्नागा
श्वपत्तीनां रथघोषश्च भैरवः अभिमन्योर्वधं श्रुत्वा ध्रुवमार्तो धनंजयः रात्रौ निर्यास्यति क्रोधादिति मत्वा व्यवस्थिताः
तैर्यतद्भिरियं सत्या श्रुता सत्यवतां त्वया प्रतिज्ञा सिंधुराजस्य वधे राजीवलोचन ततो विमनसस्त्रस्ताः क्षुद्रमृगा इ
व आसन्सुयोधनामात्याः स च राजा जयद्रथः अथोत्थाय महादीनाः सैन्याः शिबिरमात्मना आयातो वीरमिष्ट

Indira Gandhi National Centre for the Arts

द्रोण० ५७

नामीश्वरो भरतश्रेष्ठ रिवतः स मंत्रकाले संमंत्रस्य सर्वो नैश्रेयसीं क्रियां सुयोधनमिदं वाक्यमब्रवीद्राजसंसदि मामसौ
पुत्रहंतेति मन्वानोभिप्राता धनंजयः प्रतिज्ञातो हि सेनायां मध्ये तेन वधाय मम तन्न देवा न गंधर्वा नासुरोरगराक्षसाः उत्स
हंते न्यथाकर्तुं प्रतिज्ञां सव्यसाचिनः ते मां रक्षत संग्रामे मा वो मूर्ध्नि धनंजयः पदं कृत्वाप्नुयाल्लक्ष्यं तस्मादत्र विधीय
तां श्रेयरक्षणे मम सेव्या क्रियतां कुरुनंदन अरक्ष्यमाणो हि मां राजन्गमिष्यामि गृहानहं एवमुक्तस्त्ववाकशीर्षो विम
नाः सुयोधनः श्रुत्वा तं समयं तस्य ध्यानमेवान्वपद्यत आर्तमात्मानमभिसंप्रेक्ष्य राजा किल स सैंधवः मृदु चात्महितं चै
वसापेक्षमिदमुक्तवान् नेह पश्यामि भवतां यस्य वीर्यं धनुर्द्धरं योर्जुनस्यास्त्रमस्त्रेण प्रतिहन्यान्महाहवे वा
सुदेवसहायस्य गांडीवं धुन्वतो धनुः कोर्जुनस्याग्रतस्तिष्ठेत्साक्षादपि शतक्रतुः महेश्वरोपि पार्थेन श्रूयते योधितः
पुरा पदातिना महावीर्यो गिरौ हिमवति प्रभुः दानवानां सहस्राणि हिरण्यपुरवासिनां जघानैकरथेनैव देवराजप्र
चोदितः समायुक्तो हि कौंतेयो वासुदेवेन धीमता सामरानपि लोकांस्त्रीन्हन्यादिति मतिर्मम सोहमिच्छाम्यनुज्ञातुं र
क्षितुं वा महात्मना द्रोणेन सहपुत्रेण वीरेण यदि मन्यसे स राजा स्वयमाचार्यं भृशमत्रार्थितोर्जुन संविधानं च विहि
तं रथाश्च कल्पसंज्ञिताः कर्णो भूरिश्रवा द्रौणिर्वृषसेनश्च दुर्जयः कृपश्च मद्रराजश्च षडेतेस्य पुरोगमाः शकटः पद्म
कश्चार्धव्यूहो द्रोणेन विहितः पद्मकर्णिकमध्यस्थः सूचीपार्श्वे जयद्रथः स्थास्यते रक्षितो वीरैः सिंधुराड्युद्धदुर्मदैः ध
नुष्यस्त्रे च वीर्ये च प्राणे चैव तथौरसे अविषह्यतमा ह्येते निश्चिताः पार्थ षड्रथाः एतानजित्वा षड्रथान्नैव प्राप्यो जयद्रथः तेषामे राम
केकशो वीर्यं पश्य त्वमनुचिंतय सहिता हि नरव्याघ्रा न शक्याः सहसा जेतुं भूयस्तं मंत्रयिष्यामि नीतिमात्महिताय
वै मंत्रज्ञैः सचिवैः सार्द्धं सुहृद्भिः कार्यसिद्धये इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधे अर्जुन उवाच षड्रथा

धार्त्तराष्ट्रस्य मन्ये यान्बलाधिकान् तेषां वीर्यं ममार्द्धेन तुल्यमिति मे मतिः अस्त्रमस्त्रेण सर्वेषां मेतेषां मधुसूदन
मया द्रष्टासि निर्भिन्नं जयद्रथवधैषिणा द्रोणस्य मिषतः सोहं सगणस्य विलप्यतः मूर्ध्नि सिंधुराजस्य पातयिष्या
मि मंत्रेन यदि साध्याश्च रुद्राश्च वसवश्च महाश्विनः मरुतश्च सहेंद्रेण विश्वेदेवाः महेश्वराः पितरः सहगंधर्वाः
सुपर्णाः सागराद्रयः द्यौर्वियत्पृथिवी च यदिशश्च सदिगीश्वराः ग्राम्यारण्यानि भूतानि स्थावराणि चराणि च त्रा
तारः स्युः सिंधुराजस्य भवंति मधुसूदन तथापि बाणैर्निहतं श्वो द्रष्टासि रणे मया सत्येन ते शपे कृष्ण तथैवायुध
मालभे यश्च गोप्ता महेष्वासस्तस्य पापस्य दुर्मतेः तमेव प्रथमं द्रोणमभियास्यामि केशव तस्मिन्द्यूतमिदं बद्धमन्य
ते स्म सुयोधनः तस्मात्तस्यैव सेनाग्रं भित्त्वा यास्यामि सैंधवं द्रष्टासि श्वो महेष्वासान्नाराचैस्तिग्मतेजितैः शृंगाणीव
गिरेर्वज्रैर्दार्यमाणान्मया युधि नरनागाश्वदेहेभ्यो विस्रविष्यति शोणितं पतद्भ्यः पतितेभ्यश्च विभिन्नेभ्यः शितैः शरैः
गांडीवप्रेषिता बाणा मनोनिलसमा जवे नृनागाश्वान्विदेहासून्कर्तारश्च सहस्रशः यमात्कुबेराद्वरुणाद्रुद्रा
दिंद्राच्च यन्मया उपात्तमस्त्रं घोरं तद्द्रष्टारो नरा युधि ब्राह्मेणास्त्रेण चास्त्राणि हन्यमानानि संयुगे मया द्रष्टासि सर्वेषां सै
धवस्याभिरक्षिणां शरवेगसमुत्कृत्तै राज्ञां केशव मूर्द्धभिः आस्तीर्यमाणां पृथिवीं द्रष्टासि श्वो मया युधि क्रव्या
दांस्तर्पयिष्यामि द्रावयिष्यामि शात्रवान् सुहृदो नंदयिष्यामि पातयिष्यामि सैंधवं बह्वागस्कृत्कुसंबंधी पापदेश
समुद्भवः मया सैंधवको राजा हतः स्वाञ्शोचयिष्यति सर्वक्षीरान्नभोक्तारं पापाचारं रणाजिरे मया राजन्केवा
गोभिन्नं द्रष्टासि सैंधवं तथा प्रभाते कर्तास्मि यथा कृष्ण सुयोधनः नान्यं धनुर्द्धरं लोके मंस्यते मत्समं युधि गांडीवं च

Indira Gandhi National
Centre for the Arts

द्रो०प०
६८

ईयं योद्धा चाहं नरर्षभ तं च पश्य महाहृषीकेश शक्तिं त्वस्याहजितं मया तत्र प्रसाद्य भगवान् किमिवाक्तिर्यामम श्रविस्तृतं हृषी
केश किं ज्ञानमोविद्याहं से यथालक्ष्माद्धितं च द्रष्टुमर्जुनं च यथा जलं एवमेतां प्रतिज्ञां मे सत्यां विद्धि जनार्दन मा
त्वमस्या ममा त्राणि मा वमस्या धनुर्द्वते मा समस्य बलं वाहोमी वमस्या धनंजयं तथा भिगाभिसंप्रासंन नीपेपंज
पामिव तेन सत्येन संग्रामे हतं विद्धि जयद्रथं श्वः सैन्धवान्नोसापेक्ष्य वा साधुषु सज्जाति: श्रोष्यं वा पिच दृष्टेषु कृष्णो
नारायणोऽव्यय: संजय उवाच स एवमुक्त्वा हृषीकेशः स्वयमात्मानमात्मना संदिदेश जुनो नई नवासवि: केशवस्य नु
यथा प्रभातां रजनीं कल्पित: स्याद्रथो मम तथा कार्यं त्वया सूत कार्यं हि महदुद्यतं इति श्रीमहाभारते द्रोणपर्वणि
णि जयद्रथवधे संजय उवाच तां निशां दु:खशोकार्तौ निश्वसंतौ विवोरगौ निद्रां नैवोपलेभाते वासुदेवधनं
जयौ नरनारायणौ क्रुद्धौ ज्ञात्वा देवा: सवासवा: व्यथिताश्चिंतयामासु: किं स्विदेतद्भविष्यति ववुश्च दारु
णा वाता रूक्षा घोराभिशंसिन: सकबंधस्तथादित्ये परिघ: समदृश्यत शुष्काशन्यश्च निष्पेतु: सनिर्घाता: सविद्युत:
चचाल चापि पृथिवी सशैलवनकानना चुक्षुभुश्च महाराज सागरा मकरालया: प्रतिस्रोत: प्रवृत्ताश्च तथा
गंतुं समुद्रगा: रथाश्वनरनागानां प्रवृत्तमधरोत्तरं क्रव्यादानां प्रमोदार्थं यमराष्ट्रविवृद्धये वाहनानि श
कृन्मूत्रे मुमुचू रुरुदुश्च ह तान्दृष्ट्वा दारुणान्सर्वानुत्पातांल्लोमहर्षणान् सर्वे ते व्यथिता: सैन्यास्त्वदीया राम
भरतर्षभ श्रुत्वा महाबलस्योग्रां प्रतिज्ञां सव्यसाचिन: अथ कृष्णं महाबाहुरब्रवीत्पाकशासनि: आश्वा
सय त्वं भगिनीं स्नुषया सह स्नुषा चास्या वयस्याश्च विशोका: कुरु माधव साम्ना सत्येन युक्तेन वचसा

श्वासय प्रभो ततोऽर्जुनगृहं गत्वा वासुदेव: सुदुर्मना: भगिनीं पुत्रशोकार्तामाश्वासयत दु:खितां वासुदेव उवाच मा
शोकं कुरु वार्ष्णेयि कुमारं प्रति सस्नुषा सर्वेषां प्राणिनां भीरु निष्ठैषा कालनिर्मिता कुले जातस्य वीरस्य क्षत्रियस्य विशे
षत: सदृशं मरणं ह्येतत्तव पुत्रस्य मा शुच: दिष्ट्या महारथो वीर: पितुस्तुल्यपराक्रम: क्षात्रेण विधिना प्राप्तो वी
राभिलषितां गतिं जित्वा सुबहुश: शत्रून्प्रेषयित्वा च मृत्यवे गत: पुण्यकृतां लोकान्सर्वकामदुहोऽक्षयान् तपसा
ब्रह्मचर्येण श्रुतेन प्रज्ञयापि च संतो यां गतिमिच्छंति तां प्राप्तस्तव पुत्रक: वीरसूर्वीरपत्नी त्वं वीरजा वीरबांधवा मा शुच
स्तनयं भद्रे गत: स परमां गतिं प्राप्स्यते चाप्यसौ पाप: सैंधवो बालघातक: अस्यावलेपस्य फलं ससुहृद्गणबांधव:
व्युष्टायां तु वरारोहे रजन्यां पापकर्मकृत् न हि मोक्ष्यति पार्थात्स प्रविष्टोऽप्यमरावतीं श्व: शिर: श्रोष्यसे तस्य सैंधवस्य रणा
त् समंतपंचकाद्बाह्यं विशोका भव मा रुद क्षत्रधर्मं पुरस्कृत्य गत: शूर: सतां गतिं यां गतिं प्राप्नुयामेह ये चान्ये शस्त्रजी
विन: व्यूढोरस्को महाबाहुरनिवर्ती रथप्रणुत् गतस्तव वरारोहे पुत्र: स्वर्गं ज्वरं जहि अनुयातश्च पितरं मातृपक्षं च वी
र्यवान् सहस्रशो रिपून्हत्वा हत: शूरो महारथ: आश्वासय स्नुषां राज्ञि मा शुच: क्षत्रिये भृशं श्व: प्रियं सुमहच्छ्रुत्वा
विशोका भव नंदिनी यत्पार्थेन प्रतिज्ञातं तत्तथा न तदन्यथा चिकीर्षितं हि ते भर्तुर्न भवेज्जातु निष्फलं यदि च मनुज
पन्नगा: पिशाचा रजनिचरा: पतगा: सुरासुराश्च रणगतमभियांति सिंधुराजं न स भविता सह तैरपि प्रभाते इति श्री
महाभारते द्रोणपर्वणि जयद्रथवधे संजय उवाच एतच्छ्रुत्वा वचस्तस्य केशवस्य महात्मन: सुभद्रा पुत्रशोकार्ता वि
ललाप सुदु:खिता: हा पुत्र मम मंदाया: कथमेत्यासि संयुगे निधनं प्राप्तवांस्तात पितु: स्तुल्यपराक्रम: कथमिंदीवरश्यामं सु

Indira Gandhi National
Centre for the Arts

द्रोण०
८७

दृष्ट्वा चारुलोचनं सुरवं ते दृश्यते वत्स कुंठितं रणरेणुना ॥ नूनं शूरं निपातितं त्वां पश्यंत्यनिवर्त्तिनं सुशिरोग्रीवबाह्वंसं व्यूढो
रस्कं नतोदरं चारूपचितसर्वांगं स्वक्षं शस्त्रक्षताचितं भूतानि त्वां निरीक्षंते नूनं चंद्रमिवोदितं शयनीयं पुरा यस्य स्पर्द्ध्या
स्तरणसंवृतं भूमावद्य कथं शेषे विप्रविद्धः सुखोचितः योन्वास्यत पुरा वीरो वरस्त्रीभिर्महाभुजः कथमन्वास्यते सो
द्य शिवाभिः पतितो मृधे योस्तूयत पुरा हृष्टैः सूतमागधबंदिभिः सोद्य क्रव्याद्गणैर्घोरैर्विनदद्भिरुपास्यते पांडवेषु च
नाथेषु वृष्णिवीरेषु वा विभो पांचालेषु च वीरेषु हतः केनास्यनाथवत् अतृप्तदर्शना पुत्र दर्शनस्य तवानघ मंदभाग्या
गमिष्यामि व्यक्तमद्य यमक्षयं विशालाक्षं सुकेशांतं चारुवाक्यं सुगंधि च तव पुत्रक द्रक्ष्यामि मुखं निर्व्रणं
पुनः क्षितौ पतितो वत्स स्वप्नो पूर्णोपि वा श्रुतं अंकमारुह्य मे हा या द्यत्वं मयाश्च दर्शिने धिग्बलं भीमसेनस्य धिक्पार्थस्य धनु
तं धिग्वीर्यं वृष्णिवीराणां पांचालानां च धिग्बलं धिक्केकयांस्तथा चेदीन्मत्स्यांश्चैवाथ सृंजयान् ये त्वां रणगतं वीरं न शेकुरभि
रक्षितुं अद्य पश्यामि पृथिवीं शून्यामिव हतत्विषं अभिमन्युमपश्यंती शोकव्याकुललोचना स्वस्रीयं वासुदेवस्य पुत्रं गांडीवधन्वनः
कथं त्वातिरथं वीरं द्रक्ष्याम्यद्य निपातितं हा वीर दृष्टो नष्टश्च धनं स्वप्न इवासि मे अहो ह्यनित्यं मानुष्यं जलबुद्बुदचंच
लं इमां ते तरुणीं भार्यां त्वदाधिभिरभिप्लुतां कथं संधारयिष्यामि विवत्सामिव धेनुकां अहो ह्यकाले प्रस्थानं कृतवानसि पुत्रक वि
हाय फलकाले मां सुगृद्धां तव दर्शने नूनं गतिः कृतांतस्य प्राज्ञैरपि सुदुर्विदा यत्र त्वं केशवे नाथे संग्रामेऽनाथवद्धतः यज्वनां राम
दानशीलानां ब्राह्मणानां कृतात्मनां चरितब्रह्मचर्याणां पुण्यतीर्थावगाहिनां कृतज्ञानां वदान्यानां गुरुशुश्रूषिणामपि
सहस्रदक्षिणानां च या गतिस्तामवाप्नुहि नैवेशिके च निरतो हतानां या गतिः शुभा ब्राह्मणेभ्यः शरण्येभ्यो निधिं निदधतां

चया पापापित्यसर्हदारनां तां गतिं व्रज पुत्रक ब्रह्मचर्येण यां पांति मुनयः संशितव्रताः एकपत्न्यश्च यां यांति तां गतिं व्रज पुत्रक
राज्ञां सुचरितैर्या च गतिर्भवति शाश्वती चतुराश्रमिणां पुण्यैः पावितानां सुरक्षितैः दीनानुकंपिनां या च तां गतिं व्रज पुत्रक
कृच्छ्रेषु वा वारयतामात्मानं व्यसनेषु च गतिः शाकामिहरघानां तां गतिं व्रज पुत्रक मातापित्रोश्च शुश्रूषां कल्पयंतीह ये सदा
स्वदारनिरतानां च या गतिस्तामवाप्नुहि ऋतुकाले स्वकां भार्यां गच्छतां या मनीषिणां परस्त्रीभ्यो निवृत्तानां तां गतिं व्रज
पुत्रक साम्ना ये सर्वभूतानि पश्यंति गतमत्सराः नारुंतुदानां क्षमिणां या गतिस्तामवाप्नुहि मधुमांसनिवृत्तानां मदाद्दं
भात्तथानृतात् परोपतापत्यक्तानां तां गतिं व्रज पुत्रक ह्रीमंतः सर्वशास्त्रज्ञा ज्ञानतृप्ता जितेंद्रियाः यां गतिं साधवो यांति
तां गतिं व्रज पुत्रक एवं विलपतीं दीनां सुभद्रां शोककर्षितां अन्वपद्यत पांचाली वैराटीसहिता तदा ताः प्रकामं रुदित्वा च वि
लप्य च सुदुःखिताः उन्मत्तवत्तदा राजन्विसंज्ञा न्यपतन्भुवि सोपचारस्तु कृष्णस्तां दुःखितां भृशदुःखितः सिक्त्वांभसा
समाश्वास्य तत्तदुक्त्वा हितं वचः विसंज्ञकल्पां रुदतीमपविद्धां प्रवेपतीं भगिनीं पुंडरीकाक्ष इदं वचनमब्रवीत् सुभद्रे मा शु
चः पुत्रं पांचाल्याश्वासयोत्तरां गतोऽभिमन्युः प्रथितां गतिं क्षत्रियपुंगवः ये चान्येऽपि कुले संति पुरुषा नो वरानने सर्वे ते
गतिं यांतु यशस्विनः कुर्याम तद्वयं कर्म क्रियासुः सुहृदश्च नः कृतवान्यादृगद्यैकस्तव पुत्रो महारथः
एवमाश्वास्य भगिनीं द्रौपदीमपि चोत्तरां पार्थस्यैव महाबाहुः पार्श्वमागादरिंदमः ततोऽभ्यनुज्ञाय नृपान् कृष्णो बंधूंस्त
थार्जुनं विवेशांतःपुरे राजंस्ते च जग्मुर्यथालयं इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधे संजय उवाच ततोऽर्जुन
स्य भवनं प्रविश्याप्रतिमं विभुः स्पृष्ट्वांभः पुंडरीकाक्षः स्थंडिले शुभलक्षणे संतस्तार शुभां शय्यां दर्भैर्वैडूर्यसंनिभैः
ततो माल्येन विधिवल्लाजैर्गंधैः सुमंगलैः अलंचकार तां शय्यां परिवार्यायुधोत्तमैः ततः स्पृष्टोदके पार्थे विनीताः प

Indira Gandhi National
Centre for the Arts

द्रोण०
४८

रिचारकः नैत्यकं दर्शयांचक्रुर्नैशं त्र्यंबकबलेः अलंचकार तां शय्यां वकवालिं ततः प्रीतमनाः पार्थो गंधमाल्यैश्च माधवं
अलंकृत्योपहारं तं नैशमस्मै न्यवेदयत् स्मयमानस्ततो विष्णुः फाल्गुनं प्रत्यभाषत सुप्यतां पार्थ भद्रं ते कल्याणाय व्रजा
म्यहं स्थापयित्वा ततो द्वास्थान् गोप्तॄंश्चात्तायुधान्नरान् दारुकानुगतः श्रीमान् विवेश शिबिरं स्वकं शिश्ये च शयने शुभ्रे बहु
कृत्यं विचिंतयन् पार्थाय सर्वं भगवान् शोकदुःखापहं विधिं व्यदधात्पुंडरीकाक्षस्तेजोद्युतिविवर्द्धनः योगमास्था
य युक्तात्मा सर्वेषामीश्वरेश्वरः श्रेयस्कामः पृथुयशा विष्णुर्जिष्णोः प्रियंकरः न पांडवानां शिबिरे कश्चित्सुष्वाप तां निशां
प्रजागरः सर्वजनमाविवेश विशांपते पुत्रशोकाभितप्तेन प्रतिज्ञातं महात्मना सहसा सिंधुराजस्य वधो गांडीवधन्वना
तत्कथं नु महाबाहुर्वासविः परवीरहा प्रतिज्ञां सफलां कुर्यादिति ते समचिंतयन् कष्टं हीदं व्यवसितं पांडवेन महात्मना
स च राजा महावीर्यः पारयत्वर्जुनः तत्कथं नु पुत्रशोकाभितप्तेन प्रतिज्ञा महती कृता भ्रातरश्चापि विक्रांता बहु
लानि बलानि च धृतराष्ट्रस्य पुत्रेण सर्वं तस्मै निवेदितं स हत्वा सैंधवं संख्ये पुनरेतु धनंजयः जित्वा रिपुगणांश्चै
व पारयत्वर्जुनो व्रतं एवं ह्यहत्वा सिंधुराजं हि धूमकेतुं प्रवेक्ष्यति न ह्यसावनृतं कर्तुमलं पार्थो धनंजयः धर्मपुत्रः
कथं राजा भविष्यति मृतेऽर्जुने तस्मिन् हि विजयः कृत्स्नः पांडवेन समाहितः यदि नोऽस्ति कृतं किंचिद्यदि दत्तं हुतं यदि फले
न तस्य सर्वस्य सव्यसाची जयत्वरीन् एवं कथयतां तेषां जयमाशंसतां प्रभोः अर्जुनेन प्रतिज्ञातं मातुलेन सह बंधुना सम
जयद्रथं वधिष्यामि श्वोभूत इति ह्यरुक् तत्तु दुर्योधनः श्रुत्वा मंत्रिभिः सत्रमिष्यति यथा जयद्रथं पार्थो न हन्यादिति
संयुगे अक्षौहिण्यो हिताः सर्वा रक्षितुं जयद्रथं द्रोणश्च सह पुत्रेण सर्वास्त्रविधिपारगः एको वीरः सहस्राक्षोऽपि
तृहन्त्रवर्षिहा सोपितन्नोस्सेहता जोहं तु इशोन्माहितो सोहं श्वस्तं करिष्यामि यथा कुंतीसुतोऽर्जुनः अप्राप्तेऽस्मिन्

इतस्कंधगत

महेश्वरः याहतन्हिहितस्तेद्य शेवासि हे तात जयद्रथं अंप्याज्ञाते प्रपन्नत्वमनसा वृषभध्वजं तं देवं मनसा ध्यात्वा जय
को स्वधनंजय ततस्तत्प्रसादात्त्वमस्त्रं प्राप्स्यसि तन्महत् ततः कृष्णवचः श्रुत्वा संस्पृश्योभो धनंजयः भूमावासीनए
काग्रात्मा मनसा भवं ततः प्रणिहिते ब्राह्मे मुहूर्ते शुभलक्षणे आत्मानमर्जुनोऽपश्यद्गगने सह केशवं पुण्ये हिमव
तः पादे मणिमंतं च पर्वतं ज्योतिर्भिश्च समाकीर्णं सिद्धचारणसेवितं वायुवेगगतिः पार्थः खं भेजे सह केशवः केशवेन
गृहीतश्च दक्षिणे विभुना प्रेक्षमाणो बहून् भावान् जगाम सुमहाद्भुतान् उदीच्यां दिशि धर्मात्मा सोऽपश्यच्छ्वेतं
पर्वतं कुबेरस्य विहारे च नलिनीं पद्मभूषितां सरिच्छ्रेष्ठां तथा गंगां वीक्षमाणो बहूदकां सदा पुष्पफलैर्वृक्षैरुपेतां स्फटि
कोपलां सिंहव्याघ्रगणाकीर्णां नानामृगकुलाकुलां पुण्याश्रमवतीं रम्यां मनोज्ञांडजसेवितां मंदरस्य प्रदेशांश्च कि
न्नरोद्गीतनादितान् हेमरूप्यमयैः शृंगैर्नानौषधिविभूषितान् तथा मंदारवृक्षैश्च पुष्पितैरुपशोभितान् स्निग्धांजनच
याकारं संप्राप्तः कालपर्वतं ब्रह्मतुंगं नदीश्चान्यास्तथा जनपदानपि सुशृंगं शतशृंगं च शर्यातिवनमेव च पुण्यमश्व
शिरःस्थानं स्थानमाथर्वणस्य च वृषदंशं च शैलेंद्रं तथा मंदरमेव च अप्सरोभिः समाकीर्णं किन्नरैरुपशोभितं तं
स्मिन्शैले व्रजन्पार्थः सकृष्णः समपश्यत शुभैः प्रस्रवणैर्जुष्टं हेमधातुविभूषितं चंद्ररश्मिप्रकाशांगीं पृथिवीं पु
रमालिनीं समुद्रांश्चाद्भुताकारानपश्यद्बहुलाकरान् वियद्द्यां पृथिवीं चैव पश्यन् विष्णुपदे व्रजन् विस्मितः सह कृष्णेन
क्षिप्तो बाण इवाभ्यगात् ग्रहनक्षत्रसोमानां सूर्याग्न्योश्च समत्विषं अपश्यत तदा पार्थो ज्वलंतमिव पर्वतं समा
साद्य तं शैलवरं शैलाग्रस्थं समवस्थितं तपोनित्यं महात्मानं अपश्यद्वृषभध्वजं सहस्रमिव सूर्याणां दीप्यमानं स्वतेजसा

Indira Gandhi National
Centre for the Arts

द्रो०
५८

मा ज्वलितं जटिलं गौरं कृत्तिवाससं नयनानां सहस्रैश्च विचित्रांगं महौजसं पार्वत्या सहितं देवं भूतसंघैश्च भा
स्वरैः गीतवादित्रसंह्रादलास्यसमन्वितं वल्गितास्फोटितोत्कृष्टपुण्यगंधैश्च सेवितं स्तूयमानं स्तवैर्दिव्यैर्मुनि
भिर्ब्रह्मवादिभिः गोप्तारं सर्वभूतानामिषुधन्वधरमच्युतं वासुदेवस्तु तं दृष्ट्वा जगाम शिरसा क्षितिं पार्थेन सह धर्मा
त्मा प्रियव ब्रह्म सनातनं लोकादिं विश्वकर्माणमजमीशानमव्ययं नमसः परमं योनिं खं वायुं ज्योतिषां निधिं स्र
ष्टारं वारिधाराणां भुवश्च प्रकृतिं परां देवदानवयक्षाणां मानवानां च साधनं योगानां च परं ब्रह्म दृष्टं ब्रह्मविदां
निधिं चराचरस्य स्रष्टारं प्रतिहर्तारमेव च कालकोपं महात्मानं शक्रसूर्यगुणोदयं अवंदत तदा कृष्णो वाङ्मनोबु
द्धिकर्मभिः यं प्रपश्यंति विद्वांसः सूक्ष्माध्यात्मपदैषिणः तमजं कारणात्मानं जग्मतुः शरणं भवं अर्जुनश्चापि तं देवं
भूयो भूयः प्रवंदत ज्ञात्वैकं भूतभव्यादिं सर्वभूतभवोद्भवं ततस्तावागतौ दृष्ट्वा नरनारायणावुभौ सुप्रसन्नमनाः शर्वः प्रो
वाच प्रहसन्निव स्वागतं वां नरश्रेष्ठावुत्तिष्ठेतां गतक्लमौ किं च वामीप्सितं वीरौ मनसः क्षिप्रमुच्यतां येन कार्येण संप्राप्तौ
युवां तत्साधयामि वां व्रियतामात्मनः श्रेयः तत्सर्वं प्रददामि वां ततस्तद्वचनं श्रुत्वा प्रत्युत्थाय कृतांजली वासुदेवार्जु
नौ शर्वं तुष्टुवाते महामती भक्त्या स्तवेन दिव्येन महात्मानमनिंदितौ वासुदेवार्जुनावूचतुः नमो भवाय शर्वाय
रुद्राय वरदाय च पशूनां पतये नित्यमुग्राय च कपर्दिने महादेवाय भीमाय त्र्यंबकाय च शंभवे ईशानाय भगघ्नाय
नमोऽस्त्वंधकघातिने कुमारगुरवे नित्यं नीलग्रीवाय वेधसे पिनाकिने हविष्याय सत्याय विभवे सदा विलोहि
ताय धूम्राय व्याधायानपराजिते नित्यं नीलशिखंडाय शूलिने दिव्यचक्षुषे हंत्रे गोप्त्रे त्रिनेत्राय व्याधाय वसु राम

रेतसे अचिंत्यायांबिकाभर्त्रे सर्वदेवस्तुताय च वृषध्वजाय पिंगाय जटिले ब्रह्मचारिणे तप्यमानाय सलिले ब्रह्मण्यायाजिता
य च विश्वात्मने विश्वसृजे विश्वमावृत्य तिष्ठते नमो नमस्ते सेव्याय भूतानां प्रभवे सदा ब्रह्मवक्त्राय सर्वाय शंकराय शिवाय
च नमोऽस्तु वाचस्पतये प्रजानां पतये नमः नमो विश्वस्य पतये महतां पतये नमः नमः सहस्रशिरसे सहस्रभुजमन्यवे वि
सहस्रनेत्रपादाय नमोऽसंख्येयकर्मणे नमो हिरण्यवर्णाय हिरण्यकवचाय च भक्तानुकंपिने नित्यं सिध्यतां नो वरः प्र
भो संजय उवाच एवं स्तुत्वा महादेवं वासुदेवः सहार्जुनः प्रसादयामास भवं तदा ह्यस्त्रोपलब्धये इति श्रीमाहाभार
ते द्रोणपर्वणि जयद्रथवधपर्वणि स्वप्नप्राप्ते रुद्रीये संजय उवाच ततोऽर्जुनः प्रीतमनाः ववंदे वृषभध्वजं ददर्शोत्फुल्लन
यनः समस्तं तेजसां निधिं तं चोपहारं सुकृतं नैशं नैत्यकमात्मनः ददर्श त्र्यंबकाभ्याशे वासुदेवनिपातितं ततोऽभिपूज्य
मनसा शर्वं कृष्णं च पांडवः इच्छाम्यहं दिव्यमस्त्रमित्यभाषत शंकरं ततः पार्थस्य विज्ञाय वरार्थं वचनं प्रभुः वासुदे
वार्जुनौ देवः स्मयमानोऽभ्यभाषत स्वागतं वां नरश्रेष्ठौ विज्ञातं मनसेप्सितं येन कामेन वां प्राप्तौ तं ददाम्यहं
सरोऽमृतमयं दिव्यमभ्याशे शत्रुसूदनौ तत्र मे तद्धनुर्दिव्यं शराश्च निहिताः पुरा येन देवारयः सर्वे मया युधि निपातिताः
तत आनीयतां कृष्णौ सशरं धनुरुत्तमं तथेत्युक्त्वा तु तौ वीरौ तं सर्वैः पार्षदैः सह प्रस्थितौ तत्सरो दिव्यं दिव्याश्चर्यशतै
र्युतं निर्दिष्टं यद्वृषांकेन पुण्यं सर्वार्थसाधकं तज्जग्मतुरसंभ्रांतौ नरनारायणावृषी ततस्तत्सर आसाद्य सूर्यमंडलसंनि
भं नागमंतर्जले घोरं ददृशातेऽर्जुनाच्युतौ ततः कृष्णश्च पार्थश्च संस्पृश्यापः कृतांजली तौ नागावुपतस्थाते नमस्यंतौ वृषध्व
जं गृणंतौ वेदविदुषौ तद्ब्रह्म शतरुद्रियं अप्रमेयं प्रणमंतौ गत्वा सर्वात्मना भवं ततस्तौ रुद्रमाहात्म्याद्धित्वा रूपं महोरगौ

Indira Gandhi National
Centre for the Arts

द्रोणा०
७०

रगो धनुर्धरा[illegible]रूपं प्रतिपद्यतां तौ तज्ञमथ रुद्रं तु प्रीतौ धनुर्वाणं च सप्रभं आजग्मतुर्महात्मानौ ह्रदं तस्य महात्म
वि ततः पार्श्वाद्वृषांकस्य ब्रह्मचारी समुत्पत पिंगाक्षस्तपसः क्षेत्रं बलवान्नीललोहितः स तद्गृह्य धनुःश्रेष्ठं तस्थौ स्थानं समा
स्थितः व्याकर्षच्चापि विधिवत्सशरं धनुरुत्तमं तस्य मौर्वीं च मुष्टिं च स्थानं चालक्ष्य पांडवः श्रुत्वा मंत्रं भवप्रोक्तं जग्राहाचिंत्यवि
क्रमः सरस्येव च तं वाणं ससर्जातिबलः प्रभुः चकार च पुनर्वीरस्तस्मिन्सरसि तद्धनुः ततः प्रीतं भवं ज्ञात्वा स्मृतवानर्जुनस्तदा
वरमारण्यके दत्तं दर्शनं शंकरस्य च मनसा चिंतयामास तन्मे संपद्यतामिति तस्य तन्मतमाज्ञाय प्रीतः प्रादाद्वरं भवः तच्च पाशुपतं घो
रं प्रतिज्ञायाश्च पारणं ततः पाशुपतं दिव्यमवाप्य पुनरीश्वरात् संहृष्टरोमा दुर्द्धर्षः कृतं कार्यममन्यत ववंदतुश्च संहृष्टौ शिरोभ्यां तौ
महेश्वरं अनुज्ञातौ क्षणे तस्मिन्भवेनार्जुनकेशवौ प्राप्तौ स्वशिबिरं वीरौ मुदा परमया युतौ तथा भवेनानुमतौ महासुरनिपातनौ
इंद्रविष्णू यथा प्रीतौ जंभस्य वधकांक्षिणौ इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधे संजय उवाच तयोः संवदतोरेवं कृष्णदारु
कयोस्तथा सा व्यगाद्रजनी राजन्नथाबुध्यत पार्थिवः पठंति पाणिस्वनिका मागधा मधुपर्किकाः वैतालिकाश्च सूताश्च तुष्टुवुः पुरुषर्षभं
नर्तकाश्चाप्यनृत्यंत जगुर्गीतानि गायनाः कुरुवंशस्तवार्थानि मधुरं रक्तकंठिनः मृदंगा झर्झरा भेर्यः पणवानकगोमुखाः आडंबा
राश्च शंखाश्च दुंदुभ्यश्च महास्वनाः एवमेतानि सर्वाणि तथान्यान्यपि भारत वादयंतः सुसंहृष्टाः कुशलाः साधुशिक्षिताः स शब्द
सलिलघोषो महान्प्राप्तो दिवस्पृक् पार्थिवर्षभं प्रसुप्तं बोधयामास युधिष्ठिरमथाबोधयत् प्रतिबुद्धः सुखं सुप्तो महार्हे शयनोत्तमे उत्थायावश्यकार्यार्थं य राम
यौ स्नानगृहं नृपः ततः शुक्लांबराः स्नातास्तरुणा अष्टोत्तरं शतं स्नापकाः कांचनैः कुंभैः पूर्णैः समुपतस्थिरे सुखासने चोपविष्टः प
रिधायांबरं लघु स्नातश्चंदनसंयुक्तैः पानीयैरभिमंत्रितैः उद्वर्तितः कषायेण बलवद्भिः सुशिक्षितैः आप्लुतः सा

धिवासेन जलेन सुसुगंधिना राजहंसनिभं प्राप्य उष्णीषं शिथिलार्पितं जलक्षयनिमित्तं वै वेष्टयामास मूर्द्धनि हरिणा चंदनेना
नुलिप्य महाभुजः ततोग्निशरणं दीप्तं प्रविवेश विनीतवान् समिद्भिः सपवित्राभिरग्निमाहुतिभिस्तथा मंत्रपूताभिरर्चित्वा
निश्चक्राम गृहात्ततः द्वितीयां पुरुषव्याघ्रः कक्ष्यां निष्क्रम्य पार्थिवः अक्षतैः सुमनोभिश्च वाचयित्वा महाभुजः तान्
द्विजान्मधुसर्पिर्भ्यां फलैः श्रेष्ठैः सुमंगलैः प्रादात्कांचनमेकैकं निष्कं विप्राय पार्थिवः अलंकृतं चाश्वशतं वासांसीष्टा
श्च दक्षिणाः तथा गाः कपिला दोग्ध्रीः सर्षभाः पांडुनंदनः हेमशृंगी रौप्यखुरा दत्त्वा चक्रे प्रदक्षिणं स्वस्तिकान्वर्द्धमानांश्च
घावर्त्तांश्च कांचनान् माल्यं च जलकुंभांश्च ज्वलितं जातवेदसं पूर्णान्यक्षतपात्राणि रुचकान्रोचनांस्तथा स्वलं
कृताः शुभाः कन्याः दधिसर्पिर्मधूदकं मंगल्यान्पक्षिणश्चैव यच्चान्यदपि पूजितं दृष्ट्वा स्पृष्ट्वा च कौंतेयो बाह्यां कक्ष्यामगान्महा
ततस्तस्य महाबाहोस्तिष्ठतः परिचारकाः सौवर्णं सर्वतोभद्रं मुक्तावैदूर्यमंडितं परार्ध्यास्तरणास्तीर्णं सोत्तरच्छदमृद्धिमत् वि
श्वकर्मकृतं दिव्यमुपजह्रुर्वरासनं तत्र तस्योपविष्टस्य भूषणानि महात्मनः उपजह्रुर्महार्हाणि प्रेष्याः शुभ्राणि सर्वशः
युक्ताभरणवेषस्य कौंतेयस्य महात्मनः रूपमासीन्महाराज द्विषतां शोकवर्द्धनं चामरैश्चंद्रशुभ्रैश्च हैमदंडैः सुशोभ
नैः दोधूयमानं शुशुभे विद्युद्भिरिव तोयदः संस्तूयमानः सूतैश्च वंद्यमानश्च वंदिभिः उपगीयमानो गंधर्वैरास्ते स्म
कुरुनंदनः ततो मुहूर्त्तादासीत्तु वंदिनां निस्वनो महान् नेमिघोषश्च रथिनां खुरघोषश्च वाजिनां ह्रादेन गजघंटा
नां शंखानां निनदेन च नराणां पदशब्दैश्च कंपतीव स्म मेदिनी ततः शुद्धांतमासाद्य जानुभ्यां भूतले स्थितः शिरसा वंदनीयं
तमभिवाद्य जनेश्वरं कुंडली बद्धनिस्त्रिंशः सन्नद्धकवचो युवा अभिप्रणम्य शिरसा द्वाःस्थो धर्मात्मजाय वै न्यवेदय

Indira Gandhi National
Centre for the Arts

द्रोण०
७१

हृषीकेशमुपयातं महात्मनः। सोऽब्रवीत्पुरुषव्याघ्रः स्वागतेनैव माधवं अर्घ्यं चैवासनं चास्मै दीयतां परमार्चितं ततः प्रवेश्य
वार्ष्णेयमुपवेश्य वरासने पूजयामास विधिवद्धर्मात्मा युधिष्ठिरः॥ इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधे संजय
उवाच ततो युधिष्ठिरो राजा प्रतिनंद्य जनार्दनं उवाच परमप्रीतः कौंतेयो देवकीसुतं सुखेन रजनी व्युष्टा कच्चित्ते म
धुसूदन कच्चिज्ज्ञानानि सर्वाणि प्रसन्नानि तवाच्युत वासुदेवोपि तद्युक्तं पर्यपृच्छद्युधिष्ठिरं ततः प्रकृतयो ज्ञात्वा न्यवेदयदु
पस्थिताः अनुज्ञातश्च राज्ञा च प्रावेशयत तं जनं विराटं भीमसेनं च धृष्टद्युम्नं च सात्यकिं चेदिपं धृष्टकेतुं च द्रुपदं च महारथं
शिखंडिनं यमौ चैव चेकितानं च केकयं युयुत्सुं चैव कौरव्यं पांचाल्यं चोत्तमौजसं युधामन्युं सुबाहुं च द्रौपदेयांश्च सर्वशः
एते चान्ये च बहवः क्षत्रियाः क्षत्रियर्षभं उपतस्थुर्महात्मानं विविशुश्चासनेषु ते एकस्मिन्नासने वीरावुपविष्टौ महाबलौ
कृष्णश्च युयुधानश्च महात्मानौ महाद्युती ततो युधिष्ठिरस्तेषां शृण्वतां मधुसूदनं अब्रवीत्पुंडरीकाक्षमाभाष्य मधुरं व
चः एकं त्वां वयमाश्रित्य सहस्राक्षमिवामराः प्रार्थयामो जयं युद्धे शाश्वतानि सुखानि च त्वं हि राज्यविनाशं च द्विषद्भिश्च नि
राकृतिं क्लेशांश्च विविधान्कृष्ण सर्वास्तानपि वेत्थ नः त्वयि सर्वेश सर्वेषामस्माकं भक्तवत्सल सुखमायत्तमत्यर्थं यात्रा च
मधुसूदन स त्वं तथा कुरु वार्ष्णेय यथा त्वयि मनो मम अर्जुनस्य यथा सत्या प्रतिज्ञा स्याच्चिकीर्षिता स भवांस्तारयत्वस्माद्दुःखा राम
मर्षमहार्णवात् पारं तितीर्षतामद्य प्लवो नो भव माधव न हि तत्कुरुते संख्ये रथी रिपुवधोद्यतः यथा वै कुरुते कृष्ण सारथि
र्यत्नमास्थितः यथैव सर्वास्वापत्सु पासि वृष्णीन् जनार्दन तथैवास्मान्महाबाहो वृजिनात्त्रातुमर्हसि त्वमगाधेऽप्लवे म
ग्नांस्तारय कृष्ण घोरे समुद्रे प्लवो भूत्वा शंखचक्रगदाधर नमस्ते देवदेवेश सनातन विशातन विष्णो जिष्णो हरे कृ

ष्ण वैकुंठ पुरुषोत्तम नारदस्त्वां समाचष्टे पुराणं पुरुषोत्तमं वरदं शार्ङ्गिणां श्रेष्ठं तत्सत्यं कुरु माधव इत्युक्तः पुंडरीकाक्षो धर्मराजे
न संसदि तोयमेघस्वनो वाग्मी प्रत्युवाच युधिष्ठिरं वासुदेव उवाच सामरेष्वपि लोकेषु सर्वेषु न तथाविधः शरासनधरः कश्चि
द्यथा पार्थो धनंजयः वीर्यवानस्त्रसंपन्नः पराक्रांतो महाबलः युद्धशौंडः सदामर्षी तेजसा परमो नृणां स युवा वृषभस्कंधो दीर्घ
बाहुर्महाबलः सिंहर्षभगतिः श्रीमान् द्विषतस्ते हनिष्यति अहं च तत्करिष्यामि यथा कुंतीसुतोऽर्जुनः धार्तराष्ट्रस्य सैन्यानि धक्ष्यत्यग्नि
रिवोत्थितः अद्य तं पापकर्माणं क्षुद्रं सौभद्रघातिनं अपुनर्दर्शनं मार्गमिषुभिः क्षिप्यतेऽर्जुनः तस्य गृध्राः श्येनाश्च चंड
गोमायवस्तथा भक्षयिष्यंति मांसानि ये चान्ये पुरुषादकाः यद्यस्य देवा गोप्तारः सेंद्राः सर्वे तथाप्यसौ राजधानीं यमस्याद्य हतः प्रा
प्स्यति संकुले निहत्य सैंधवं जिष्णुरद्य त्वामुपयास्यति विशोको विज्वरो राजन् भव भूतिपुरस्कृतः ॥ इति द्रोणपर्वणि जयद्रथ
वधे संजय उवाच तथा संवदतां तेषां प्रादुरासीद्धनंजयः दिदृक्षुर्भरतश्रेष्ठ राजानं ससुहृद्गणं तं निविष्टं शुभां कक्षामभिवंद्याग्र
तः स्थितं समुत्थायार्जुनं प्रेम्णा सस्वजे पांडवर्षभः मूर्ध्नि चैनमुपाघ्राय परिष्वज्य च बाहुना आशिषः परमाः प्रोच्य स्मयमानो
ऽभ्यभाषत व्यक्तमर्जुन संग्रामे ध्रुवस्ते विजयो महान् यादृग्रूपा च ते छाया प्रसन्नश्च जनार्दनः तमब्रवीत्ततो जिष्णुर्महदाश्चर्य
मुत्तमं दृष्टवानस्मि भद्रं ते केशवस्य प्रसादजं ततस्तत्कथयामास यथादृष्टं धनंजयः आश्वासनार्थं सुहृदां त्र्यंबकेण समागमं
ततः शिरोभिरवनिं स्पृष्ट्वा सर्वे च विस्मिताः नमस्कृत्य वृषांकाय साधु साध्विति चाब्रुवन् अनुज्ञातास्ततः सर्वे सुहृदो धर्मसू
नुना त्वरमाणाः सुसंनद्धा हृष्टा युद्धाय निर्ययुः अभिवाद्य तु राजानं युयुधानाच्युतार्जुनाः हृष्टा विनिर्ययुस्ते वै युधिष्ठिरनि
वेशनात् रथेनैकेन दुर्धर्षौ युयुधानजनार्दनौ जग्मतुः सहितौ वीरावर्जुनस्य निवेशनं तत्र गत्वा हृषीकेशः कल्पयामास सूतवत् रथं रथव

Indira Gandhi National
Centre for the Arts

द्रोण० ७२

साजोवातरर्षभमल्लहस्तांसेमेघस्तनितनिर्घोषस्तप्तकांचनसप्रभः वध्योरथवरः त्वहाः शिशुर्हिवसद्रूथी नतः पुरुषशार्दूलः सस
ज्जकुःपुरःसरः कृताह्निकायपार्थायत्वेहयततरथ तेनलोकेष्वंरथसेसं किरीटीहेमवर्मभृत् चापबाणधरोवाहंप्रदक्षिणमथव्रजत्
स तपोविद्याव्रतपावृद्धैः क्रियावद्भिर्जितेन्द्रियैः स्तूयमानोजयाशीर्भिरारुरोहमहारथं जैत्रैःसांग्रामिकैर्मंत्रैःपूर्वमेवरथोत्त
मे अभिमंत्रितमर्चिष्मानुदयंभास्करोयथा सरथोरथिनांश्रेष्ठःकांचनेकांचनावृतः विबभौविमलोर्चिष्मान्मेराविवदिवा
वाकरः अन्वारुरुहतुःपार्थंयुयुधानजनार्दनौ सर्यातिर्यज्ञमायांतंयथेंद्रंदेवमश्विनौ अथजग्राहगोविंदोरश्मीन्रश्मिव
विदांवरः मातलिर्वासवस्येववृत्रंहंतुंप्रयास्यतः सताभ्यांसहितःपार्थोरथप्रवरमास्थितः सहितौबुधशुक्राभ्यांतमोनिघ्नन्य
थाशशी सैंधवस्यवधप्रेप्सुःप्रयातःशत्रुपूगहा सहांबुपतिमित्राभ्यांयथेंद्रस्तारकामये ततोवादित्रनिर्घोषैर्मांगल्यैश्चस्त
वैःशुभैः प्रयांतमर्जुनंवीरंमागधाश्चैवतुष्टुवुः सजयाशीःसुपुण्याहःसूतमागधनिस्वनः युक्तोवादित्रघोषेणतेषां
रतिकरोभवत् तमनुप्रयातोवायुःपुण्यगंधवहःशुभः ववौसहर्षयंस्तार्थंद्विषतश्चापिशोषयन् ततस्तस्मिन्क्षणेराजन्
निमित्तानिविविधानिशुभानिच प्रादुरासन्विजयायवहूनिच पांडवानांत्वदीयानांविपरीतानिमारिष दृष्ट्वार्जुनोनि
मित्तानिविजयायप्रदक्षिणं युयुधानंमहेष्वासमिदंवचनमब्रवीत् युयुधानाद्ययुद्धेमेदृश्यतेविजयोध्रुवः यथाहीमा राम
निलिंगानिदृश्यंतेशिनिपुंगव सोहंतत्रगमिष्यामियत्रसैंधवकोनृपः यियासुर्यमलोकायममवीर्यंप्रतीक्षते यथापर
मकंकृत्यंसैंधवस्यवधोमम तथैवसुमहत्कृत्यंधर्मराजस्यरक्षणं सत्वमद्यमहाबाहोराजानंपरिपालय यथैवहिमयागुप्तस्त्व
यागुप्तोभवेत्तथा नपश्यामिचतंलोकेयस्त्वांयुद्धेपराजयेत् वासुदेवसमंयुद्धेस्वयमप्यमरेश्वरः त्वयिचाहंपराश्वस्तःप्रद्युम्नेवामहा

रथे शक्नुयांसैंधवंहंतुमनपेक्षोनरर्षभ मय्यवेक्षानकर्त्तव्याकथंचिदपिसात्वत राजन्येवपरागुप्तिःकार्यासर्वात्मनात्वया नहि
यत्रमहाबाहुर्वासुदेवोव्यवस्थितः किंचिद्व्यापद्यतेतत्रयत्राहमपिचध्रुवं एवमुक्तस्तुपार्थेनसात्यकिःपरवीरहा तथेत्युक्त्वागमत्त
त्रयत्रराजायुधिष्ठिरः इतिश्रीमहाभारतेद्रोणपर्वणिजयद्रथवधे धृतराष्ट्रउवाच श्वोभूतेकिमकार्षुस्तेदुःखशोकस २
समन्विताः अभिमन्यौहतेतत्रकेवायुध्यंतमामकाः जानंतस्तस्यकर्माणिकुरवः आयांतंपुरुषव्याघ्रंकथंद्रक्ष्यंतिसंयुगे कपिराज
ध्वजंसंख्येविधुन्वानंमहद्धनुः दृष्ट्वापुत्रपरिद्यूनंकिमकुर्वतमामकाः किंनुसंजयसंग्रामेवृत्तंदुर्योधनंप्रति परिदेवोमहानत्र
श्रुतोमेनाभिनंदनं बभूवुर्यमनोग्राह्याःशब्दाःश्रुतिसुखावहाः नश्रूयंतेपसर्वेतेसैंधवस्यनिवेशने स्तुवंतानायकाश्च
यंतेपुत्राणांशिबिरेमम सूतमागधसंघानांनर्त्तकानांचसर्वशः शब्दोनश्रूयतेभीक्ष्णमभवद्यत्रमेश्रुतिः दीनानामद्य
तेशब्दंनश्रुणोमिसमीरितं निवेशनेसत्यधृतेःसोमदत्तस्यसंजय आसीनोहंपुरातातशब्दमश्रौषमुत्तमं तदद्यपुण्यहीनोहं
मार्त्तस्वरनिनादितं निवेशनंगतोत्साहंपुत्राणांममलक्षये विविंशतेर्दुर्मुखस्यचित्रसेनविकर्णयोः अन्येषांचसुतानांमे
नतथाश्रूयतेध्वनिः ब्राह्मणाःक्षत्रियावैश्यायंशिष्याःपर्युपासते द्रोणपुत्रंमहेष्वासंपुत्राणांमेपरायणं वितंडा
लापसंलापैर्हुतयाचितवादितैः गीतैश्चविविधैरिष्टैरमंतेयोदिवानिशं उपास्यमानोबहुभिःकुरुपांडवसात्वतैः सूत
तस्यगेहेशब्दोनाद्यद्रौणेर्यथापुरा द्रोणपुत्रंमहेष्वासंगायनानर्त्तकाश्चये अत्यर्थमुपतिष्ठंतितेषांनश्रूयतेध्वनिः विंदानुवि
दयोःसायंशिबिरेयोमहाध्वनिःश्रूयतेसोद्यनतथाकेकयानांचवेश्मसु नित्यंप्रमुदितानांचतालगीतस्वनोमहान् न
त्यतांश्रूयतेतातगणानांसोद्यनिःस्वनः सप्ततंतून्वितन्वानायाजकायमुपासते सौमदत्तिंश्रुतनिधिंतेषांनश्रूयते
ध्वनिः ज्याघोषोब्रह्मघोषश्चतोमरासिरथध्वनिः द्रोणस्यासीदविरतोगृहेतन्नश्रृणोम्यहं नानादेशसमुत्थानांगीतानां

Indira Gandhi National Centre for the Arts

द्रोणा०
९३

भवत्स्वतः क्षत्रियाणां हितानां च सोद्यम श्रूयते महान् पद्मप्रभ तपपन्नमाख्यांतिविद्धमजनार्दनः अगमत्सर्वमता नाम नुकं पार्थमव्यक्तः ततो हाम ब्रूवं सूतं मद दुर्योधनं तेन हा वासुदेवेन तीर्थं पुत्रं मे प्राणमं पांडवैः काले प्राप्त महमन्येमात्वं दुर्योधनं विना भिः पांमं वे घाचमानेत्व प्रत्याख्यास्य मिकेशवं हितार्थम भिजल्पंतं ततवानि रगोजयः प्रत्या वष्टमहाशाहं नृषभं संवेष्ट्रिवा अनुवेयाविजल्पंतमनयान्नाचपद्यत तस्य दुःशासनसेवकंतदयोः अन्ववर्तत भो हितोकृष्टः कालेन दुर्मतिः तथा हं घृतमिच्छामि विदुरो नममीति सैधववान्नेच्छति घृतं मो मानघृतमिच्छति शल्यो भूरिश्रवाश्चैव पुरुमित्रो जयस्तथा अश्व त्थामा कृपा द्रोणो घृतं नेच्छति संजय एतेषां मतमाज्ञाय यदि वर्तेत पुत्रकः सज्ञातिमित्रः ससुहृत् चिरं जीवेदनामयः श्लक्ष्णा मधुरसंभाषा ज्ञातिमध्ये प्रियंवदाः कुलीनाः संमताः प्राज्ञाः सुखं प्राप्स्यति पांडवाः धर्मापेक्षो नरो नित्यं सर्वत्र लभते सुखं प्रेत्यभावे च कल्याणं प्रसादं प्रतिपद्यते अर्हंत्यर्धं पृथिव्यास्ते भोक्तुं सामर्थ्यसाधनाः तेषामपि समुद्रांता पितृपैतामही मही नियुज्यमानाः स्थास्यंति पांडवा धर्मवर्त्मनि संति मे ज्ञातयस्तात येषां श्रोष्यंति पांडवाः शल्यस्य सोमदत्तस्य भीष्मस्य च महात्मनः द्रोणस्याथ विकर्णस्य बाह्लिकस्य कृपस्य च अन्येषां चैव वृद्धानां भरतानां महात्मनां त्वदर्थं ब्रुवतां तात करिष्यंति वचो हितं कं वा त्वं मन्यसे तेषां यस्त्वा ब्रूयादतोऽन्यथा कृष्णो न धर्मं संजह्यात्सर्वे ते हि त्वदन्वयाः मयापि चोक्ताः ते वीरा वचनं धर्म संहितं नान्यथा प्रकरिष्यंति धर्मात्मानो हि पांडवाः इत्यहं विलपन्सूत बहुशः पुत्रमुक्तवान् न च मे श्रुतवान्मूढो मन्ये कालस्य पर्ययात् वृकोदरार्जुनौ यत्र वृष्णिवीरश्च सात्यकिः उत्तमौजाश्च पांचाल्यो युधामन्युश्च दुर्जयः धृष्टद्युम्नश्च दुर्धर्षः शिखंडी चापराजितः अश्मकाः केकयाश्चैव क्षत्रधर्मा च सोमकिः चैद्यश्च चेकितानश्च पुत्रः काश्यस्य चाभिभुः द्रौपदेया विराटश्च द्रुपदश्च महारथः यमौ च पुरुषव्याघ्रौ मंत्री च मधुसूदनः क एतान् जातु युध्येत लोकेऽस्मिन् वै जिजीविषुः दिव्यमस्त्रं विकुर्वा राम

णान् संहरेयुररीन्मम अन्यो दुर्योधनात्कर्णाच्छकुनेश्चापि सौबलात् दुःशासनचतुर्थानां नान्यं पश्यामि पंचमं येषामभीषु हस्तः स्याद्विष्वक्सेनो रथे स्थितः सन्नद्धश्चार्जुनो योद्धा तेषां नास्ति पराजयः ते मम विलापानां यदि दुर्योधनः स्मरेत् हतो हि पुरुषव्याघ्रो भीष्मद्रोणौ त्वमात्थ वै तेषां विदुरवाक्यानामुक्तानां दीर्घदर्शिनां दृष्ट्वेमां फलनिर्वृत्तिं मन्ये शोचंति पुत्रकाः सेनां ह शिनेनत्रा कुंतेन च प्रमथ्य निःश्वसाम चेतस्या तस्य शोचंति पुत्रकाः हिमात्यये यथा कक्षं शुष्कं वातेरितो महान् अ ग्निर्दहेत्तथा सेनां मामिकां स धनंजयः आचक्ष्व तद्धि नः सर्वं कुशलो ह्यसि संजय यथा पयातः सायाह्ने कृत्वा पार्थस्य किल्बिषं अभिमन्यौ हते तात कथमासीन्मनो हि वः न जातु तस्य कर्माणि युधि गांडीवधन्वनः अपकृत्य महत्तात सोढुं शक्ष्यंति मामकाः किं नु दुर्योधनः कृत्यं कर्णो वा किमभाषत दुःशासनः सौबलश्च तेषामेवं गते ऽपि सर्वेषां समवेतानां पुत्राणां मम संजय यद्वृत्तं तात संग्रामे मंदस्यापनयैर्भृशं लोभानुगतदुर्बुद्धेः क्रोधेन विकृतात्मनः राज्यकामस्य मूढस्य रागोपहत चेतसः दुर्नीतं वा सुनीतं वा तन्ममाचक्ष्व संजय संजय उवाच हंत ते संप्रवक्ष्यामि सर्वं प्रत्यक्षदर्शिवान् शुश्रूष स्वस्थि तो भूत्वा तव ह्यपनयो महान् गतोदके सेतुबंधो यादृग्गतायत्वं विलापो निष्फलो राजन्मा शुचः भरतर्षभ अनतिक्रमणीयोऽयं कृतांतस्याद्भुतो विधिः मा शुचो भरतश्रेष्ठ दिष्टमेतत्पुरातनं यदि त्वं हि पुरा द्यूतात्कुंतीपुत्रं युधिष्ठिरं निवर्तयेथाः पुत्रांश्च न त्वां व्यसनमाव्रजेत् युद्धकाले पुनः प्राप्ते तदैव भवता यदि निवर्तिताः स्युः संरब्धा न त्वां व्यसनमाव्रजेत् दुर्योधनं चाविधेयं कुरून्वा निग्रहीष्यत्व नास्मात्त्वां व्यसनमाव्रजेत् ततो बुद्धिव्यभीचारः सुपल्लवं प्रति पांडवाः पांचालाः वृष्णयः सर्वे ये चान्ये ऽपि नराधिपाः स

कृत्वा पितृकर्म त्वं पुत्रं संस्थाप्य सत्पथे वर्णेष्वायाहि धर्मेण राज्ञा त्वां प्रसमनमार्गेऽज्ञत् त्वं प्राज्ञतमो लोके हित्वा धर्मं सनातनं दु
र्योधनस्य कर्णस्य शकुनेश्चाल्पगामतं तन्नेक्लिनपितृसंर्वमयाराजन्निशामितं अर्थेति विशमानस्य विषमिश्रं यथा
मधु नामन्यत तत्तत्त्वात्कृष्णेऽज्ञानं पाण्डवं पुरा नभीष्मो नैव च द्रोणो यथा त्वां मन्यते च्युतः अज्ञानात्मसहासात्तु त्वां राजन्वुधर्मि
ष्ठं वसुरते तदा प्रभृति कृष्णस्त्वां न तथा बहुमन्यते परुषाण्युच्यमानांश्च पाण्डवानां त्वमुपेक्षसे तस्यानुबन्धः प्राप्तस्त्वां पु
त्राणां राज्यकामुक पितृपैतामहं राज्यमपवृत्तं तदानघ अथ पार्थैर्जितां कृत्स्नां पृथिवीं प्रत्यपद्यथाः पाण्डुनानिर्जितं रा
ज्यं कौरवाणां यशस्तथा तवश्चाप्यधिकं भूयः पाण्डवैर्धर्मचारिभिः तेषां तत्तादृशं कर्म त्वामासाद्य सुनिष्फलं यत्पित्र्याद्भ्रं
शिताः राज्यात्त्वयेहामिषगृद्धिना यत्पुनर्युद्धकाले त्वं पुत्रान्गर्हयसे नृप बहुधा भाषमाणस्तान्दोषानात्मसहघोपपद्यते नहि र
क्षन्ति राजानो युध्यमानाः स्वजीवितं चमूं विगाह्य पार्थानां युध्यन्ते क्षत्रियर्षभाः यां तु कृष्णार्जुनौ सेनां यां सात्यकि वृकोदरौ र
क्षेरन्को नु तां युध्येच्चमूमन्यत्र कौरवैः येषां योद्धा गुडाकेशो येषां मंत्री जनार्दनः येषां च सात्यकिर्योद्धा येषां योद्धा वृकोद
रः को हि तान्विषहेद्योद्धुं मर्त्यधर्मा धनुर्धरः अन्यत्र कौरवेयेभ्यो ये वा तेषां पदानुगाः यावत्तु शक्यते कर्तुमनुरक्तैर्जनाधि
पैः क्षत्रधर्मरतैः शूरैस्तावत्कुर्वन्ति कौरवाः यथा तु पुरुषव्याघ्रैर्युद्धं परमसंकटे कुरूणां पाण्डवैः सार्धं तत्सर्वं शृणु तत्त्वतः
इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधे संजय उवाच तस्यां निशायां व्युष्टायां द्रोणः शस्त्रभृतां वरः स्वान्यनीकानि राम
सर्वाणि प्राक्रामद्व्यूहितुं ततः शूराणां गर्जतां राजन्संक्रुद्धानाममर्षिणां श्रूयन्ते स्म गिरश्चित्राः परस्परवधैषिणां विस्फा
र्य च धनूंष्यन्ये ज्याः परे परिमृज्य च विनिःश्वसन्तः प्राक्रोशन्क्वेदानीं स धनंजयः विकोषान्सुत्सरून्ये कृतधारान्समा

हितान् पीतानाकाशसंकाशानसीन्केचिच्च चिक्षिपुः चरन्त्यसिमार्गांश्च धनुर्मार्गांश्च शिक्षया संग्राममनसः शूराः दृश्यन्ते
स्म सहस्रशः सघण्टाश्चन्दनादिग्धाः स्वर्णवज्रविभूषिताः समुत्क्षिप्य गदाश्चान्ये पर्यपृच्छन्त पाण्डवं अन्ये बलमदोन्मत्ताः परि
घैर्बाहुशालिनः चक्रुः संबाधमाकाशमुच्छ्रितेन्द्रध्वजोपमैः नानाप्रहरणैश्चान्ये विचित्रस्रगलंकृताः संग्राममनसः शूरास्तत्र
तत्र व्यवस्थिताः क्वार्जुनः क्व च गोविन्दः क्व च मानी वृकोदरः क्व च ते सुहृदस्तेषामाह्वयन्तो रणे तदा ततः शंखमुपाध्माय त्वर
यन्वाजिनः स्वयं इतस्ततो रचयन्द्रोणश्चरति वेगितः तेष्वनीकेषु सर्वेषु स्थितेष्वाहवनन्दिषु भारद्वाजो महाराज जयद्रथमथा
ब्रवीत् त्वं चैव सोमदत्तिश्च कर्णश्चैव महारथः अश्वत्थामा च शल्यश्च वृषसेनः कृपस्तथा शतं चाश्वसहस्राणां रथानामयुता
नि षट् द्विरदानां प्रभिन्नानां सहस्राणि चतुर्दश पदातीनां सहस्राणि दंशितान्येकविंशतिः गव्यूतिषु त्रिमात्रासु मामनासा
द्य तिष्ठत तत्रस्थं त्वां न संसोढुं शक्ता देवाः सवासवाः किं पुनः पाण्डवाः सर्वे समाश्वसिहि सैन्धव एवमुक्तः समाश्वस्तः सि
न्धुराजो जयद्रथः संप्रायात्सह गान्धारैर्वृतस्तैश्च महारथैः वर्मिभिः सादिभिर्यत्तैः प्रासपाणिभिरास्थितैः चामरापीडिनः स
र्वे जाम्बूनदविभूषिताः जयद्रथस्य राजेन्द्र हयाः साधुप्रवाहिनः ते चैव सप्तसाहस्रास्त्रिसाहस्राश्च सैन्धवं मत्तानां सुविरू
ढानां हस्त्यारोहैर्विशारदैः नागानां भीमरूपाणां वर्मिणां रौद्रकर्मिणां अध्यर्धेन सहस्रेण पुत्रो दुर्मर्षणस्तव अग्रतः
सर्वसैन्यानां योत्स्यमानो व्यवस्थितः ततो दुःशासनश्चैव विकर्णश्च तवात्मजौ सिन्धुराजार्थसिद्ध्यर्थमग्रानीके व्यवस्थितौ दीर्घो
द्वादशगव्यूतिः पश्चार्धे पञ्चविस्तृतः व्यूहः स चक्रशकटो भारद्वाजेन निर्मितः नानानृपतिभिर्वीरैस्तत्र तत्र व्यवस्थितैः रथाश्व
गजपत्त्योघैर्द्रोणेन विहितः स्वयं पश्चार्धे तस्य पद्मस्तु गर्भव्यूहः सुदुर्भिदः सूचीपद्मस्य गर्भस्थो गूढो व्यूहः कृतः पुनः ए

Indira Gandhi National
Centre for the Arts

द्रोण०
७५

वमेतंमहाव्यूहंद्रोणाग्रवस्थितः सूचीमुखेमहेष्वासः कृतवर्मान्यवस्थितः अनंतरंचकांबोजोजलसंधश्चमारिष दुर्योधन
श्चकर्णश्चतदनंतरमेवच ततःशतसहस्राणियोधानामनिवर्तिनां व्यवस्थितानिसर्वाणिशकटेस्वविरक्षिणः तेषांचपृ
ष्ठतोराजाबलेनमहतावृतः जयद्रथस्ततोराजासूचीपार्श्वेव्यवस्थितः शकटस्यतुभोजद्भारद्वाजोमुखेस्थितः अनुतस्य
भवद्भोजोजुगोपैनंततःस्वयं श्वेतवर्मांबरोष्णीषोव्यूढोरस्कोमहाभुजः धनुर्विस्फारयन्द्रोणस्तस्थौक्रुद्धइवांतकः पताकि
नंश्वेतहयंवेदीकृष्णाजिनध्वजं द्रोणस्यरथमालोक्यप्रहृष्टाःकुरवोभवन् सिद्धचारणसंघानांविस्मयःसुमहानभूत् द्रोणेनविहि
तंदृष्ट्वाव्यूहंक्षुब्धार्णवोपमं सशैलसागरवनांनानाजनपदाकुलां ग्रसेद्व्यूहःक्षितिंसर्वामितिभूतानिमेनिरे शकटंरथमनुज्ञाश्च
यत्रितंनागंप्रतिनयनिश्चलंतद्दृतान्तरूपं अहितहृदयवेदंतंमहद्दैशकटमेतेद्रूपकृतंनृराजा इतिश्रीमहाभारतेभ्यसनिश्च
द्रोणपर्वणिजयद्रथवधे संजयउवाच ततोव्यूढेष्वनीकेषुसमुत्क्रुष्टेषुमारिष ताड्यमानासुभेरीषुमृदंगेषुनदत्सुच
अनीकानांचसंह्रादेवादित्राणांचनिस्वने प्रध्मापितेषुशंखेषुसन्नादेलोमहर्षणे अभिहारयत्सुशनकैर्भरतेषुयुयुत्सुषु रौ
द्रेमुहूर्त्तेसंप्राप्तेसव्यसाचीव्यदृश्यत वकानांवायसानांचपुरस्तात्सव्यसाचिनः बहुलानिसहस्राणिप्राक्रीडंस्तत्रभारत मृ
गाश्चघोरसंनादाःशिवाश्चाशिववर्त्मनः दक्षिणेनप्रयातानामस्माकंप्रादुरंस्तथा सनिर्घाताज्वलंत्यश्चपेतुरुल्काःस गम
हस्रशः चचालचमहीकृत्स्नाभयेघोरेसमुत्थिते विष्वग्वाताःसनिर्घाताःरूक्षाःशर्करकर्षिणः ववुरायातिकौंतेयेसं
ग्रामेसमुपस्थिते नाकुलिश्चशतानीकोधृष्टद्युम्नश्चपार्षतः पांडवानामनीकानिप्राज्ञौतौव्यूहतुस्तदा ततोरथसहस्रेणद्वि
रदानांशतेनच त्रिभिरश्वसहस्रैश्चपदातीनांशतैः अध्यर्धमात्रेधनुषांसहस्रेतनयस्तवदुमुत्रसेणामपंडके: कालप्राप्तमहस्र

व अग्रतःसर्वसैन्यानांस्थित्वादुर्मर्षणोऽब्रवीत् अद्यगांडीवधन्वानंतपंतंयुद्धदुर्मदं अहमावारयिष्यामिवेलेवमकरालयं अद्य
पश्यंतुसंग्रामेधनंजयममर्षणं विषक्तंमयिदुर्धर्षमश्मकूटमिवाश्मनि तिष्ठध्वंरथिनोयूयंसंग्राममभिकांक्षिणः युध्यामिसहितानेते
नान्यशोमानंचवर्द्धयन् एवंब्रुवन्महाराजसमहात्मामतिः महेष्वासैर्वृतोराजन्महेष्वासोव्यवस्थितः ततोन्तकइवक्रुद्धःसव
ज्रइववासवः दंडपाणिरिवासह्योमृत्युःकालेनचोदितः शूलपाणिरिवाक्षोभ्योवरुणःपाशवानिव युगांताग्निरिवार्चिष्मान्प्र
जाःधक्ष्यन्॥ क्रोधामर्षबलोद्धूतोनिवातकवचांतकः जयोजेतास्थितःसत्यपारयिष्यन्महाव्रतं आमुक्तकवचःखड्गीजांबूनदकिरीट
भृत् शुभ्रमाल्यांबरधरःस्वंगदश्चारुकुंडलः रथप्रवरमास्थायनरोनारायणानुगः विधुन्वन्गांडिवंसंख्येवभौसूर्यइवोदितः सोग्रा
नीकस्यमहतइषुपातेधनंजयः व्यवस्थाप्यरथंराजन्शंखंदध्मौप्रतापवान् अथकृष्णोप्यसंभ्रांतःपार्थेनसहमारिष प्राध्मापयत्पांच
जन्यंशंखप्रवरमोजसा तयोःशंखप्रणादेनतवसैन्यविशांपते आसन्संहृष्टरोमाणःकंपिताःगतचेतसः यथात्रस्यंतिभूतानिस
र्वाण्यशनिःस्वनात् तथाशंखप्रणादेनवित्रेसुस्तवसैनिकाः प्रसुस्रुवुःशकृन्मूत्रंवाहनानिचसर्वशः एवंसवाहनंसर्वमाविग्नमभ
वद्बलं सीदंतिस्मनराराजन्शंखशब्देनमारिष विसंज्ञाश्चाभवन्केचित्केचिद्राजन्वितत्रसुः ततःकपिर्महानादंसहभूतैर्ध्वजालयैः अ
करोद्व्यादितास्यश्चभीषयंस्तवसैनिकान् ततःशंखाश्चभेर्यश्चमृदंगाश्चानकैःसह पुनरेवाभ्यहन्यंततवसैन्यप्रहर्षणाः नानावादि
त्रसंह्रादैःक्ष्वेडितास्फोटिताकुलैः सिंहनादैःसमुत्क्रुष्टैःसमाधूतैर्महारथैः तस्मिंस्तुतुमुलेशब्देभीरूणांभयवर्द्धने अतीवहृ
ष्टोदाशार्हमब्रवीत्पाकशासनिः इतिश्रीमहाभारतेद्रोणपर्वणिजयद्रथवधे अर्जुनउवाच चोदयाश्वान्हृषीकेशयत्रदुर्मर्ष
णःस्थितः एनद्भित्वागजानीकंप्रवेक्ष्याम्यरिवाहिनीं संजयउवाच एवमुक्तोमहाबाहुःकेशवःसव्यसाचिना अचोदयद्धयांस्त

Indira Gandhi National Centre for the Arts

त्रपत्त दुर्मर्षणास्थितः समंप्रहारस्तुमुलः संप्रवृत्तः सुदारुणः एकस्य च बहूनां च रथनागरतद्दयः ततः सायकवर्षेण पर्ज
न्य इव वृष्टिमान् परानवाकिरत्पार्थः पर्वतानिव नीरदः ते चापि रथिनः सर्वे त्वरिताः कृतहस्तवत् आवाकिरन्बाणजालैस्ततः
कृष्णधनंजयौ ततः क्रोधो महाबाहुर्वार्यमाणः परैर्युधि पार्थः कायेभ्योभ्यहरच्छरैः उद्भ्रांतनयनैर्वक्त्रैः संह
ष्टोष्ठपुटैः शुभैः सकुंडलशिरस्त्राणैर्वसुधा समकीर्यत पुंडरीकवनानीव विध्वस्तानि समंततः विनिकीर्णानि योधानां वदना
नि काशिरे तपनीयतनुत्राणाः संसिक्ता रुधिरेण च संसक्ता इव दृश्यंते मेघसंघाः सविद्युतः शिरसां पततां राजन् शब्दो
भूद्वसुधातले कालेन परिपक्वानां तालानां पततामिव ततः कबंधकं चित्तु धनुरालंब्य तिष्ठति पतिता निकृत्तानि चोग्राणि
भूहसुधातले कालेन परिपक्वानां ... बाहू निष्क्रष्य शिरोभि
स्तु पुरुषर्षभ अमृष्यमाणाः संग्रामे कौंतेयो जयगृद्धिनः हयानामुत्तमांगैश्च हस्तिहस्तैश्च मेदिनी बाहुभिश्च शिरोभि
श्च वीराणां समकीर्यत अयं पार्थः कुतः पार्थ एष पार्थ इति प्रभो तव सैन्येषु योधानां पार्थभूतमिवाभवत् अन्योन्यमपि चा
पे पार्थभूतममन्यंत जगत्कालेन मोहिताः निष्टनंतः सरुधिरा विसंज्ञा गाढवेदनाः शेरते बहवो वीराः कीर्तयंतः स्व
बांधवान् सभिंडिपालाः सप्रासाः सशक्त्यृष्टिपरश्वधाः सनिर्यूहाः सनिस्त्रिंशाः सशरासनतोमराः सबाणाश्चर्मीनराणां स
वासवान् सभिंडिपालाः ... वेगं कुर्वंति संख्ये नि राम
गदीसांगदास्तस्य महाभुजगसंकाशा बाहवः परिघोपमाः उद्वेष्टंति विचेष्टंति संवेष्टंति च सर्वशः वेगं कुर्वंति संरब्धा नि
कृत्ताः परमेषुभिः यो यश्च समरे पार्थं प्रतिसंरभते नरः तस्य तस्यांतको बाणः शरीरमुपसर्पति नृत्यतो रथमार्गेषु धनुर्व्या
यच्छतस्तथा न कश्चित्तत्र पार्थस्य ददर्शांतरमण्वपि यत्नस्य घटमानस्य क्षिप्रं विक्षिपतः शरान् लाघवात्पांडुपुत्रस्य व्यस्मयंत
परे तदा हस्तिनं हस्तियंतारमश्वमाश्विकमेव च अभिनत्फाल्गुनो बाणै रथिनं च ससारथिं आवर्तमानमावृत्तं युध्यमा

ते च पांडवः प्रमुखे तिष्ठमानं च न कंचिन्न निहंति सः यथोदयन्वै गगने सूर्यो हंति महत्तमः तथार्जुनो गजानीकमवधीत्कंकपत्रिभिः
हस्तिभिः पतितैर्भिन्नैस्तव सैन्यमदृश्यत अंतकाले यथा भूमिर्विनिकीर्णा महीधरैः यथा मध्यंदिने सूर्यो दुष्प्रेक्ष्यः प्राणिभिः सदा
तथा धनंजयः क्रुद्धो दुष्प्रेक्ष्यो युधि शत्रुभिः तत्तथा तव पुत्रस्य सैन्यं युधि परंतप प्रभग्नं द्रुतमाविग्नमतीव शरपीडितं मारुतेनेव मह
ता मेघानीकं व्यशीर्यत प्रकाल्यमानं तत्सैन्यं नाशकत्प्रतिवीक्षितुं प्रतोदैश्चापकोटीभिर्हुंकारैः साधुवाहितैः कशापार्ष्णिभिघा
तैश्च वाग्भिरुग्राभिरेव च चोदयंतो हयांस्तूर्णं पलायंते स्म तावकाः सादिनो रथिनश्चैव पत्तयश्चार्जुनार्दिताः पार्ष्णिगुष्ठांकुशैर्ना
गाश्चोदयंतस्तथापरे शरैः संमोहिताश्चान्ये तमेवाभिमुखा ययुः तव योधा हतोत्साहा विभ्रांतमनसस्तदा इति श्री महाभा
रते द्रोणपर्वणि जयद्रथवधे ... धृतराष्ट्र उवाच तस्मिन्प्रभग्ने सैन्याग्रे वध्यमाने किरीटिना के नु तत्र रणे वीराः प्रत्युदीयुर्धनंजयं
आहो स्विच्छकटव्यूहं प्रविश्य घोरनिश्चयाः द्रोणमाश्रित्य तिष्ठंतः प्राकारमकुतोभयं संजय उवाच तथार्जुनेन संभग्ने तस्मि
स्तव बलेनघ हतवीरे हतोत्साहे पलायनकृतक्षणे पाकशासनिनाभीक्ष्णं वध्यमाने शरोत्तमैः न तत्र कश्चित्संग्रामे शशाक
र्जुनमीक्षितुं ततस्तव सुतो राजन्दृष्ट्वा सैन्यं तथागतं दुःशासनो भृशं क्रुद्धो युद्धायार्जुनमभ्ययात् स कांचनविचित्रेण कव
चेन समावृतः जांबूनदशिरस्त्राणः शूरस्तीव्रपराक्रमः नागानीकेन महता ग्रसन्निव महीमिमां दुःशासनो महाराज सव्यसा
चिनमावृणोत् ह्रादेन गजघंटानां शंखानां निनदेन च ज्याक्षेपनिनदैश्चैव विरावेण च पत्तिनां भूर्दिशश्चांतरिक्षं च शब्दे
नासीत्समावृतं मुहूर्तं प्रतिभयो दारुणः समपद्यत तान्दृष्ट्वा पततस्तूर्णमंकुशैरभिचोदितान् व्यालंबहस्तान्संरब्धान्सप
क्षानिव पर्वतान् सिंहनादेन महता नरसिंहो धनंजयः गजानीकममित्राणामभितो व्यधमच्छरैः महोर्मिणमिवोद्धूतं श्वसनेन

Indira Gandhi National
Centre for the Arts

द्रोण०
११

सहस्रैश्च दीप्यमानैः समंततः रत्नाचितैः स्वर्णदंडैर्गंधतैलावसिंचितैः ३ देवगंधर्वदीपाद्यैः प्रभाभिरधिकोज्वलैः विराजत
दा भूमिर्ग्रहैर्द्यौरिव भारत ४ उल्काशतैः प्रज्वलितैर्रणभूमिर्व्यराजत दह्यमानेव लोकानामभावे च वसुंधरा ५ प्रसाध्यंत दि
शः सर्वाः प्रदीपैस्तैः समंततः वर्षाप्रदोषे खद्योतैर्वृता वृक्षा इवाबभुः ६ असज्जंत ततो वीरा वीरेष्वेव पृथक्पृथक् नागा नागैः स
माजग्मुस्तुरगाः सह वाजिभिः ७ रथा रथवरैरेव समाजग्मुर्मुदान्विताः तस्मिन्रात्रिमुखे घोरे तव पुत्रस्य शासनात् ८ चतुरंगस
सैन्यस्य संपातश्च महानभूत् ततोऽर्जुनो महाराज पांडवानामनीकिनीं ९ अवधत्त्वरया युक्तः नृपान्सर्वान्पार्थिवान् धृतरा
ष्ट्र उवाच तस्मिन्प्रविष्टे संरब्धे मम पुत्रस्य वाहिनीं अमृष्यमाणे दुर्धर्षे कथमासीन्मनो हि वः १० किमकुर्वत सैन्यानि प्रविष्टे
परपीडने दुर्योधनश्च किं कृत्यं प्राप्तकालममन्यत ११ के चैनं समरे वीरं प्रत्युद्ययुररिंदमं द्रोणं च के व्यरक्षंत प्रविष्टे श्वेतवा
हने १२ केऽरक्षन्दक्षिणं चक्रं के च द्रोणस्य सव्यतः के पृष्ठतश्चाप्यभवन्वीरा वीरविनिघ्नतः १३ के पुरस्तादगच्छंत निघ्न गम·
तः शात्रवान्रणे यत्प्राविशन्महेष्वासः पांचालानपराजितः १४ नृत्यन्निव नरव्याघ्रो रथमार्गेषु वीर्यवान् योऽदहच्छ
रैर्द्रौणः पांचालानां रथव्रजान् १५ धूमकेतुरिव क्रुद्धः कथं मृत्युमुपेयिवान् अव्यग्रानेव हि परान्कथयस्यपराजितान्
१६ हृष्टानुदीर्णान्संग्रामे न तथा शस्तमामकान् संजय उ· द्रोणस्य मतमाज्ञाय योद्धुकामस्य तां निशां दुर्योधनो महाराज

ष्टाकर्णो महेष्वासो योधयामास राक्षसं ८० यतो लक्ष्मणतः कर्णो निषादपंचभिराशुगैः ननाद भैरवं नादं भीषयन्सर्वपार्थिवा
न् ८१ अथस्यांजलिकेनाथ समागम्याग्रणीमहत् करोहस्तस्थितं चापं विच्छेदास्य घटोत्कचः ८२ अथ प्रासमिन्दुरारापहरं
भारसहं महत् विचकर्ष बलात्कर्णो मित्रायुधमिवोच्छ्रितं ८३ ततोऽक्रुद्धो महाराज भीषयामास पांडवान् स्तनयित्नुरिवोच्छ्र
मान् खेचरान्नाशमानयत् ८४ तद्धागोरात्रितं पृथ्वीं रक्तसाधानवद्दासं सिंहेनेवाहितं वंशं राजा नामानुल्येकुलं ८५ विधम्यश
त्क्ष्मान्बाणैः साश्वसूतगजाविभुः हा हा नगावा त्रिभिर्भूतानामपुराणेषु ८६ सहमानान्संसेनां सुसुनेसूतं नरहनः पुरेवत्रि
पुरं दग्ध्वारिविरेजे महेष्वासः ८७ ते पुराजसमहेष्वासे पांडवे येषु मारिष नैनं निरीक्षितुमपि कश्चिच्छक्नोति पार्थिव ८८ ततो घटो
त्कचो राजन्मायाविधास्ने हविरदः तलेन तलेन सहसा सहस्रपरशानच्छरं ८९ रथमास्थाय च पुनर्मायया निर्मितं तदा युक्तं
गजनिभैर्वाहैः पिशाचवदनैः खरैः ९० स सूततमग्रवाक्रुद्धः सूतपुत्रमपाकरोत् सपर्योधोरथोरूपेणारथेन रथिनां वरः ९१ हेरंपस
तपुत्रेषु पुनरेव विशांपते प्रविप्रेषु पुनः क्रुद्धः सूतपुत्राय रक्षसः ९२ अष्टचक्रां महाघोरां चाश्वनाहत निर्मितां द्विषोजनसमु
त्सेधां योजनायामविस्तृतां ९३ आयसानि चितां शूलैः कदंबमिव केसरैः तामवप्लुत्य जग्राह कर्णोऽन्यस्यमहद्धनुः ९४ विनेहस्तं चे
त्सेधा? नांतस्मै तस्य नानामोल पुरे मुले सा प्रसूतज्ञजपा नांनस्य सूतामहाप्रभो ९५ विवेश वसुधां भित्त्वा सूराल्यत्रविस्मिताः सर्वभू
तानि निःसृजयामास संजया ९६ परवप्रमुमजग्राहे देवस्त्वंमहात्मनो एवं लक्ष्मारतो ऽक्रसंख्याश्चोऽहरथ्यं पुन ९७ ततो भुप्रोचना
राचानस्तवपुत्र परंतपः आशाः कर्णीम नेनसर्वभूतेषु मानरः ९८ पश्चात्कर्णो रथाक्षेः संप्राप्तो भीमदर्शने सहस्रैर्मानोनारा
चैर्दंष्ट्रैः सविषिप्तैः ९९ गंधर्वनगराकाराः पुनस्तान्यपत एवं संरोध महामायो मायया लाघवेन च १०० अस्त्राणि तानि निरायमि

द्रो. जघानाग्निपुत्रस्तु नः निहन्यमानेषु तेषु मायया तेन रक्षसा ११ अर्जुनं भ्रांतमनसं दाकसमं लहस्तः प्रमुमुधात ततः क्रुद्धो महाराज
१०८ भैमसेनिर्महाबल १२ चकार बहुधा मायां भीमपराक्रमो महारथान् ततो रिपुः समायेतुः सिंहव्याघ्रतरक्षवः १३ अग्निजिह्वा
श्च भुजगा विहगाश्चाप्यनेकशः ते संकीर्णमाना विविधैः कर्णचापच्युतैः शरैः १४ नागराजविदुद्ध्यंतत्रैव ततः श्वापत ग
हमाश्च पिशाचाश्च यातुधानास्तथैव च १५ शालावृकाश्च वृकाश्च विकृताननाः ते कर्णेन परिध्वस्ताः सर्वतः समुप
द्रवन् १६ अथैनं वारयिष्यन्तमसमवायं चक्रिरे तदा उद्यतैर्बहुभिर्घोरैरायुधैः शोणितोक्षितैः १७ तेषामनेकैरेकैकं कर्णं
याचमापके प्रतिहन्तुं तां मायां घोरां विना दिव्यास्त्रमाहसा १८ आजघान हयानस्य शरैः सन्नतपर्वभिः तेनघा विसन्ना गाश्च
भग्नाः सर्वतः कृष्णमात्ययात्रैरस्य स्तनतः सनग्नमायो हैडिंबः कर्णं वैकर्तनं तदा २२ एषते विहिंसेमं सुभिसु
न्नहृष्टाश्च माय कैश्च सुधाम नवघत पश्यत लसस्तनः सनग्नमायो हैडिंबः कर्णं वैकर्तनं तदा २२ एष ते विरथं भग्नसुभिसु
क्रांतरथीपत द्रोणपर्वणि रात्रियुद्धे २३ संजय उवाच तस्मिंस्तथा वर्तमाने कर्णराक्षसयोर्मृधे अलायुधो राक्षसेंद्रो वीर्य
वानभ्यवर्तत १ महत्या सेनया युक्तो दुर्योधनमुपागमत राक्षसानां विरूपाणां सहस्रैः परिवारितः २ नानारूपधरैर्वीरैः पू
र्ववैरमनुस्मरन् तस्य ज्ञातिर्हि विक्रांतो ब्राह्मणादो बकोहत ३ किर्मीरश्च महातेजा हिडिंबश्च सखा तदा सुदीर्घकालाध्युषि राम.
तं वैरमनुस्मरन् ४ विज्ञायैतन्निशायुद्धं जिघांसुर्भीममाहवे स मत्त इव मातंगः संक्रुद्ध इव चोरगः ५ दुर्योधनमिदं वाक्य
मब्रवीद्युद्धलालसः विदितं ते महाराज यथा भीमेन राक्षसाः ६ हिडिंबबककिर्मीरा निहता मम बांधवाः परामर्शश्च कन्यायाहिडिंबायाः
कृतः पुरा ७ किमन्यद्राक्षसानस्मानन्यांश्च परिभूय ह तमहं सगणं राजन् सवाजिरथकुंजरं ८ हैडिंबिं च सहामात्यं हंतुमभ्यागतः
स्वयं अद्य कुंतीसुतान्सर्वान् वासुदेवपुरोगमान् ९ हत्वा सम्भक्षयिष्यामि सर्वैरनुचरैः सह निवारय बलं सर्वं वयं योत्स्याम पांडवान्

लक्ष्यपांचालानुवाचह १८ विकर्णश्चित्रसेनश्च महाबाहुश्च कौरवः दुर्दर्षोऽग्रिवाहुश्च पिचवर्मा हानुगा १९ द्रोणपुत्रः
पराक्रांताः समरेऽरातिनुत् ततः हार्दिक्यो दंतिनां चक्रे शल्यश्चैवोत्तरस्तथा २० त्रिगर्तानां च प्रवरा हत शिष्टा महारथाः ताश्च
वपुरतः सर्वान् पुत्रस्ते समचोदयत् २१ आचार्याभिहतः सर्पन्तो मुष्टिंपलाश्च पांडवास्ते रणे सपत्नानिर्घतेशो त्रवान्
ते २२ द्रोणाभिबलवान् युद्धे निःशेषहसत प्रतापवान् निर्जितो दिवशान् युद्धे किमुपाय्योत्स सोमकान् २३ ते एवं संहितानः सर्वे
ते २२ द्रोणोहि बलवान् युद्धे निश्चेषह सत प्रतापवान् निर्जित्य पांडवान् युद्धे किमु पाय्योत्स सोमकान् २४ पांडवे पिशुते तेषु नं तपश्यामकं च न योधा धृष्टद्युम्नो
मे रथपतिर्महारथाः सो सार ततो पांचालो धृष्टद्युम्नो महारथान् २४ पांडवे पिशुते तेषु न तपश्यामकं च न योधो धृष्टद्युम्नो
गाधृष्टद्युम्नाहेतेन २५ तस्मात्सर्वाभिमत नाम भीमस्य भारद्वाजस्य रलांश सगुनः पांडवान् हत्यान्स्तजयांश्च ससोमकान् २६ से
जयद्यव्ये द्युनिहत्ते युधं मुक्तिधृष्टद्युम्नेरथो द्रौणिहनिष्यति नसंशय २७ तथा कृष्णेन च राधेयो हनिष्यति महारथ भीमसे
नं महतांपण्डुहेनिष्यामि दानं २८ ते पांडवान्यांगोपाः प्रहानते जसः सो पंममजपाश्च क्रोधसंकाल नविष्यति २९ तस्माद
ततस्त्या मंडलानि समहारथे इत्युक्ता नरतंश्रेष्ठ पुत्रो दुर्योधनस्तव ३० व्यादिदेश तथा सैन्यं तस्मिन्समसिंहरणे ततः प्रववृ
तेयुद्धं रात्रौ भरतसत्तम ३१ उभयोः सेनयोर्घोरं परस्परजिगीषया अर्जुनः कौरवं सैन्यमर्जुनं चापि कौरवा ३२ नानाशस्त्रस
मावापैः परस्परमपीडयन् द्रौणिः पांचालराजं च भारद्वाजश्च संजयान् ३३ छादयांचक्रिरे संख्ये शरैः सन्नतपर्वभिः पांडु
पांचालसैन्यानां कौरवाणां च भारत ३४। आसीन्निष्ठानको घोरो निघ्नतामितरेतरं नैवास्माभिस्तथापूर्वैर्दृष्टं पूर्वं तथाविधं ३५
श्रुतं वा यादृशं युद्धमासीत्तस्मिन्भयानकं द्रोणपर्वणि रात्रियुद्धे १६२ संजय उवाच वर्तमाने तदा रौद्रे रात्रियुद्धे विशांपते सर्वभूतक्ष
यकरे धर्मपुत्रो युधिष्ठिरः १ अब्रवीत्पांडवान्पांचालांश्च सोमकान् मनुष्याश्च नागानाम भावाय नराधिप २ युधिष्ठिरो

द्रो॰ वाह्लीकान्नृपोजन्ममनुजाधिप अभिरवत्तसंयातद्रोणमेवजिघांसया ३ राजस्तेवचनाद्रातन्पांचालाःसृंजयास्तथा द्रोण
१०८ मेवाभ्यवर्तंतनदंतोभैरवान्रवान् ४ तंतुतेमतिगंजेतःप्रस्तुघाताःसमर्थिताः पृथ्वीशाकेपथोत्माहेयुग्यास्तन्वसंयुते ५ कृतव
र्मातुहार्दिक्योयुधिष्ठिरमुपाद्रवत् द्रोणंप्रतिसमायांतंमत्तोमत्तमिवद्विपं ६ शैनेयंशरवर्षाणिविकिरंतंसमंततः अभ्यया
त्कौरवोराजन्भूरिसंग्राममूर्द्धनि ७ सहदेवमथायांतंद्रोणप्रेप्सुंमहारथं कर्णोवैकर्तनोराजन्वारयामासपांडवं ८ भी
मसेनमथायांतंव्यादितास्यमिवांतकं स्वयंदुर्योधनोराजन्प्रतीपंमृत्युमाव्रजत् ९ नकुलंचयुधांश्रेष्ठंसर्वयुद्धविशारदं
शकुनिःसौबलोराजन्वारयामाससौबल १० शिखंडिनमथायांतंरथेनरथिनांवर कृपःशारद्वतोराजन्वारयामास
संयुगे ११ प्रतिविंध्यमथायांतंमयूरसदृशैर्हयैः दुःशासनोमहाराजयत्तोयत्तमवारयत् १२ भैमसेनिमथायांतंमा
याशतविशारदं अश्वत्थामापितुर्मानंकुर्वाणःप्रत्यषेधयत् १३ द्रुपदंवृषसेनस्तुससैन्यंसपदानुगं वारयामाससमरेद्रो
णप्रेप्सुंमहारथं १४ विराटंद्रुतमायांतंद्रोणस्यनिधनंप्रति मद्रराजःसुसंक्रुद्धोवारयामासभारत १५ शतानीकमथा
यांतंनाकुलिंरभसंरणे चित्रसेनोरुरोधाशुशरैर्द्रोणपरीप्सया १६ अर्जुनंचयुधांश्रेष्ठंप्राद्रवंतंमहारथं अलंबुसोमहा राम॰
राजराक्षसेंद्रोन्यवारयत् १७ तथाद्रोणंमहेष्वासंनिघ्नंतंशात्रवान्रणे धृष्टद्युम्नोथपांचाल्योहृष्टरूपमवारयत् १८ तथा
न्यान्पांडुपुत्राणांसमायातान्महारथान् तावकारथिनोराजन्वारयामासुरोजसा १९ गजारोहागजैस्तूर्णंसंनिपत्य
महामृधे योधयंतःस्मदृश्यंतेशतशोथसहस्रशः २० निशीथेतुरगाराजन्नाद्रवंतःपरस्परं समदृश्यंतवेगेनपक्षवं
तःपर्वताइव २१ सादिनःसादिभिःसार्द्धंप्रासशक्त्यृष्टिपाणयः समागछन्महाराजविनदंतःपृथक्पृथक् २२ नरास्तु
बहवस्तत्रसमाजग्मुःपरस्परं गदाभिर्मुसलैश्चैवनानाशस्त्रैश्चसंयुगे २३ कृतवर्मातुहार्दिक्योधर्मपुत्रंयुधिष्ठिरं

वारयामाससंक्रुद्धोवेलेवोद्वृत्तमर्णवं २४ युधिष्ठिरस्तुहार्दिक्यंविद्ध्वापंचभिराशुगैः पुनर्विव्याधविंशत्यातिष्ठतिष्ठेतिचाब्रवी
त् २५ कृतवर्मातुसंक्रुद्धोधर्मपुत्रस्यमारिष भल्लेनतच्छेदधनुस्तमभिविव्याधसप्तभिःशरैः २६ तस्यपार्थोधनुश्छित्त्वाहस्तावापंनिकृत्यच
प्राहिणोन्निशितान्बाणान्पंचराजञ्छिलाशितान् २७ ततस्तेकवचंभित्त्वाहेमचित्रंमहारथे प्राविशन्धरणीमुग्रावल्मीकमि
वपन्नगाः २८ अक्ष्णोर्निमेषमात्रेणसोन्यदादायकार्मुकं विव्याधपांडवंषष्ट्यासूतंचनवभिःशरैः २९ तस्यशक्तिममेयात्मा
पांडवोभुजगोत्तमं चिक्षेपभरतश्रेष्ठरथेतस्यमहद्धनुः ३० साहेमचित्रामहतीपांडवेनप्रवेरिता निर्भिद्यदक्षिणंबाहुंप्र
विशद्धरणीतले ३१ एतस्मिन्नेवकालेतुगृह्यपार्थःपुनर्द्धनुः हार्दिक्यंछादयामासशरैःसन्नतपर्वभिः ततस्तुसमरेशूरो
वृष्णीनांप्रवरोरथी ३२ अश्वसूतंचचक्रेनिमेषार्द्धाद्युधिष्ठिरं ततस्तुपांडवोज्येष्ठःखड्गचर्मसमाददे ३३ तदस्यनि
शितैर्बाणैर्माधवोच्छिनद्रणे तोमरंतुततोगृह्यस्वर्णदंडंमहद्धनुः ३४ प्रैषयत्समरेतूर्णंहार्दिक्यस्ययुधिष्ठिरः तमाप
तंतंसहसाधर्मराजभुजच्युतं ३५ द्विधाचिच्छेदहार्दिक्यःकृतहस्तःस्मयन्निव ततःशरशतेनाजौधर्मपुत्रमवाकिरत्
३६ कवचंचास्यसंक्रुद्धःशरैस्तीक्ष्णैरदारयत् हार्दिक्यशरसंछिन्नंकवचंतन्महायशाः ३७ व्यशीर्यतरणेराजंस्ताराजा
लमिवांबरात् सच्छिन्नधन्वाविरथःशीर्णवर्माशरार्दितः ३८ अपयासीद्रणात्तूर्णंधर्मपुत्रोयुधिष्ठिरः कृतवर्मातुनिर्जि
त्यधर्मात्मानंयुधिष्ठिरं ३९ पुनर्द्रोणस्यजुगुपेचक्रमेवमहात्मनः इतिद्रोणपर्वणिरात्रियुद्धे १६२ संजयउवाच भूरिस्तु
समरेराजन्शैनेयंरथिनांवरं आपतंतमपासेधत्प्रवराणिवकुंजरः १ अथैनंसात्यकिःक्रुद्धःपंचभिर्निशितैःशरैः विव्या

Indira Gandhi National
Centre for the Arts

द्रो. वहन्रूपैस्तं समासाद्य वसुसेनो रणाजिते २ तथैव कौरवो युद्धे शैनेयं युद्धदुर्मदं दृष्ट्वा निस्त्रिंशी तेनासौ रोषाविष्टमनुजान्तरे ३ ताव
११० मोऽस्य महाराज तत ज्ञाते शरैस्तदा कौरवं रुक्मरथ नयनो कोप्याद्दिव्यं कार्मुकं ४ तयोः सन्महाराजशस्त्रवर्षिणोः स्वराहता
कुरुपोः सायकमुखीपं मांतकं निकाशयोः ५ तावन्योन्यं शरैराजन्मुक्त्वा युद्धसमवस्थितौ मुहूर्तं चैव तद्युद्धं समरूपमि
वाभवत् ६ ॥ ततः क्रुद्धो महाराज शैनेयः प्रहसन्निव धनुश्चिच्छेद समरे कौरव्यस्य महात्मनः ७ अथैनं छिन्नधन्वानं नवभिर्नि
शितैः शरैः विव्याध हृदये राजन्स्मांतिष्ठ तिष्ठेति चाब्रवीत् ८ सोतिविद्धो बलवता शत्रुणा शत्रुतापनः धनुरन्यत्समादाय सात्वतं
प्रत्यविध्यत ९ स विद्ध्वा सात्वतं बाणैस्त्रिभिरेव विशांपते धनुश्चिच्छेद समरे नस्तु तीक्ष्णेन हसन्निव १० छिन्नधन्वा महाराज सा
त्यकिः क्रोधमूर्छितः प्रजहार महावेगां शक्तिं तस्य महोरसि ११ स तु शक्त्या विभिन्नाङ्गो निपपात रथोत्तमात् लोहितांगस्तथा
काशात् दीप्तरश्मिर्यथा ग्रहः १२ तन्तु दृष्ट्वा हतं शूरमश्वत्थामा महारथः अभ्यधावत वेगेन शैनेयं प्रति संयुगे १३ तिष्ठ तिष्ठे
ति चाभाष्य शैनेयं समरांगणे अभ्यवर्षच्छरौघेण मेरुं वृष्ट्या यथांबुदः १४ तमापतंतं संरब्धं रथेनैव स सारथिं प्रति घटोत्कचोऽब्र
वीद्राजन्नादं मुक्त्वा महारथः १५ तिष्ठ तिष्ठ न मे जीवन्द्रोणपुत्र गमिष्यसि एष त्वाद्य हनिष्यामि महिषं स्कन्दो यथा १६ युद्धश्रद्धा
महं ते घनिनेष्यामि रणाजिरे इत्युक्त्वा क्रोधताम्राक्षो राक्षसः परवीरहा १७ द्रौणिमभ्यद्रवत् क्रुद्धो गजेंद्रमिव केसरी रथाक्षमा राम
त्रैः कुलिशप्रख्यैर्घटोत्कचः १८ रथिनामृषभं द्रौणिं धाराभिरिव तोयदः शरवृष्टिं तु तां प्राप्तां शरैराशीविषोपमैः १९ शातया
मास समरे तरसा द्रौणिरुत्स्मयन् ततः शरशतैस्तीक्ष्णैर्मर्मभेदिभिराशुगैः २० समाचिनोद्राक्षसेंद्रं घटोत्कचमरिंदमं स
शरैराचितस्तेन राक्षसो रणमूर्द्धनि २१ व्यकाशत महाराज श्वाविच्छललितो यथा ततः क्रोधसमाविष्टो भैमसेनिः प्रतापवा

न् २२ शरैरवचकर्त्ताग्रे द्रौणिं क्रुद्ध इवाशनिः क्षुरप्रैरर्द्धचन्द्रैश्च नाराचैः सशिलीमुखैः २३ वराहकर्णैर्नालीकैस्तीक्ष्णै
श्चापि विकर्णिभिः तां शस्त्रवृष्टिमतुलां वज्राशनिसमस्वनां २४ पतंतीमुपरि क्रुद्धो द्रौणिरव्यथितेंद्रियः दुःसहां सहसा शरैर्घो
रैर्दिव्यास्त्रप्रतिमंत्रितैः २५ व्यधमत्स महातेजा महाभ्राणीव मारुतः ततोंतरिक्षे बाणानां संग्रामोन्य इवाभवत् २६ घोररू
पो महाराज योधानां हर्षवर्धनः ततोस्त्रसंघर्षकृतैर्विस्फुलिंगैः समंततः २७ बभौ निशामुखे व्योम खद्योतैरिव संवृतं स
मार्गणगणैर्द्रौणिर्दिशः प्रच्छाद्य सर्वतः २८ प्रियार्थं तव पुत्राणां राक्षसं समुपाकिरत ततः प्रववृते युद्धं द्रौणिराक्षस
योर्मृधे २९ विगाढे रजनीमध्ये शक्रप्रह्लादयोरिव ततो घटोत्कचो बाणैर्दशभिर्द्रौणिमाहवे ३० जघानोरसि संक्रुद्धः
कालज्वलनसंनिभैः स तैरभ्याहतस्तेन राक्षसेन महाबलः ३१ चचाल समरे द्रौणिर्वातनुन्न इव द्रुमः स मोहमनु
संप्राप्तो ध्वजयष्टिं समाश्रितः ३२ ततो हाहाकृतं सैन्यं तव सर्वं जनाधिप हतं स्म मेनिरे सर्वे तावकास्तं विशांपते ३३
तं तु दृष्ट्वा तथावस्थमश्वत्थामानमाहवे पांचालाः सृंजयाश्चैव सिंहनादं प्रचक्रिरे ३४ प्रतिलभ्य ततः संज्ञामश्वत्थामा
समाहवे पांचालाः सृंजयाश्चैव सिंहनादं महाबलः धनुः प्रपीड्य वामेन करेणामित्रकर्शनः ३५ मुमोचाकर्णपूर्णेन धनुषा शर
मुत्तमं यमदंडोपमं घोरमुद्दिश्याशु घटोत्कचं ३६ स भित्त्वा हृदयं तस्य राक्षसस्य शरोत्तमः विवेश वसुधामुग्रः सपुंखः पृथि
वीपते ३७ सोतिविद्धो महाराज रथोपस्थ उपाविशत् राक्षसेंद्रः सुबलवान् द्रौणिना रणशालिना ३८ दृष्ट्वा विमूढं हैडिंबं सा
रथिस्तु रणाजिरात् द्रौणेः सकाशात्संभ्रांतस्त्वपनिन्ये त्वरान्वितः ३९ तथा तु समरे विद्ध्वा राक्षसेंद्रं घटोत्कचं ननाद सुमहाना
दं द्रोणपुत्रो महारथ ४० पूजितस्तव पुत्रैश्च सर्वयोधैश्च भारत वपुषा प्रतिजज्वाल मध्याह्न इव भास्करः ४१ भीमसेनं तु युध्यंतं भार

Indira Gandhi National Centre for the Arts

द्रो. द्राजरथंप्रति स्वपउर्योधनोराजाप्रस्वविध्यच्छितैःशरैः ४५ तंभीमसेनोदशभिःशरैर्विव्याधमारिष दुर्योधनोपिविंशत्या
१११ शराणांप्रत्यविध्यत ४३ तौसायकैरवच्छन्नावदृश्यतांरणाजिरे मेघजालसमाच्छन्नौनभसीवेंदुभास्करौ ४४ अथदुर्योधनो
राजाभीमंविव्याधपत्रिभिः पंचभिर्भरतश्रेष्ठतिष्ठतिष्ठेतिचाब्रवीत ४५ तस्यभीमोधनुश्छित्वाध्वजंचदशभिःशरैः विव्याधकौ
रवश्रेष्ठंनवत्यानतपर्वणां ४६ ततोदुर्योधनःक्रुद्धोभीमसेनस्यमारिष विक्षेपसशरांस्तानजनपश्यतांसर्वधन्विनां ४७ तान्नि
हत्यशरान्राजापितुर्योधनचक्षुतान् कौरवंपंचविंशत्याक्षुद्रकाणांसमार्पयत ४८ दुर्योधनस्तुसंक्रुद्धोभीमसेनस्यमारिष
क्षुरप्रेणाधनुश्छित्वादशभिःप्रत्यवेध्यत ४९ अथान्यद्धनुरादायभीमसेनोमहाबल विव्याधनृपतिंतूर्णंसप्तभिर्निशितैः
शरैः ५० तदप्यस्यधनुःक्षिप्रंचिच्छेदलघुहस्तवत द्वितीयंचततःपंचचतुर्थंपंचमंतथा ५१ आत्तमात्तंमहाराजभीमस्य
धनुराच्छिनत तवपुत्रोमहाराजजितकाशीमदोत्कट ५२ ।सतथाच्छिद्यमानेषुकार्मुकेषुपुनःपुनः शक्तिंचिक्षेपसमरे सर्वपा
रशवीमयीं ५३ मृत्योरिवस्वसारंहिदीप्ताग्निशिखोपमां सीमंतमिवकुर्वंतीनभसोग्निसमप्रभां ५४ असंप्राप्तामेवतांशक्तिंत्रि
धाचिच्छेदकौरवःपश्यतःसर्वलोकस्यभीमस्यचमहात्मनः ५५ ततोभीमोमहाराजगदांगुर्वींमहाप्रभां चिक्षेपाविध्यवेगे राम
नदुर्योधनरथंप्रति ५६ ततःसासहसावाहंस्तवपुत्रस्यसंयुगे सारथिंचगदागुर्वीममर्दभरतर्षभ ५७ पुत्रस्तुतवराजेंद्ररथाद्धे
मपरिष्कृतात आप्लुतःसहसापानंनैरकस्यमहात्मनः ५८ ततोभीमोहतंमत्वातवपुत्रंमहारथं सिंहनादंमहत्कृत्वात
र्जयामासकौरवान ५७ तावकाःसैनिकाश्चापिमेनिरेनिहतंनृपं ततोविनेदुःक्रुशुःसर्वतेहाहेतिसमंततः ५८ तेषांतुनि
नदंश्रुत्वात्रस्तानांसर्वयोधिनां भीमसेनस्यनादंचश्रुत्वाराजन्महात्मनः ५९ ततोयुधिष्ठिरोराजाहतंमत्वासुयोधनं अभ्यव
॥ तत्तूर्णेनपत्रपार्थोवृकोदरः ६० पंचालाःकेकयामत्स्याःसृंजयाश्चविशांपते सर्वोद्योगेनाभिजग्मुर्द्रोणमेवयु

युत्सया ६१ तत्रासीत्सुमहद्युद्धंद्रोणस्याथपरैःसह घोरेतमसिमग्नानांनिघ्नतामितरेतरं ६२ इतिद्रोणपर्वणिरात्रियुद्धे
१६४ संजयउवाच सहदेवमथायांतंद्रोणप्रेप्सुंविशांपते कर्णोवैकर्तनोयुद्धेवारयामासभारत १ सहदेवस्तुराधेयंवि
द्ध्वानवभिराशुगैः पुनर्विव्याधदशभिर्निशितैर्नतपर्वभिः २ तंकर्णःप्रतिविव्याधशतेननतपर्वणां सज्यंचास्यधनुःशीघ्रंचि
च्छेदलघुहस्तवत ३ ततोन्यद्धनुरादायमाद्रीपुत्रःप्रतापवान् कर्णंविव्याधविंशत्यातदद्भुतमिवाभवत ४ तस्यकर्णो
हयान्हत्वाशरैःसन्नतपर्वभिः सारथिंचास्यभल्लेनद्रुतंनिन्येयमक्षयं ५ विरथःसहदेवस्तुखड्गंचर्मसमाददे तदप्यस्यश
रैःकर्णोव्यधमत्प्रहसन्निव ६ अथगुर्वींमहाघोरांहेमचित्रांमहागदां प्रेषयामाससंक्रुद्धोवैकर्तनरथंप्रति ७ तामापतंतीं
सहसासहदेवप्रचोदितां व्यस्तंभयच्छरैःकर्णोभूमौचैनामपातयत ८ गदांविनिहतांदृष्ट्वासहदेवस्त्वरान्वितः शक्तिंचिक्षेपकर्णा
यतामप्यस्याच्छिनच्छरैः ९ ससंभ्रमंततस्तूर्णमवप्लुत्यरथोत्तमात सहदेवोमहाराजदृष्ट्वाकर्णंव्यवस्थितं १० रथचक्रंततो
जग्राहमुमोचाधिरथिंप्रति तमापतंतंसहसाकालचक्रमिवोद्यत ११ शरैरनेकसाहस्रैरच्छिनत्सूतनंदन तस्मिंस्तुनिहतेचक्रे
सूतजेनमहात्मना १२ ईषारंडककोक्त्रांश्चयुगानिविविधानिच हस्त्यंगानितथाश्वांश्चमृतांश्चपुरुषान्बहून् १३ चिक्षेपक
र्णमुद्दिश्यकर्णस्तान्व्यधमच्छरैः सनिरायुधमात्मानंज्ञात्वामाद्रवतीसुतः १४ वार्यमाणस्तुविशिखैःसहदेवोरणंजहौ तम
भिद्रुत्यराधेयोमुहूर्ताद्भरतर्षभ १५ अब्रवीत्प्रहसन्वाक्यंसहदेवंविशांपते मायुध्यस्वरणेवीरविशिष्टैरथिभिःसह १६ सदृशै
र्युध्यमाद्रेयवचोमेमाविशंकिथा अथैनंधनुषोग्रेणतुदन्भूयोब्रवीद्वचः १७ एषोर्जुनोरणेयत्तोयुध्यतेकुरुभिःसह
अत्रगच्छस्वमाद्रेयगृहंवायदिमन्यसे १८ एवमुक्त्वातुतंकर्णोरथेनरथिनांवरः प्रायात्पांचालपांडूनांसैन्यानिप्रहसन्निव १९

Indira Gandhi National
Centre for the Arts

Indira Gandhi National
Centre for the Arts

द्रो॰ वध्यमानं तु माद्रेयं नाकुल्या समरे रिहा कृताः स्मृता ववो राजन्सत्यसंधो महायशाः २० सहदेवस्ततो राजन् विमनाः समपी
११२ डितः कर्मिवा कश्चन तमच्छ जाविताग्निरनिघत २१ स्मारु रोह रथं चापि पांचाल्यस्य महात्मनः जन्मेजयस्य समरे तरापुक्तो म
हारथः २२ विराटं सह सैनं तु द्रोणं वेदुत मागतं मद्रराजः शरौघेण च्छादयामास धन्विनं २३ तयोः समभवद्युद्धं समरे दृढ
धन्विनोः याहशं ह्यसवृद्राजन् जंभवासवयोः पुरा २४ मद्रराजो महाराज विराटं वाहिनापतिं आजघ्ने त्वरितं सत्यं शते
नानतपर्वणा २५ प्रतिविव्याध तं मात्स्यो नवभिर्निशितैः शरैः पुनश्चैव त्रिसप्तत्या हुत्वा भूयश्चैव शतेन तु २६ तस्य मद्राधिपो
हत्वा चतुरो रथवाजिनः सूतं ध्वजं च समरे रथात् आसन्यपातयत् २७ हताश्वात्तु रथात्तूर्णं सोवा रोह महीपति तस्थौ वि
स्फारयंश्चापं विमुंचन्निशिताच्छरान् २८ शतानीकस्ततो दृष्ट्वा भ्रातरं हतवाहनं रथेनाभ्यपतत्तूर्णं सर्वलोकस्य पश्यतः
२९ शतानीकमथायांतं मद्रराजो महामृधे विशिखैर्बहुभिर्विद्ध्वा ततो निन्ये यमक्षयं ३० तस्मिंस्तु निहते वीरे विराटो रथ
सत्तमः आरुरोह रथं तस्मात्तमेव ध्वजमालिनं ३१ ततो विस्फार्य नयने क्रोधाद्द्विगुणविक्रमः मद्रराजरथं तूर्णं छादयामास
सायकैः ३२ ततो मद्राधिपः क्रुद्धः शतेनानतपर्वणा आजघानोरसि दृढं विराटं वाहिनीपतिं ३३ सोतिविद्धो महाराज
रथोपस्थ उपाविशत् कश्मलं चाविशत्तीव्रं विराटो भरतर्षभ ३४ सारथिस्तमपोवाह समरे शरविक्षतं ततः सा महती सेना पा॰
प्राद्रवन्निशि भारत ३५ वध्यमाना शरशतैः शल्येनाहवशोभिना तां दृष्ट्वा विद्रुतां सेनां वासुदेवधनंजयौ ३६ प्रयातौ तत्र राज
न्यत्र शल्यो व्यवस्थितः तं तु प्रत्युद्ययौ राजन्राक्षसेंद्रोलंबुषः ३७ अष्टचक्रसमायुक्तमास्थाय प्रवरं रथं तुरंगमसुखैर्युक्तं
पिशाचैर्घोरदर्शनैः ३८ लोहितार्द्रपताकं तं रक्तमाल्यविभूषितं कार्ष्णायसमयं घोरमृक्षचर्मसमावृतं ३९ रौद्रेण

चित्रपक्षेण विस्तृताक्षेण कूजता ध्वजेनोच्छ्रितं तुंडेन गृध्रराजेन राजता ४० स बभौ राक्षसो राजन्भिन्नांजनचयोपमः रुरोधा
र्जुनमायांतं प्रभंजनमिवाद्रिराट् ४१ किरन्बाणगणान्राजञ्छतशोर्जुनमूर्धनि अतितीव्रमभूद्युद्धं नरराक्षसयोस्त
दा ४२ द्रष्टॄणां प्रीतिजननं सर्वेषां तत्र भारत गृध्रकाकबलोलूककंकगोमायुहर्षणं ४३ तमर्जुनः शतेनैव पत्रिणाम
भ्यताडयत् नवभिश्च शितैर्बाणैर्ध्वजं चिच्छेद भारत ४४ सारथिं च त्रिभिर्बाणैस्त्रिभिरेव त्रिवेणुकं धनुरेकेन चिच्छेद
चतुर्भिश्चतुरो हयान् ४५ विरथस्योद्यतं खड्गं शरेणास्य द्विधाकरोत् अथैनं निशितैर्बाणैश्चतुर्भिर्भरतर्षभ ४६ पार्थो
द्रावयद्राक्षसेंद्रं स विद्धः प्राद्रवद्भयात् तं विजित्यार्जुनस्तूर्णं द्रोणांतिकमुपाययौ ४७ किरञ्शरगणान्राजन्नरवारणवाजि
षु वध्यमाना महाराज पांडवेन यशस्विना ४८ सैनिका न्यपतन्नुर्व्यां वातनुन्ना इव द्रुमाः तेषु त्सात्यमानेषु फाल्गुनेन म
हात्मना ४९ संप्राद्रवद्बलं सर्वं पुत्राणां ते विशांपते द्रोणपर्वणि रात्रियुद्धे १६५ संजय उवाच शतानीकं शरैस्तूर्णं नि
र्दहंतं चमूं तव चित्रसेनस्तव सुतो वारयामास भारत १ नाकुलिश्चित्रसेनं तु नाराचेनार्दयद्भृशं। स च तं प्रतिविव्याध दशभि
र्निशितैः शरैः २ चित्रसेनो महाराज शतानीकं पुनर्युधि नवभिर्निशितैर्बाणैराजघान स्तनांतरे ३ नाकुलिस्तस्य विशिखैर्व
र्म संनतपर्वभिः गात्रात्संच्यावयामास तदद्भुतमिवाभवत् ४ सोपेतवर्मा पुत्रस्ते विरराज भृशं नृप उत्सृज्य काले राजेंद्र
निर्मोकमिव पन्नगः ५ ततोस्य निशितैर्बाणैर्ध्वजं चिच्छेद नाकुलिः धनुश्चैव महाराज यतमानस्य संयुगे ६ स छिन्नधन्वा समरे
विवर्मा च महारथः धनुरन्यन्महाराज जग्राहारिविदारणं ७ ततस्तूर्णं चित्रसेनो नाकुलिं नवभिः शरैः विव्याध समरे क्रुद्धो
भरतानां महारथः ८ शतानीकोथ संक्रुद्धश्चित्रसेनस्य मारिष जघान चतुरो वाहान्सारथिं च नरोत्तमः ९ अवप्लुत्य रथात्तस्मा

द्रो॰ चित्रसेनो महारथः नाकुलिं पंचविंशत्या शराणामार्दयद्बली १० तस्य तत्कुर्वतः कर्म नकुलस्य सुतो रणे अर्द्धचंद्रेणावि
च्छेद चापं रणे विनर्दिते ११ संछिन्नधन्वा विरथो हताश्वो हतसारथिः आरुरोह रथं तूर्णं किरीटच्छत्रशालिनः १२ पद्मसेनस्तु
११३ समरे कर्णपुत्रेण महारथं बाणानां त्रिभिर्बाधवाहौ उरसि चानघ १४ वृषसेनस्ततः क्रुद्धो द्रुपदस्य सुतं रथे स्थितं बहुभिः सा
यकैः सायकैस्ततो राजघानस्तनांतरे १५ तावुभौ शरसंतुन्नौ शरकंटकिनौ रणे बभ्राजेतां महाराज श्वाविधौ श्वलनाविव १६
रुक्मपुंखैः प्रसन्नाग्रैः तौ रथच्छिन्नतनुच्छदौ रुधिरौघपरिक्लिन्नौ व्यभ्राजेतां महामृधे १७ तपनीयनिभौ चित्रौ कल्पवृक्षावि
वाद्भुतौ किंशुकाविव चोत्फुल्लौ व्यकाशेतां रणाजिरे १८ वृषसेनस्ततो राजन्नवत्या निशितैः शरैः विद्धा द्विसप्तत्या समन्तात्पुनर
नेकशो निशितैः १९ ततः शरसहस्राणि विमुंचन्निव भोतृदा कर्णपुत्रो महाराज वृषसेनो महारथः २० द्रुपदस्य ततः क्रु
द्धो वृषसेनस्य कार्मुकं द्विधा चिच्छेद भल्लेन पीतेन निशितेन च २१ सोन्यत्कार्मुकमादाय रुक्मबद्धं नवं दृढं तूणादाकृ
ष्य विमलं भल्लं पीतं निशितं दृढं २२ कार्मुके योजयित्वा तु द्रुपदं समवैक्षत सच आकर्णपूर्णं मुमुचे त्रासयन्सर्वसोमकान् २३
हृदयं तस्य निर्भिद्य जगाम धरणीतले कश्मलं प्राविशच्चापि वृषसेनशराहतः २४ सारथिस्तमपोवाह स्मरन्सारथिचेष्टितं त राम॰
स्मिन्भग्ने नरश्रेष्ठ पांचालानां महारथे २५ ततस्तु द्रुपदानीकं शरैश्छिन्नतनुच्छदं संप्राद्रवद्रणे राजन्निशीथे भैरवे सति २६
प्रदीपैर्हि परित्यक्तैर्ज्वलद्भिः सर्वतस्ततः व्यराजत महाराजन् द्यौर्यथा घोरैरिव ग्रहैः २७ तथांगदैर्निपतितैर्व्यराजत वसुंधरा प्रा
वृट्काले महाराज विद्युद्भिरिव तोयदः २८ ततः कर्णसुतत्रस्ताः सोमकाः विप्रदुद्रुवुः यथेन्द्रभयवित्रस्ता दानवास्तारकाम
ये २९ तेनार्द्यमानाः समरे द्रवमाणाश्च सोमकाः व्यराजन्त महाराज प्रदीपैरवभासिता ३० तांस्तु निर्जित्य समरे कर्णपु

त्रो व्यरोचत मध्यंदिनमनुप्राप्तो घर्मांशुरिव भारत ३१ तेषु राजसहस्रेषु तावकेषु परेषु च एक एव ज्वलंस्तस्थौ वृषसेन
प्रतापवान् ३२ स विजित्य रणे शूरान्सोमकानां महारथान् जगाम त्वरितस्तत्र यत्र राजा युधिष्ठिरः ३३ प्रतिविंध्यमथ क्रु
द्धं प्रदहंतं रणे रिपून् दुःशासनस्तव सुतः प्रत्यगच्छन्महारथ ३४ तयोः समागमो राजंश्चित्ररूपो बभूव ह व्यपेतजलदे व्यो
म्नि बुधभास्करयोरिव ३५ प्रतिविंध्यं तु समरे कुर्वाणं कर्म दुष्करं दुःशासनस्त्रिभिर्बाणैर्ललाटे समविध्यत ३६ सोतिविद्धो ब
लवता तव पुत्रेण धन्विना विरराज महाबाहुः सशृंग इव पर्वतः ३७ दुःशासनं तु समरे प्रतिविंध्यो महारथः नवभिः सायकैर्वि
द्ध्वा पुनर्विव्याध सप्तभिः ३८ तत्र भारत पुत्रस्ते कृतवान्कर्म दुष्करं प्रतिविंध्यहयानुग्रैः पातयामास सायकैः ३९ सारथिं चा
स्य भल्लेन ध्वजं च समपातयत् रथं च तिलशो राजन्व्यधमत्तस्य धन्विनः ४० पताकाश्च सतूणीरा रश्मीन्योक्त्राणि च प्रभो
चिच्छेद तिलशः क्रुद्धः शरैः सन्नतपर्वभिः ४१ विरथः स तु धर्मात्मा धनुष्पाणिरवस्थितः अयोधयत्तव सुतं किरन्शरशतान्बहून् ४२
क्षुरप्रेण धनुस्तस्य चिच्छेद कृतहस्तवत् अथैनं दशभिर्बाणैश्छिन्नधन्वानमार्दयत ४३ तं दृष्ट्वा विरथं तत्र भ्रातरोस्य महारथाः
अन्ववर्तंत वेगेन महत्या सेनया सह ४४ आप्लुतः ततः सोपानं सुतसोमस्य भास्वरं धनुर्गृह्य महाराज विव्याध तनयं तव
अभ्यवर्तंत वेगेन महत्या सेनया सह अभ्यवर्तंत संग्रामे महत्या सेनया वृताः ४६ ततः प्रववृते युद्धं तव तेषां च मारिष निशीथे
४७ ततस्तु तावकाः सर्वे परिवार्य सुतं तव ४७ द्रोणपर्वणि रात्रियुद्धे १६६ संजय उवाच नकुलं रभसं युद्धे निघ्नंतं वाहिनीं तव अभ्ययात्सौ
बलो राजन्क्रुद्धो तिष्ठ तिष्ठेति चाब्रवीत् १ कृतवैरौ तु तौ वीरावन्योन्यवधकांक्षिणौ शरैः पूर्णायतोत्सृष्टैरन्योन्यमभिजघ्नतुः २ यथैव न
कुलो राजन् शरवर्षाण्यमुंचत तथैव सौबलो राजन्शिक्षां संदर्शयन्युधि ३ तावुभौ समरे शूरौ शरकंटकितौ तदा व्यराजेतां महा
कूर्मौ श्वाविधौ इव

द्रो॰ ११४

राजन् कंकैरिव शाल्मली ४ स्फुरितोष्ठौ महाराज विवृतलोचनौ क्रोधसंरक्तनयनौ निर्दहंतौ परस्परं ५ श्यालस्तु
तव संक्रुद्धो माद्रीपुत्रं हसन्निव कर्णिनैकेन विव्याध हृदये निशितेन ह ६ नकुलस्तु भृशं विद्धः श्यालेन तव धन्विना निषसा
द रथोपस्थे कश्मलं चैनमाविशत् ७ अत्यंतवैरिणं दृष्ट्वा शत्रुं तथागतं ननाद शकुनी राजन् तपांते जलदो यथा प
प्रतिलभ्य ततः संज्ञां नकुलः पांडुनंदनः अभ्ययात्सौबलं भूयो व्यात्तानन इवांतकः ९ संक्रुद्धः शकुनिं षष्ट्या विव्याध भरतर्षभ
पुनश्चैनं शतेनैव नाराचानां स्तनांतरे १० ततोऽस्य सशरं चापं मुष्टिदेशेऽच्छिनत्तदा ध्वजं च त्वरितं छित्वा रथाद्भूमावपातयत्
११ विशिखेन च तीक्ष्णेन पीतेन निशितेन च ऊरू निर्भिद्य चैकेन नकुलः पांडुनंदनः १२ श्येनं सपक्षं व्याधेन पातयामास तं ततः
सोऽतिविद्धो महाराज रथोपस्थ उपाविशत् १३ तानेव संनिपतितं दृष्ट्वा श्यालं तवानघ अपोवाह रथेनाशु सारथिर्ध्वजिनीमुखात्
१४ ततः सचुक्रुशुः पार्थाः पंच तेषां पदानुगाः निर्जित्य समरे शत्रून्नकुलः शत्रुतापन १५ अब्रवीत्सारथिं क्रुद्धो द्रोणानीकाय
मां वह तस्य तद्वचनं श्रुत्वा माद्रीपुत्रस्य धीमतः १६ प्रायात्तेन रणे राजन् येन द्रोणोऽन्वयुध्यत शिखंडिनं तु समरे द्रोणप्रेप्सुं वि
शांपते १७ कृपः शारद्वतो यत्तः प्रत्युद्गच्छत्सवेगितः गौतमं द्रुतमायांतं द्रोणांतिकमरिंदम १८ विव्याध नवभिर्भल्लैः शिखंडी
प्रहसन्निव तमाचार्यं महाराज विव्याध पंचभिराशुगैः १९ पुनर्विव्याध विंशत्या पुत्राणां क्षेमकृत्तव महद्युद्धं तयोरासीत् घोररूपं भया
नकं २० यथा देवासुरे युद्धे शंबरामरराजयोः शरजालावृतं व्योम चक्रतुस्तौ महारथौ २१ मेघाविव तपापाये वीरौ समरदुर्मदौ
प्रकृत्या घोररूपं तदासीद्घोरतरं पुनः २२ रात्रिश्च भरतश्रेष्ठ योधानां युद्धशालिनां कालरात्रिनिभा ह्यासीत् घोररूपा भयानका
२३ शिखंडी तु महाराज गौतमस्य महद्धनुः अर्द्धचंद्रेण चिच्छेद संख्ये विशिखैस्तदा २४ तस्य क्रुद्धः कृपो राजन् शक्तिं चिक्षेप दारुणां

स्वर्णदंडामकुंठाग्रां कर्मारपरिमार्जितां २५ तामापतंतीं चिच्छेद शिखंडी बहुभिः शरैः सापतन्मेदिनीं दीप्ता भासयंती महाप्र
भा २६ अथान्यद्धनुरादाय गौतमो रथिनां वरः प्राच्छादयच्छितैर्बाणैर्महाराज शिखंडिनं २७ स छाद्यमानः समरे गौत
मेन यशस्विना न्यषीदत रथोपस्थे शिखंडी रथिनां वरः २८ सीदंतं चैनमालोक्य कृपः शारद्वतो युधि आजघ्ने बहुभि
र्बाणैर्जिघांसन्निव भारत २९ विमुखं तु रणे दृष्ट्वा याज्ञसेनिं महारथं पांचालाः सोमकाश्चैव परिवव्रुः समंततः
३० तथैव तव पुत्राश्च परिवव्रुर्द्विजोत्तमं महत्या सेनया सार्धं ततो युद्धमवर्तत ३१ रथिनां च रणे राजन्नन्योन्यमभिधावतां बभूव तुमुलः
शब्दो मेघानां गर्जतामिव ३२ द्रवतां सादिनां चैव गजानां च विशांपते अन्योन्यमभितो राजन् क्रूरमायोधनं बभौ ३३ पत्तीनां द्रवतां
चैव पदशब्देन मेदिनी अकंपत महाराज भयत्रस्तेव चांगना ३४ रथा रथान् समासाद्य प्रद्रुता वेगवत्तराः न्यगृह्णन् बहवो राजन् शलभा
न्वायसा इव ३५ तथा गजान् प्रभिन्नांश्च सुप्रभिन्ना महागजाः तस्मिन्नेव पदे यत्ता निगृह्णंति स्म भारत ३६ सादी सादिनमासाद्य पत्ती
पदातिनं समासाद्य रणे सोन्योन्यं नातिचक्रमुः ३७ धावतां द्रवतां चैव पुनरावर्ततामपि बभूव तत्र सैन्यानां शब्दः सुविपुलो नि
शि ३८ दीप्यमानाः प्रदीपाश्च रथवारणवाजिषु अदृश्यंत महाराज महोल्का इव खाच्च्युताः ३९ सा निशा भरतश्रेष्ठ प्रदीपैरवभासिता
दिवसप्रतिमा राजन् बभूव रणमूर्द्धनि ४० आदित्येन यथा व्याप्तं तमो लोके प्रणश्यति तथा नष्टं तमो घोरं दीपैर्दीप्तैरलंकृतं ४१ शस्त्राणां
कवचानां च मणीनां च महात्मनां अंतर्दधुः प्रभाः सर्वा दीपैस्तैरवभासिताः ४२ तस्मिन् कोलाहले युद्धे वर्तमाने निशामुखे न केचिद्विदु
रात्मानमयमस्मीति भारत ४३ अवधीत्समरे पुत्रान् पितरं भरतर्षभ पुत्रश्च पितरं मोहात् सखायं च सखा तथा ४४ संबंधिनं

द्रो. विसृष्टापृथिवीपाले सिसानृपरेपरां ह्यपि निजघ्नुरितरेतरं निर्जिग्योरमधुद्धं द्रोणो भीमजनपानकं ४५ द्रोणपर्वणि शतत्रिपु
ष्टे १८७ संजय उवाच तस्मिन्नस्तमुले युद्धे वर्तमाने भयावहे धृष्टद्युम्नो महाराज द्रोणमेवाभ्यवर्तत १ संदधानो धनुःश्रेष्ठं ज्यां विकर्ष
११५ न्पुनः पुनः अभ्यवर्षत द्रोणस्य रथं हेमविभूषितं २ धृष्टद्युम्नमथायांतं द्रोणस्यांतचिकीर्षया परिवव्रुर्महाराज पांचालाः पांडवैः
सह ३ तथा परिवृतं दृष्ट्वा द्रोणमाचार्यसत्तमं पुत्रास्ते सर्वतो यत्ता ररक्षुर्द्रोणमाहवे ४ बलार्णवौ ततस्तौ तु समेयातां निशामुखे
वातोद्धूतौ क्षुब्धसत्वौ भैरवौ सागराविव ५ ततो द्रोणो महाराज पांचाल्यं पंचभिः शरैः विव्याध हृदये तूर्णं सिंहनादं ननाद च ६ तं द्रोणः
पंचविंशत्या विव्याध रणसंयुगे विच्छेदास्य महत्त्वेन धनुरस्य महास्वनं ७ धृष्टद्युम्नस्तु निर्विद्धो द्रोणेन भरतर्षभ उत्ससर्ज धनुस्तूर्णं
संदष्टदशनच्छदे ८ ततः क्रुद्धो महाराज धृष्टद्युम्नः प्रतापवान् आददेन्यद्धनुःश्रेष्ठं द्रोणस्यांतचिकीर्षया ९ स निकृष्य धनु
श्चित्रमाकर्णमरिहा द्रोणस्यांतकरं घोरं विसृजत्सायकं ततः १० स विसृष्टो बलवता शरो घोरो महामृधे तापयामास तत्सैन्यं दिवा
–करइवोदितः ११ तं तु दृष्ट्वा शरं घोरं देवगंधर्वमानवाः स्वस्त्यस्तु समरे राजन् द्रोणायेत्यब्रुवन् वचः १२ तं तु सायकमप्राप्तमाचार्यस्य रथं प्रति
कर्णो द्वादशधा राजंश्छिच्छेद कृतहस्तवत् १३ स छिन्नो बहुधा राजन् सूतपुत्रेण मारिष निपपात शरस्तूर्णं निर्विषो भुजगो यथा १४
दुर्योधनः सुषेणश्च शकुनिश्चापि पंचभिः पांचाल्यमविरता विद्ध्वा सर्व एव महारथाः १५ स विद्धः समभिर्घोरैर्द्रोणत्राणार्थमाहवे सर्वान्
संग्रामाद्राजन्नु सविव्याध त्रिभिस्त्रिभिः १६ द्रोणं द्रौणिं च कर्णं च विव्याधास्य तवात्मजं ते भिन्ना व्यथिता तेन धृष्टद्युम्नेन संयुगे १७ द्विःपंच
भिः सोमकैकं पथिनां वारः द्रुमसेनं तु संक्रुद्धो राजन् विव्याध पत्रिणा १८ त्रिभिश्चान्यैः शरैः तीक्ष्णैस्तिष्ठतिष्ठेति चाब्रवीत् स तु तम्
निविव्याध त्रिभिस्तीक्ष्णैर्जिह्मगैः १९ स्वर्णपुंखैः शिलाधौतैः प्राणांतकरणो युधि महेष्वासेन तु पुनः स स्वर्णोज्ज्वलकुंडलं २० निव

कर्त्तशिरः कायात् द्रुमसेनस्य वीर्यवान् तच्छिरोऽपतद्भूमौ संदष्टोष्ठपुटं रणे २१ महाराज समुद्भूतं पक्वं तालफलं यथा तांश्चावि
द्ध्वा पुनर्वीरान् वीरः सुनिशितैः शरैः २२ राधेयस्याछिनद्भल्लैः कार्मुकं चित्रयोधिनः न तु तन्ममृषे कर्णो धनुषश्छेदनं तथा २३ नि
कृत्तनमिवात्युग्रं लांगूलस्य महाहरिः सोऽन्यद्धनुः समादाय क्रोधरक्तेक्षणः श्वसन् २४ अभ्यवर्षच्छरौघैस्तं धृष्टद्युम्नं महाबलं
दृष्ट्वा कर्णं सुसंरब्धं ते वीराः षड्रथर्षभाः २५ पांचाल्यपुत्रं त्वरिताः परिवव्रुर्जिघांसया षण्णां योधप्रवीराणां तावकानां पुरस्कृ
ते २६ मृत्योरास्यमनुप्राप्तं धृष्टद्युम्नममंस्महि एतस्मिन्नेव काले तु दाशार्हो विकिरन् शरान् २७ धृष्टद्युम्नं पराक्रांतं सात्यकिः
प्रत्यपद्यत तमायांतं महेष्वासं सात्यकिं युद्धदुर्मदं २८ राधेयो दशभिर्बाणैः प्रत्यविध्यदजिह्मगैः तं सात्यकिर्महाराज विव्याध
दशभिः शरैः २९ पश्यतां सर्ववीराणां मा गा इति चाब्रवीत् स सात्यकेस्तु बलिनः कर्णस्य च महात्मनः ३० आसीत्सु
महाघोरो राजन् बलिवासवयोरिव त्रासयन् रथघोषेण क्षत्रियान् क्षत्रियर्षभ ३१ राजावलोचनं कर्णं सात्यकिः प्रतिविध्य
त कंपयन्निव घोषेण धनुर्घोषेण संयुगे सूतपुत्रो महाराज सात्यकिं प्रत्ययोधयत् विपाठकर्णिनाराचैर्वत्सदंतैः क्षुरैरपि ३३
कर्णः शरशतैश्चापि शैनेयं समताडयत् तथैव युयुधानोपि वृष्णीनां प्रवरो रथः ३४ अभ्यवर्षच्छरैः कर्णं सात्यकिर्युद्धमत्तवत्
तावकाश्च महाराज कर्णस्य पुत्राश्च दंशिता ३५ सात्यकिं विव्यधुस्तूर्णं समंतान्निशितैः शरैः अस्त्रैरस्त्राणि संवार्य तेषां कर्णस्य चापि
ते ३६ अविध्यत्सात्यकिः क्रुद्धो वृषसेनं स्तनांतरे तेन बाणेन निर्विद्धो वृषसेनो विशांपते ३७ न्यपतत्स रथोपस्थे धनुरुत्सृज्य
वीर्यवान् ततः कर्णो हतं मत्वा वृषसेनं महारथं ३८ पुत्रशोकाभिसंतप्तः सात्यकिं प्रत्यपीडयत् पीड्यमानस्तु कर्णेन युयुधानो महारथः

द्रो. त्रयं विमाथ्य बहुभिः कंपितास्ममया गाः पुनःपुनः सकर्णो द्रोणभिर्विद्धा हतसेनेव समन्ततः ४० सहस्रं वा पंचनुषाणां पो। द्विछेद साते
७१६ तः तावन्मे बहुधी सज्जो हन्ता शत्रुनपकरे ४१ पुत्रुषान मम निघ्नंतम् मंतास्त्रिशितैः शरैः त्वन्नेमाने नु संग्रामेत स्मिन् वारवर ह्यपे ४२
श्रुतीवश्रुत्वा राजन् गांडीवस्य महात्मनः श्रुत्वा तु रथनिर्घोषं गांडीवस्य च निस्वनं ४३ सूतपुत्रो ब्रवीद्राजन् दुर्योधन मिदं वचः
एष सर्वान् शिवान् हत्वा मुख्यश स्युनरर्षभान् ४४ पौरवां श्चम हेष्वासो विक्षिपन्नुत्तमं धनुः पार्थस्त्वेत्र निपतन्नो ऽवनिरोम
हान् ४५ श्रूयते रथघोषश्च वासवस्येव नर्दतः करोति पांडवो व्यक्तं कर्मोपयिकमात्मन ४६ एषा विदारयन् सेनां राजन् बहुधा म
हेषवः स्मिंका सोमने कानि नहि तिष्ठति कर्हिचित् ४७ वातेनेव समुद्धूतम भ्रजालं विदार्यते सव्यसाचिन मासाद्य भित्त्वा
नौरिव सागरे ४८ द्रवतां योधमुख्यानां गांडीवप्रेषितैः शरैः विद्धानां शतशो राजन् श्रूयते निःस्वनो महान् ४९ सृगरुद्रेषुभि
निर्घोषं मत्वे न सार्थ्यमति श्रुपं समथो स्थितो स्माकं सामकिः साह नावरः ५० इह चेल्लप्स्यते लक्ष्यं कल्पानू जेष्यामहे परान् ए
प पांचाल राजस्य पुत्रो द्रोणेन संगतः ५१ सर्वतः संवृतो राजन् शूरैः स्वसहोदरैः सामकिं यदि हन्याम पद्युम्नं च पार्षतं ५२ श्रु
संशयं महाराज ध्रुवो नो विजयो भवेत् सौभद्रवद्धि मौ वा पोप रिवार्य महारथौ ५३ मयत्तामो महाराजनिहंतुं वृष्णिपार्षतौ सव्यसाची रथ-
पुरो येति द्रोणानीकाय भारत ५४ संसक्तं सात्यकिं ज्ञात्वा बहुभिः कुरुपुंगवैः तत्र गच्छंतु बहवः प्रवराः रथसत्तमा ५५ यावत्स
थ्यं न जानाति सात्यकिं बहुभिर्वृतं तेल रथ्वंत्या व्यशू रा शराणां मोक्षणे नृपं ५६ यथा ऽ विश्रवज्जनेष परलोकाय माधवः कर्ण स्यमत
माज्ञाय पुत्रस्ते प्राह सौबलं ५७ यथेंद्रः समरे राजन् प्राह विष्णुं यशस्विनं द्वृतः सहस्त्रै र्दशभि र्गजानामनिवर्तिनां ५८ रथैश्च दशसाह

सैर्वृतः स याहि धनंजयं दुःशासनो दुर्विषहः सुबाहुर्दु ष्प्रधर्षणः ५९ एते त्वामनुयास्यंति पत्तिभिर्बहुभि र्वृताः जहि कृष्णौ
महाबाहो धर्मराजं च मातुल ६० नकुलं सहदेवं च भीमसेनं तथैव च देवानामिव देवेंद्रं जयाशा त्वयि मे स्थिता ६१ जहि मातुल कौंते
यानसुरानिव पावकिः एवमुक्तो ययौ पार्थान् पुत्रेण तव सौबलः ६२ महत्या सेनया सार्द्धं सह पुत्रैश्च तेविभो प्रियार्थं तव पुत्राणां दि
धक्षुः पांडुनंदनान् ६३ ततः प्रववृते युद्धं तावकानां परैः सह प्रयाते सौबले राजन् पांडवानामनीकिनी ६४ बलेन महता युक्तः
सूतपुत्रः समाहते अभ्ययात् सात्यकिं युद्धे किरन् शरशतान्बहून् ६५ तथैव पार्थिवाः सर्वे सात्यकिं पर्यवारयन् भारद्वाजस्ततो
गत्वा धृष्टद्युम्नरथं प्रति ६६ महद्युद्धं तदा सीत्तु द्रोणस्य निशि भारत धृष्टद्युम्नेन वीरेण पांचालेश्च सहाद्भुतं ६७ द्रोणपर्वणि
रात्रियुद्धे १६८ संजय उवाच ततस्ते प्राद्रवन्सर्वे त्वरिता युद्धदुर्मदाः अमृष्यमाणाः संरब्धा युयुधानरथं प्रति १ तेरथैः क
ल्पितै राजन् हेमरूप्यविभूषितैः सादिभिश्च गजैश्चैव परिवव्रुः समंततः २ अथैनं कोष्टकीकृत्य सर्वे ते सम महारथाः सिंहनादांस्त
नश्चक्रुस्तर्जयंतस्म सात्यकिं ३ तेभ्यवर्षं छरैस्तीक्ष्णैः सात्यकिं सत्यविक्रमं त्वरमाणा महावीर्या माधवस्य वधेषिणः ४ तान् दृष्ट्वा
पततः तूर्णं शैनेयः परवीरहा प्रत्यगृह्णान्महाबाहुः प्रमुंचन् विशिखान्बहून् ५ तत्र वीरो महेष्वासः सात्यकिर्युद्धदुर्मदः निचकर्त
शिरांस्युग्रैः शरैः संनतपर्वभिः ६ हस्तिहस्तान् हयग्रीवान् बाहूनपि च सायुधान् क्षुरप्रैः शातयामास तावकानां समाधवः ७ पतितैश्चा
मरैश्चैव श्वेतच्छत्रैश्च भारत बभूव धरणी पूर्णा नक्षत्रैर्द्यौरिवाभिभो ८ एतेषां युयुधानेन युध्यतां युधि भारत बभूव तुमुलः शब्दः प्र
तानां क्रंदतामिव ९ तेन शब्देन महता पूरिता भूद्वसुंधरा रात्रिः समभवच्चैव तीव्ररूपा भयावहा १० दीर्यमाणं बलं दृष्ट्वा युयुधान

Indira Gandhi National
Centre for the Arts

द्रो॰ शराहतं सुनाखविपुलेनाहं निशीथे लोमहर्षणं २१ सुतस्तवाथ राजेन्द्र रथिनां वरः पत्रेषु शरजालानां संछादयति पुनः
११७ पुनः २२ तेन संचोदमानस्तु सूतस्तान् स्तंभगोत्तमान् सूतः संचोदयामास यत्र पुष्पधनुः स्थितः २३ ततो दुर्योधनः क्रुद्धो हैडिंबनाजितः
क्षुरप्रं शाणहस्तक्षिप्रं पोधीपुष्पधानमुपाद्रवत् २४ ततः प्रसमापतोत्कृष्टः शरैः शोणितभोजनैः दुर्योधनो हाश्वशालिमां धवमार्गणेन र
ह २५ दुर्योधनेन नतु तथा पूर्वमेवार्दितः शरैः शैनेयो दशभिर्बाणैः मत्स्यकिंचिद्दमार्षितः २६ ततः समसजवधुं दंतमुलं नरतर्षभ पां
चालानां च सर्वेषां नरनारीनां च दारुणं २७ शैनेयस्तु रणे क्रुद्धः पुत्रेण महारथ सापकानाम शताम्यानुविद्धो विशांपते २८ त
तोस्रवाहान्समरे शरैर्निर्मेयमन्तपं सार्थं च रथान्नेणोपातयामास पाविता २९ हत्वा श्वेतरथे तिघनपुत्रसेन विशांपते मुमो
च निशितान् बाणान् शैनेयस्य रथं प्रति २० श्मान्नूंपे चाश्वत सोऽत्र शैनेयः कृतहस्तवत् विशिखैः समरे राजन्नूपे विंतोऽननये
नते २१ आस्थाय परेणाल् हस्तेन मुष्टिदेशे महद्धनुः छिच्छेद तस्य पुत्रस्य समाविध विरथो विमनुष्कश्च सर्वलोकेश्वरः प्रभुः
आरुरोह रथं तूर्णं भास्करं कृतवर्मणः २२ दुर्योधने पराहन्ने शैनेयस्तव वाहिनीं द्रावयामास विशिखैर्निशामध्ये विशांपते २४
शकुनिश्चार्जुनं राजन्परिवार्य समंततः रथैरनेकसाहस्रैर्गजैश्चापि सहस्रशः २५ तथा हयसहस्रैश्च नानाशस्त्रैरवाकिरन् ततो महा रान॰
स्त्राणि सर्वाणि विक्षिप्तोऽर्जुनं प्रति २६ अर्जुनेऽवोरयंति स्म क्षत्रियाः कालचोदिताः तान् अर्जुनः सहस्राणि रथवारणवाजिनां २७
पर्यनारयत्परः संक्रुद्धो विपुलं क्षयं ततस्तु समरे शूरः शकुनिः सौबलस्तदा २८ विव्याध निशितैर्बाणैरर्जुनं प्रहसन्निव पुनश्चैव
वशतेनास्य संहरोधमहारथं २९ तमर्जुनस्तु विंशत्या विव्याध युधि भारत अथेतरान्महेष्वासान्निभिर्निर्विभेद ह ३० निवार्य ता
न्वाणगणोर्युधि राजन्धनंजयः जघान तावकान्योधान्वज्रपाणिरिवासुरान् ३१ भुजैश्छिन्नैर्महापाल हस्तिहस्तोपमैः

वे समाकीर्णा मही भाति पंचास्यैरिव पन्नगैः ३२ शिरोभिः सकिरीटैश्च सुनसैश्चारुकुंडलैः संदष्टोष्ठपुटैः क्रुद्धैस्तथैवोद्वृत्तलोच
नैः ३३ निष्कचूडामणिधरैः क्षत्रियाणां प्रियंवदैः पंकजैरिव विध्वस्तैः पद्मैरिव समा मही ३४ कृत्वा तत्कर्म बीभत्सुरुग्रमुग्र
पराक्रमः विव्याध शकुनिं भूयः पंचभिर्नतपर्वभिः ३५ आनाडपदं उलूकं च त्रिभिरेव तथा शरैः उलूकस्तु तथा विद्धो वासुदेवमता
डयत् ३६ ननाद च महानादं पूरयन्निव मेदिनीं अर्जुनः शकुनेश्चापं सायकैरच्छिनद्रणे ३७ निन्ये च चतुरो वाहान्यमस्य
सदनं प्रति ततो रथादवप्लुत्य सौबलो भरतर्षभ ३८ उलूकस्य रथं तूर्णमारुरोह विशांपते तावेकरथमारूढौ पितापुत्रौ महार
थौ ३९ पार्थं सिषिचतुर्बाणैर्गिरिं मेघाविवांबुभिः तौ तु विद्ध्वा महाराज पांडवो निशितैः शरैः ४० विद्रावयंस्तव चमूं शतशो व्यधम
च्छरैः अनिलेन यथाभ्राणि विछिन्नानि समंततः ४१ विछिन्नानि तथा राजन्बलान्यासन्विशांपते तद्बलं भरतश्रेष्ठ वध्यमानं तथा
निशि ४२ प्रदुद्राव दिशः सर्वा वीक्ष्यमाणं भयार्दितं उत्सृज्य वाहान्समरे चोदयन्तस्तथापरे ४३ संभ्रान्ताः पर्यधावन्त तस्मिंस्तमसि
दारुणे विजित्य समरे योधांस्तावकान्भरतर्षभ ४४ दध्मतुर्मुदितौ शंखौ वासुदेवधनंजयौ धृष्टद्युम्नो महाराज द्रोणं विव्याध त्रिभिः श
रैः ४५ चिच्छेद धनुषस्तूर्णं ज्यां शरेणाशितेन ह तन्निधाय धनुः श्रेष्ठं द्रोणः क्षत्रियमर्दनः ४६ आददेन्यद्धनुः शूरो वेगवत्सारवत्तरं धृष्टद्यु
म्नं ततो द्रोणो विद्ध्वा सप्तभिराशुगैः ४७ सारथिं पंचभिर्बाणैराजघान महाहवे तं निवार्य शरैस्तूर्णं धृष्टद्युम्नो महारथः ४८ व्यधम
त्कौरवीं सेनामासुरीं मघवानिव वध्यमाने बले तस्मिंस्तव पुत्रस्य मारिष ४९ प्रावर्तत नदी घोरा शोणितौघतरंगिणी उभयोः सेन
योर्मध्ये नराश्वद्विपवाहिनी ५० यथा वैतरणी राजन्यमराजपुरं प्रति द्रावयित्वा तु तत्सैन्यं धृष्टद्युम्नः प्रतापवान् ५१ अत्यराजत ते

Indira Gandhi National Centre for the Arts

द्रो. जसीशक्तो देवगणोपि च अथ रक्षो महाशालानृष्यशृङ्गाशिलेटिनो ५२ यमोश्च पुपुधानस्य पांडवस्य हैडिम्बः जिलारथम
११८ हस्त्यरातिवकानां महारथा ५३ सिंहनादरवांश्चक्रुः पांडवा जितकाशिनः पश्यत सर्वसुत्रस्य कर्मस्य चरणोत्कटा ५४ तथा
द्रोणस्य पुत्रः सौर्णाश्चैव विशांपते ॥ द्रोणपर्वणि रात्रियुद्धे १६९ ॥ संजय उवाच ॥ विद्रुतं स्वबलं दृष्ट्वा वध्यमानं महात्म
भिः कौरवैर्महताविष्टः पुत्रस्तव विशांपते १ अभ्येत्य सहसा कर्णं द्रोणं च जयतां वरं अमर्षवशमापन्नो वाक्यज्ञो वाक्यम
ब्रवीत् २ भवद्भ्यामिह संग्रामः क्रुद्धाभ्यां संप्रवर्त्तितः आहवे निहतं दृष्ट्वा सैन्धवं सव्यसाचिना ३ निहन्यमानां पांडवानां बले
न मम वाहिनी भुक्त्वापि द्विजयेश क्ताविव पश्यतां ४ यद्यहं भवतोस्त्याज्यो न त्वा वोस्मि तदेव हि आवां पांडुसुताकर्म
ह्येजेष्याव रतिमानदौ ५ तदैवाहं वचः श्रुत्वा नानयिष्याम्यहं समं ते नाकरिष्यामि पार्थैर्वैरं योधविनाशनं ६ यदि त्याज्यो ह्यहं मालो
भवद्भ्यां पुरुषर्षभौ युध्यतामनुरूपं यद्विक्रमेणात्मविक्रमौ ७ वाक्प्रतोदेन तौ वीरौ प्रणुन्नौ तनयेन ते प्रावर्त्तेतां स यामश्च हि ता राम.
विघ्नपन्नगौ ८ ततस्तौ रथिनां श्रेष्ठौ सर्वलोकधनुर्धरौ अभ्यधावतां पार्थान्सिनेकदस्यरणे ९ तथैव सहिताः पार्थाः सर्वसैन्ये
न संवृताः अभ्यवर्तन्त तौ वीरौ नर्दमानौ मुहुर्मुहुः १० अथ द्रोणो महेष्वासो दशभिः शिनिपुंगवं अविध्यत्सत्वरं क्रुद्धः सर्वशस्त्र
भृतांवरः ११ कर्णश्च दशभिर्बाणैः पुत्रश्च तव सप्तभिः दशभिर्वृषसेनश्च सौबलः सप्तभिः शरैः १२ एते कौरवसंक्रन्दे शैनेयं पर्य
वारयन् दृष्ट्वा च समरे द्रोणं निघ्नंतं पांडवीं चमूं १३ विव्यधुः सोमकास्तूर्णं समंततः शरवृष्टिभिः ततो द्रोणोहरत्प्राणान् क्षत्रि
याणां विशांपते १४ रश्मिभिर्भास्करो राजंस्तमसामिव सर्वतः द्रोणेन वध्यमानानां पांचालानां विशांपते १५ शुश्रुवे तुमुलः

शब्दः क्रोशतामितरेतरं पुत्रानन्ये पितॄनन्ये भ्रातॄनन्ये च मातुलान् १६ भागिनेयान्वयस्यांश्च तथा संबंधिबांधवान् उत्सृ
ज्योत्सृज्य गच्छंति त्वरिता जीवितेप्सव १७ अपरे मोहिता मोहात्तमेवाभिमुखा ययुः पांडवानां रणे योधाः परलोकं गताः परे १८
मात्याः पांडवा सेना पीड्यमाना महात्मना निशि संप्राद्रवद्राजन्मुक्त्वोल्काः सहस्रशः १९ पश्यतो भीमसेनस्य विज
यस्याच्युतस्य च यमयोर्धर्मपुत्रस्य पार्षतस्य च पश्यतः २० तमसा संवृते लोके न प्राज्ञायत किंचन कौरवाणां प्रकाशेन
दृश्यन्ते विद्रुताः परे २१ द्रवमाणं तु तत्सैन्यं द्रोणकर्णौ महारथौ जघ्नतुः पृष्ठतो राजन्किरंतौ सायकान्बहून् २२ पांचा
लेषु प्रभग्नेषु दीर्यमाणेषु सर्वतः जनार्दनो दीनमनाः प्रत्यभाषत फाल्गुनं २३ द्रोणकर्णौ महेष्वासावेतौ पार्षतसा
त्यकौ पांचालांश्चैव सहितौ जघ्नतुः सायकैर्भृशं २४ एतयोः शरवर्षेण प्रभग्ना नो महारथाः वार्यमाणापि कौंतेय पृतना ना
वतिष्ठते २५ तावावां सहितौ भूत्वा सूदयावः शितैः शरैः द्रोणं च सूतपुत्रं च प्रयतावस्य बाधितुं २६ एतौ हि बलिनौ शूरौ क
तास्त्रौ जितकाशिनौ उपेक्ष्यमाणौ बलवद्घातयेतां निशामिमां २७ तयोः संवदतो रेवं भीमः कुम्भामहाबलः आयात्त्वकारयः
श्चापि पुनरावर्त्य वाहिनीं २८ वृकोदरमथायांतं दृष्ट्वा तत्र जनार्दनः पुनरेवाब्रवीद्राजन्हर्षयन्निव पांडवं २९ एष भीमो रणश्ला
घी हतः सोमकपांडवैः त्वितो येतिनेगोनेद्रोणकर्णौ महारथौ ३० एतेन सहितो युध्य पांचालैश्च महारथैः आश्वासनार्थं सैन्या
नां सर्वेषां पांडुनंदन ३१ ततस्तौ पुरुषव्याघ्रावुभौ माधवपांडवौ द्रोणकर्णौ समासाद्य धिष्ठितौ रणमूर्द्धनि ३२ ततः पुन
स्तत्सुनरांस्तत्र युधिष्ठिरबलं महत् ततो द्रोणश्च कर्णश्च परान्ममृदतुर्मृधे ३३ स संप्रहारस्तुमुलो निशि प्रत्यवर्त्तत

Indira Gandhi National
Centre for the Arts

द्रोणी २ यथा सागरयोराजन्संश्लेषो हि पवित्रयोः ३४ ततस्तत्र सपाणिभ्यां शरा पांचालवराहिनी युयुधे पांडवैः सार्द्धमुन्मत्तत

११८ / रसंकुले ३५ रजसा तमसा चैव संवृते भरतर्षभ केवलेनाभिगोत्रेण माधुष्यंत जयैषिणा ३६ अन्यत्र पतिहि नामानि श्रा

व्यमाणानि पार्थिवैः प्रहरद्भिर्महाराज स्वयंवर इवाहवे ३७ निःशब्दमासीत्सहसा पुनः शब्दो महानभूत् क्रुद्धानां युध्य

मानानां जयतां जयतामपि ३८ यत्र यत्र स्म दृश्यंते प्रदीपाः कुरुसत्तम तत्र तत्र स्म दृश्यन्ते निपतंति पतंगवत् ३९ त

था संयुध्यमानानां विप्रगाढा महानिशा पांडवानां च राजेन्द्र कौरवाणां च सर्वशः ४० द्रोणपर्वणि रात्रियुद्धे २० संज

य उवाच ततः कर्णो रणे दृष्ट्वा पार्षतं परवीरहा आजघानोरसि शरैर्दशभिर्मर्मभेदिभिः १ प्रतिविव्याध तं कर्णं धृष्टद्यु

म्नोऽपि मारिष दशभिः सायकैर्हृष्टस्तिष्ठ तिष्ठेति चाब्रवीत् २ तावन्योन्यं शरैः संख्ये संछाद्य सुमहारथौ पुनः पूर्णायतोत्सृष्टै

र्विव्यधाते परस्परं ३ ततः पांचालमुख्यस्य धृष्टद्युम्नस्य संयुगे सारथिं चतुरश्चाश्वान्कर्णो विव्याध सायकैः ४ कार्मुकप्रवरं चा

पि प्रचिच्छेद शितैः शरैः सारथिं चास्य भल्लेन रथनीडादपातयत् ५ धृष्टद्युम्नस्तु विरथो हताश्वो हतसारथिः गृहीत्वा परि राम

घं घोरं कर्णस्याश्वानपीडयत् ६ विद्धश्च बहुभिस्तेन शरैराशीविषोपमैः ततो युधिष्ठिरानीकं पद्भ्यामेवाभ्यपद्यत ७ आरोह

रथं चापि सहदेवस्य मारिष अथापि कामः कर्णस्य पयातो वसुना ८ कर्णस्तु सुमहातेजाः सिंहनादरवं भृशं धनुः

शब्दं महच्चक्रे दध्मौ तारेण वांबुजे ९ दृष्ट्वा विनिर्जितं युद्धे धृष्टद्युम्नं महारथाः अमर्षवशमापन्नाः पंचालाः सहसोमकाः १०

सूतपुत्रवधार्थाय शस्त्राण्यादाय सर्वशः प्रययुः कर्णमुद्दिश्य मृत्युं कृत्वा निवर्तनं ११ कर्णस्यापि रथे वाहानन्यान्सूतोऽयुनक्

जवान् शंखवर्णान्महावेगान्सैंधवान्साधुवाहिनः १२ लब्धलक्ष्यस्तु राधेयः पांचालानां महारथान् अभ्यपीडयदायस्तः शरैर्मेघ

इवाचलान् १३ सापीड्यमाना कर्णेन पांचालानां महाचमूः संप्राद्रवत्सुसंत्रस्ता सिंहेनेवार्दिता मृगाः १४ पतितास्तु रथो

भ्यस्तूर्णमश्वेभ्यश्च महीतले रथेभ्यश्च नराः स्म तत्र दृश्यंते ततस्ततः १५ धावमानस्य योधस्य क्षुरप्रैः स महामृधे बाहू चिच्छेद वै कर्णः

शिरश्चैव सकुंडलं १६ ऊरू चिच्छेद चान्यस्य गजस्थस्य विशांपते वाजिपृष्ठगतस्यापि भूमिष्ठस्य च मारिष १७ नाज्ञासिषुर्धावमा

नाश्च बहवश्च महारथाः संछिन्नान्यात्मगात्राणि वाहनानि च संयुगे १८ ते वध्यमानाः समरे पांचालाः सृंजयैः सह तृणस्प

र्शनाच्चापि सूतपुत्रं स्म मेनिरे १९ अपि स्वं समरे योधं धावमानं विचेतसः कर्णमेवाभ्यमन्यंत ततो भीता द्रवंति ते २० तान्य

नीकानि भग्नानि द्रवमाणानि भारत अभ्यद्रवत्ततः कर्णः पृष्ठतो विकिरंछरान् २१ अवेक्षमाणास्त्वन्योन्यं सुसंमूढा विचेतसः

नाशक्नुवन्नवस्थातुं काल्यमाना महात्मना २२ कर्णेनाभ्याहता राजन्पांचालाः परमेषुभिः द्रोणेन च दिशः सर्वा वीक्षमाणाः

प्रदुद्रुवुः २३ ततो युधिष्ठिरो राजा स्वसैन्यं प्रेक्ष्य विद्रुतं अपयाने मतिं कृत्वा फाल्गुनं वाक्यमब्रवीत् २४ पश्य कर्णं महेष्वासं धनु

ष्पाणिमवस्थितं निशीथे दारुणे काले तपंतमिव भास्करं २५ कर्णसायकनुन्नानां क्रोशतामेष निस्वनः अनिशं श्रूयते पार्थ

त्वद्बन्धूनामनाथवत् २६ यथा विसृजतश्चास्य संदधानस्य चाशुगान् पश्यामि नेतं पार्थैष क्षपयिष्यति नो ध्रुवं २७ यदत्रानंत

रं कार्यं प्राप्तकालं च पश्यसि कर्णस्य वधसंयुक्तं तत्कुरुष्व धनंजय २८ एवमुक्तो महाराज पार्थः कृष्णमथाब्रवीत् भीतः कुं

तीसुतो राजा राधेयस्यातिविक्रमात् २९ एवं गते प्राप्तकाले कर्णानीके पुनः पुनः जनार्दन त्वमद्य ... वाहिनी २०

द्रोणानीकं ... संयुगे कर्णेन त्रास्यमानानां नावस्थानेन नाश्यते २१ पश्यामि च तथा कर्णं ... विचेतसमधीन

द्रो॰ वत् द्रवमाणान्रथोदारान्किं रतं निशितैः शरैः ३१ नैनं शक्तास्मि संसोढुं चरंतं रणमूर्द्धनि मसत्वं ह्यसिशार्दूलपादस्प
१२० र्शानि नीरणा ३३ सम्यगात्तेत्रपायास्तु पत्रक सो महारथः अहमेनं हनिष्यामि मावेषमधुसूदन वासुदेवस्ततोवाच पश्यामि
कर्णं कौंतेय देवराजमिवाहवे विचरंतं नरव्याघ्रमतिमानुषविक्रमं ३५ नैतस्यान्योस्ति समरे प्रत्यनीको धनंजय ऋते त्वां पु
रुषव्याघ्र राक्षसाद्वा घटोत्कचात् ३६ न तु तावदहं मन्ये प्राप्तकालं तवानघ समागमं महाबाहो सूतपुत्रेण संयुगे ३७ दीप्यमा
नामहोल्केव तिष्ठत्यस्य हि वासवी त्वदर्थं हि महाबाहो रक्ष्यते सूतपुत्रेण संयुगे ३८ रक्ष्यते शक्तिरेषा हि रौद्रं रूपं बिभर्त्ति च घटोत्क
चस्तु राधेयं प्रत्युद्यातु महाबलः ३९ स हि भीमेन बलिना जातः सुरपराक्रमः तस्मिन्नस्त्राणि दिव्यानि राक्षसान्यासुराणि च ४०
सततं चानुरक्तो वो हितैषी च घटोत्कचः विजेष्यति रणे कर्णं इति मे नात्र संशयः ४१ एवमुक्तो महाबाहुः पार्थः पुष्करलो
चनः आजुहावाथ तद्रक्षस्तच्चासीत्प्रादुरग्रतः ४२ कवची सशरः खड्गी सधन्वा च विशांपते अभिवाद्य ततः कृष्णं पांडवं च
धनंजयं ४३ अब्रवीत्तं तदा हृष्टस्त्वयमस्म्यनुशाधि मां ततस्तं मेघसंकाशं दीप्तास्यं दीप्तकुंडलं ४४ अभ्यभाषत हैडिंबि
दाशार्हः प्रहसन्निव वासुदेवो ब्रवीद्वाचं घटोत्कच विजानीहि यत्त्वां वक्ष्यामि पुत्रक प्राप्तो विक्रमकालोऽयं तव नान्यस्य कस्यचित् रम-
४५ स भवान्मज्जमानानां बंधूनां त्वं प्लवो भव विविधानि तवास्त्राणि संति माया च राक्षसी ४६ पश्य कर्णेन हैडिंबे पांडवाना
मनीकिनी कालेन यथा गावः पालेन रणमूर्द्धनि ४७ एष कर्णो महेष्वासो मतिमान्दृढविक्रमः पांडवानामनी
केषु निहंति क्षत्रियर्षभान् ४८ किरतः शरवर्षाणि महांति दृढधन्विनः न शक्नुवंति संस्थातुं पीड्यमानाः शराग्निना ४९ निशी

थे सूतपुत्रेण शरवर्षेण पीडिताः एते द्रवंति पांचालाः सिंहेनेवार्दिता मृगाः ५० एतस्यैवं प्रवृद्धस्य सूतपुत्रस्य संयुगे निषे
द्धा विद्यते नान्यस्त्वामृते भीमविक्रम ५१ स त्वं कुरु महाबाहो कर्म युक्तं महात्मनः मातुलानां पितॄणां च तेजसोऽस्त्रबलेन च
५२ एतदर्थं हि हैडिंबे पुत्रानिच्छंति मानवाः कथं न तारयेद्दुःखात्स मे तारय बांधवान् ५३ इच्छंति पितरः पुत्रान् स्वार्थहेतोर्घटो
त्कच इहलोकात्परे लोके तारयिष्यंति ये हिताः ५४ तव ह्यस्त्रबलं भीमं माया च तव दुस्तरा संग्रामे युध्यमानस्य सततं भीमनंद
न ५५ पांडवानां प्रभग्नानां कर्णेन निशि सायकैः मज्जतां धार्तराष्ट्रेषु भव पारं परंतप ५६ रात्रौ हि राक्षसा भूयो भवंत्यमितवि
क्रमाः बलवंतः सुदुर्द्धर्षाः शूरा विक्रांतचारिणः ५७ जहि कर्णं महेष्वासं निशि मायामुपाश्रितः पार्था द्रोणं वधिष्यंति धृष्टद्युम्न
पुरोगमाः ५८ संजय उवाच केशवस्य वचः श्रुत्वा बीभत्सुरपि राक्षसं अभ्यभाषत कौरव्य घटोत्कचमरिंदमं ५९ घटोत्कच भवां
स्त्वं च दीर्घबाहुश्च सात्यकिः मतो मे सर्वसैन्येषु भीमसेनश्च पांडवः ६० तद्भवान्यातु कर्णेन द्वैरथं युध्यतां निशि सात्यकिः पृष्ठ
गोपस्ते भविष्यति महारथ ६१ जहि कर्णं रणे शूरं सात्वतेन सहायवान् यथेंद्रस्तारकं पूर्वं स्कंदेन सह जघ्निवान् ६२ घटोत्क
च उवाच अलमेवास्मि कर्णस्य पर्याप्तोऽहं तवानघ अन्येषां क्षत्रियाणां च कृतास्त्राणां महात्मनां ६३ अद्य दास्यामि संग्रा
मं सूतपुत्राय तं निशि यं जनाः संप्रवक्ष्यंति यावद्भूमिर्धरिष्यति ६४ न चात्र शूरान्मोक्ष्यामि न भीतान्न कृतांजलीन् सर्वानेव वधि
ष्यामि राक्षसं धर्ममास्थितः ६५ संजय उवाच एवमुक्त्वा महाबाहुर्हैडिंबः परवीरहा अभ्ययात्तुमुले कर्णं तव सैन्यं विभीष
यन् ६६ तमापतंतं संक्रुद्धं दीप्तास्यमिव पन्नगं अभ्यस्यन्परमेष्वासः प्रतिजग्राह सूतजः ६७ तयोः समभवद्युद्धं कर्णराक्षसयोर्मृधे

Indira Gandhi National
Centre for the Arts

रा० गर्ज्जतो राजशार्द्दूलशक्रप्रह्लादयोरिव १० शरापवर्गिणा विपुद्दे ११ संजयपुत्रवाच हस्ताघरोत्कचं राजन्नस्तपुत्ररथं
१२१ प्रति आपातेनुरथ्यापुत्रं कं जिघांसं कस्मिमाहवे १ अश्ववान्नत्रपुत्रस्ते दुःशासनमिदं वचः एतद्वीरं रथं संस्थमाकर्ण्य विक्र
मं २ आभिपाति द्रुतं कर्णं तं हारपमहारथं हतः सैन्येन महता पार्थिपुत्रमहाबल ३ कर्णं कैश्च तेनोपुद्धेरत्र सैन पुत्र
ति रत्तकर्म्मरसो यन्नो हतः सैन्येनमोनद ४ माकर्ण्य रात्तसोयोरःसमाहान्नाशपिष्यति एतास्मिन्नन्तरे राजन्नरात्तसर
सुतो बली ५ दुर्पौश्च नम्रुपागम्याहस्रहराक्षतर दुर्योधनतवामित्रानुग्रसंघानत्पुद्धेदरम्यहम् ६ पांडवानहंतुमिच्छामि
नवानाम सहानुगान् जटासुरोमममपिता रत्तसौम्यामरात्तःपुरा ७ प्रपुसकर्म्मरत्ताण्मेत्तरे पार्थैर्निपातितः तस्यापचितिमेमि
च्छामिनस्थिरीरतेन्माश्वर ८ तमब्रवीत्ततो राजा प्राप्य मारात् पुनःपुनः द्रोणाकर्णादिभिः सार्द्धं पर्याप्तोहद्विषदधे ९ तत्तुमा
त्वमपाहि तेनेजहि युद्धे घटोत्कचं रात्तसं क्रूरकर्म्माणं ह्यो मानुषं तत्र ९ पंडवानां हितं नित्यं हस्त्यश्वरथघातिनं वैहायसगतं
युद्धे प्रेषयेप्रेमसादनं १२ तथेत्युक्त्वा महाकायः समाहूय घटोत्कचं जटासुरिर्भैमसेनि नानायुधैरवाकिरत् १३ अलंबुषं च कर्ण्णं रा०
रौवकुरुसैन्यं चदुस्तरं हेशिंकिपमममाथैको महावातो व दानिव १४ ततो मायाबलं दृष्ट्वा रत्तस्तस्य मलंबुषः घटोत्कचं शरव्रातैर्नानालिंगैः समार्पयत् १५ भित्त्वा च बहुधा भीमो भैमसेनिमलंबुषः व्यद्रावयच्छरव्रातैः पांडवानामनीकिनी १६ तेन विद्राव्यमाणानि
पांडुसैन्यानि भारत निशीथे विप्रकीर्ण्यंत वातनुन्ना घना इव १७ घटोत्कचशरैर्नुन्ना तथैवतव वाहिनी निशीथे प्राद्रवद्राजन्नुत्सृज्यो
ल्काः सहस्रशः १८ अलंबुषस्ततः क्रुद्धो भैमसेनिं महामृधे आजघ्ने दशभिर्बाणैस्तोत्रैरिव महाद्विपं १९ तिलशस्तस्य तद्वाहस्

तेसर्वायुधानि च घटोत्कचः प्रविछेद नादान् ह्यत्यति दारुणां ततः कर्ण्णो दहारः बाणैः क्रुद्धतमान्सहस्रशः अलंबुषं चाभ्यवर्षन्
मेघो मेरुमिवाचलं २१ ततः संचुक्षुभे सैन्यं कुरूणां राजसत्तम उपर्युपरि चान्योन्यं भतुमुलं समरे हि २२ जटासुरिमहाराज विरथो
हतसारथिः घटोत्कचं रणेक्रुद्धो मुष्टिनाभ्यहनद् दृढं २३ मुष्टिनाभिहतस्तेन प्रचचाल घटोत्कचः क्षितिकंपे यथाशैलः सवृक्षगुल्म
गुल्मवान् २४ ततः सपरिघाभेन दक्षिणेन घनेन बाहुना जटासुरिं भैमसेनिर्निरध्नान्मुष्टिना दृढं २५ तं प्रमथ्य ततः क्रुद्धस्तमाहत्
डिंभिनानिपात्य लोपमी भिरुध्य जो बाधां निष्पिपेषम्तले २६ अलंबुषोपि विनिःपत्य समुत्थायघटोत्कचं घटोत्कचं रणेरोषान्निष्पिपेष
चमूतले २६ अलंबुषोपि विनिःपत्य समुत्थायघटोत्कचं घटोत्कचं रणेरोषान्निष्पिपेषमहीतले २७ तयोः समभवद्युद्धं गर्ज्जतोर्यति
कायपोः घटोत्कचालंबुषयोस्तुमुलं लोमहर्षणं २८ विशेषयन्तावन्योन्यं मायाभिरतिमायिनौ युयुधाते महावीर्यौ इंद्रवैरोचना
विव २९ पावकांबुनिधी भूत्वा पुनर्गरुडतत्तकौ पुनर्मेघमहावातौ पुनर्वज्रमहाचलौ ३० पुनः कुंजरशार्द्दूलौ पुनः स्वर्भानुभास्करौ
